॥ श्रीः ॥

महामहाध्यापक महाकवि पण्डित छज्जूरामशास्त्रि
विद्यासागरेण-प्रणीतः ।

साहित्यविन्दुः ।

(पंजाब विश्वविद्यालय विशारदपरीक्षायां निर्द्धारितः)

तस्येदं ग्रन्थकारेणैव बहुपरिवर्त्य
परिवर्ध्य संशोध्यच प्रकाशितं,

द्वितीयं संस्करणम्

[मूल्यम् १।)

भूमिका

अयिसाहित्यशास्त्र रसिकाः, सर्वं वक्तव्यं श्रोतव्यं च शब्दार्थी मेवेतिकोनजानीते। शब्दार्थज्ञानाय यथा व्याकरणाध्ययनमावश्य तथैवकाव्यसंबन्ध शब्दार्थ दोषगुणालङ्काराणां ज्ञानाय साहि शास्त्रस्याप्यध्ययनंपरमावश्यकमेव। यद्यप्यस्यशास्त्रस्यालङ्कार शा मिति साहित्यशास्त्र मितिचनामद्वयमप्यस्ति। तथापि-काव विषयाणामत्र साहित्यात्साहित्यशास्त्र मेव नामधेय मस्याधि सार्थकम्। अस्तु। इदं शास्त्रं भामह, दण्डि, भट्टोद्भट, वामन रुद्रट, आनन्दवर्धन, महिमभट्ट, कुन्तक, भोज, मम्मट, रुय्यक वाग्भट, हेमचन्द्र, विद्याधर, जयदेव, विश्वनाथ, विद्याभूषण विश्वेश्वर, अच्युतराय, सीतारामशास्त्रि, छज्जूरामशास्त्रि विद्या सागर प्रभृति विद्वद्वरैः क्रमशोनिर्मितं ववृधे। तस्यैकतमोऽयं ग्रन्थ साहित्य विन्दुर्नाम सर्वतन्त्र स्वतन्त्रेण ग्रन्थ कारेण नितान्तसरल दार्शनिकशैल्यानिबद्धः। अत्रनिरूपिताः साहित्य सिद्धान्ताः केष साहित्य-विदुषांमनोनरञ्जयन्ति। अतएव च गुणज्ञैः परीक्षाध्यक्षै विशारद परीक्षापाठ्य ग्रन्थेषु निर्धारितोऽयम्। ग्रन्थकृत्कृतामूल कारिका अपि मूलज्ञानाय कण्ठ करणाय च प्रथम मेव रक्षिताः दत्तेऽपि शुद्धिपत्रे काश्चना शुद्धयः स्युरेवेति स्वयं शोधनीय दयालुभिः पाठकैः॥

—वामदेव उपाध्यायः

ग्रन्थकृत्कृतामूलकारिकाः ।

—❀—

श्रीगणेशं नमस्कृत्य मामकीनाम, मातरम् ।
पितरं मोत्तरामाह्वं मूलचन्द्रं च सोदरम् ॥१॥
जीन्दपुर्याः त्रिक्रोशे जामणी ग्रामसन्निधौ ।
कुरुक्षेत्रमध्यवर्ति रिटोली ग्रामवासिना ॥२॥
'विद्यासागर' इत्येतत्सुवर्णपदधारिणा ।
गौडपण्डितवर्येण छज्जूरामेणशास्त्रिणा ॥३॥
साहित्यसारमादाय साहित्यागम विस्तरात् ।
साहित्यबिन्दुः क्रियते साहित्यज्ञान वृद्धये ॥४॥
रम्यं शब्दार्थयुगलं काव्यमस्माभिरिष्यते ।
रम्यता ऽलौकिकाह्लादजनिका तत्रमन्यताम ॥५॥
धर्मस्यार्थस्य कामस्य मोक्षस्यापि प्रयोजकम् ।
कीर्तिप्रीतिकरं चाहुभामहः काव्यसेवनम ॥६॥
कविसंकेतयुक्तेन कविना कीर्ति मीप्सुना ।
मनः प्रसत्तौ कर्तव्यं काव्य मित्याहवाग्भटः ॥७॥
तस्य काव्यस्य निर्माणे समुल्लासे प्रचारणे ।
व्युत्पत्तिः शक्तिरभ्यासः त्रयं हेतुर्महीतवः ॥८॥
छन्दोव्याकरणज्ञत्वं कला — कोषप्रवीणताम् ।
युक्तायुक्त विवेकं च व्युत्पत्तावाहरुद्रटः ॥९॥
शक्तिं निपुणतां लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यासं हेतुं तत्राह मम्मटः ॥१०॥
यत्र शब्दस्तथैवार्थो गौणभावमुपाश्रितौ ।
काव्यधर्मि [illegible] स्वस्य [illegible] ॥११॥

यत्रवाच्यचमत्कारो व्यंग्यार्थापेक्षयापुनः ।
तद्वदन्तिगुणीभूतव्यंग्यं काव्यन्तुमध्यमम् ॥१२॥
शब्दार्थयोः चमत्कारः परस्पर मपेक्षया ।
प्रधानंयत्रतज्ज्ञेयं मधमं चित्रसंज्ञकम् ॥१३॥
पुनस्तस्यैवकाव्यस्य द्वैविध्य मिह दृश्यते ।
दृश्यश्रव्य भेदेन काव्य व्युत्पत्तिहेतवे ॥१४॥
दृश्यं दर्शनयोग्यं तद् रूपकं रूपरोपणात् ।
अस्यैवाभिनयार्हत्वं मन्यते काव्यकोविदैः ॥१५॥
रामाद्यवस्थानुकृतिर्भवत्यभिनयः स च ।
अंगेन वचसा वस्त्रादिभिः स्वेदादिभिस्तथा ॥१६॥
नाटकं च प्रकरणं भाणव्यायोगवीथिकाः ।
प्रहसनाद्याश्च विज्ञेयारूपकस्य भिदादश ॥१७॥
पंचभिःसन्धिभिर्युक्तंख्यातवृत्तं च नाटकम् ।
शृंगारवीरशान्तानां मेकएवांगितांश्रयेत् ।१८॥
प्रकृतार्थोपसंहारोयत्रसोऽङ्कः प्रकीर्तितः ।
अर्थस्य च प्रसंगेन पात्राणां निर्गमोभवेत् ॥१९॥
पूर्वरंगस्तु पूर्वस्थानतः सभ्यानुकूलता ।
कवेर्नामादिकथनं यत्नात्क्रियतेमुखम ॥२०॥
रंगविघ्नोपशान्त्यर्थं नाटकीयस्यवस्तुनः ।
नटायंकुर्वते पूर्वं पूर्वरंगः स कथ्यते ॥२१॥
आशीर्वादसमहितः क्रियते यत्र संस्तवः ।
गो ब्राह्मणनृपादीनां सैषानान्दी प्रकीर्तिता ॥२२॥
सूत्रधारप्रभृतयः संलपन्ति परस्परम ।
प्रकृतं कार्यमादाय यत्र प्रस्तावनार्हसा ॥२३॥
भावनाम्नासूत्रधारं कथये त्पारिपार्श्वकः ।
सूत्रधृक्मारिषेत्युक्त्या पारिपार्श्वकमेव च ॥२४॥

मध्यस्थे त्वाख्यया वाच्यो नृपेण च विदूषकः ।
नटीच सूत्रधारश्च आर्येतिवदतां मिथः ॥२५॥
विष्कम्भकोमध्यपात्रं भूतभाव्यर्थ सूचकः ।
प्रवेशको भवत्यत्र नीचपात्रप्रयोजितः ॥२६॥
कंचुक्यन्तः पुरचरो हास्यकर्ताविदूषकः ।
सन्ध्यादिकार्यकुशलो दूतइत्यभिधीयते ॥२७॥
सूत्रधारः कमप्यर्थं पात्रं वादायकिंचन ।
कृत्वा प्रस्तावनां गच्छेद्वस्तूपस्थापयेत्कविः ॥२८॥
सर्वश्राव्यं प्रकाशंस्यादश्राव्यं स्वगतंभवेत् ।
कर्तव्यानाटकस्याख्या गर्भितार्थप्रकाशिका ॥२९॥
नाम प्रकरणादीनां नायिकानायकाख्यया ।
नाटिकादेर्भवेदत्र नाम नायिकयैवहि ॥३०॥
कथ्यतेकाव्यसंहारः प्रदानंयद्वरस्यहि ।
देवद्विजनृपादीनां प्रशस्तिः शुभशंसनम् ।३१॥
संस्कृतंचैव हिन्दी च द्वे भाषे काव्यवर्त्मनः ।
संस्कृतेसंस्कृतकविःहिन्द्यांहिन्दीकविर्लिखेत् ॥३२॥
धीराद्धुलश्चललितो धीरोदात्तस्तथैवहि ।
धीरप्रशान्तश्च तथा संस्कृतं ह्येव संपठेत् ॥३३॥
विदुषां दैवतानांच राजन्यामात्ययोस्तथा ।
वणिजां सैनिकानांच पाठ्यंयोग्यं च संस्कृतम् ॥३४॥
श्रोतव्यमात्रं श्रव्यंस्यात् गद्यपद्यमयं च तत् ।
वृत्तबन्धोज्झितं गद्यं पद्यं वृत्तैः प्रकल्पितम् ॥३५॥
सर्गबन्धो महाकाव्यं खण्डकाव्यं ततोऽन्यथा ।
गद्यैः पद्यैश्चसंमिश्रं चम्पूकाव्यं प्रकीर्तितम् ॥३६॥

॥ इति साहित्यबिन्दौ प्रथमो बिन्दुः ॥

काव्यशब्दार्थयोः पूर्वैर्यो विमर्शः प्रदर्शितः ।
स त्वत्रातिसंक्षिप्य लिख्यते बोधवृद्धये ॥१॥
वाचकोऽथ लाक्षणिको व्यंजकस्त्रिविधो हि सः ।
तदर्थः स्याद्धि वाच्यादिः तात्पर्यं कस्यचिन्मते ॥२॥
सर्वेषामपि शब्दार्थानां व्यंजकत्वं मतं बुधैः ।
यो गृहीत -संकेतमर्थं वक्ति स वाचकः ॥३॥
योऽर्थो गृहीतसंकेतस्तद्बोधात्प्रथमाभिधा ।
गुणजाति क्रियाद्रव्येष्वेव स क्रियते बुधैः ॥४॥
सति मुख्यार्थबाधे तद्योगे रूढेः प्रयोजनात् ।
यथार्थो लक्ष्यतेऽह्यन्यः सोच्यते लक्षणा बुधैः ॥५॥
व्यंग्यार्थरहिता रूढौ व्यंग्ययुक्ता प्रयोजने ।
व्यंग्यं गूढमगूढं च तद्विधं त्रिविधा मता ॥६॥
तदाश्रया लाक्षणिको व्यापृतिर्व्यञ्जनात्मिका ।
विरामे सति वृत्तीनां यया योऽर्थः प्रकाश्यते ॥६॥

शब्दनिष्ठार्थनिष्ठा सा व्यञ्जनावृत्तिरिष्यते ।
फलं बोधयितुं ह्येव लक्षणा क्रियते बुधैः ॥८॥
फलं तच्च तद्व्यंग्यंऽत्र न व्यापारोऽञ्जनां विना ।
विना संकेतमभिधानैव हेतुश्च लक्षणा ॥९॥
नानार्थस्य च शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीकृद्या व्यञ्जना-व्यापृतिर्हि सा ॥१०॥
तथा काव्यञ्जकस्तत्र द्वयोश्च सहकारतः ।
वक्त्रादीनां च वैशिष्ट्यादार्थी सा व्यञ्जनेष्यते ॥११॥

विभावैरनुभावैश्च व्यक्तः संचारिभिस्तथा ।
स्थायीभावो हि रत्यादिः प्राप्नोति रससरूपताम् ॥१२॥
कार्यकारण संचारि रूपा लोके हि ये मताः ।
विभावाद्या रसोद्बोधे कारणानि भवन्ति ते ॥१३॥

यदिमध्ये विभावादेर्द्वयोरेकस्य संभवः ।
अन्याक्षेपाद्धारतस्तत्र स दोषो विनिवर्तते ॥१४॥
चर्वणैर्वरसेमानं स्वस्याभिन्नतयेष्यते ।
लोकेरत्यादिजनका विभावाः काव्य एवते ॥१५।
आलम्बनोद्दीपनाख्येतद्भिदे पण्डितैर्मते ।
नायकोपवनाद्न्या लम्बनोद्दीपनेक्रमात् ॥१६॥
स्वस्वहेतुभिरुद्भूतं बहिर्भावं प्रकाशयन् ।
कार्यरूपोह्ययोलोकेऽनुभावः सोऽत्रमन्यत ॥१७।
मन्मुखेचरणादेते संचारपदवींश्रिताः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशन्मतावुधैः ॥१८॥
आलस्यंदीनताचैव चिन्तामोहौ स्मृतिधृतिः ।
निर्वेदोव्रीडा तथाग्लानिः शङ्कासूयामदश्रमाः ॥१९॥
लज्जा चापल्यगर्वौ च जड़तावेगएव च ।
अभिमानो विषादश्च निद्रापस्मार उत्कता ॥२०॥
स्वप्नः प्रवोध उग्रत्व ममर्षश्चावहित्थकम् ।
मतिर्व्याध्युन्मादतर्कामरणं त्रास एव च ॥२१॥
शृंगारोहास्यकरुणौ रौद्रवीरभयानकाः ।
बीभत्साद्भुतशान्ताश्च काव्येनवरसाःस्मृताः ॥२२॥
परस्परावलोकेन चुम्बनालिंगनादिभिः ।
स्त्रीणां च पुरुषाणां च शृंगारोजायतेरसः ॥२३॥
स्थायीभावोयत्र हासः सहास्यः श्वेतवर्णकः ।
आत्मस्थश्च परस्थश्च द्विविधोभन्यतेवुधैः ॥२४॥
अनिष्टा दिष्टनाशाच्च करुणो जायतेरसः ।
कपोतस्यमतोवर्णो देवोऽस्य भगवान्यमः ॥२५॥
स्थायीभावोयतः क्रोधः सरोद्रौरुद्र दैवतः ।
वर्णस्तु रक्त एवास्य प्रोक्ते रसविशारदैः ॥२६॥

गौरवर्णो भवेद्वीर उत्साहस्थायिभावकः ।
दानेन दयया युद्धधर्माभ्यां सचतुर्विधः ॥२७॥
भयं यत्र भवेत्स्थायि सभयानक उच्यते ।
दैवः कृष्णवर्णोऽस्य व्याघ्रादेः सत्वादेर्दर्शनाद्भवेत् ॥२८॥
बीभत्सः सरसः प्रोक्तो जुगुप्सा स्थायिनीयतः ।
श्यामवर्णो मतः स्त्री, कातरेष्वस्य संभवः ॥२९॥
स चाद्भुतो रसो यत्र विस्मयः स्थायिभावभाक् ।
गन्धर्वो दैवतं चास्य वर्णः स्वर्णसमो भवेत् ॥३०॥
स शान्तो यत्र निर्वेदः स्थायिभावः प्रकीर्तितः ।
देवो नारायणश्चास्य वर्णो रजतसंनिभः ॥३१॥
रतिर्हासस्तथा शोकः क्रोधोत्साहौ भयानि च ।
जुगुप्सा विस्मयो देवं निर्वेदश्चेति तेन च ॥३२॥
रसो भावस्तदाभासौ भावस्य प्रशमोदयौ ।
सन्धिश्च शबलत्वं च सर्वे चैते रसा मताः ॥३३॥
शृंगारादौ रसः प्रोक्तो देवादि विषयारतिः ।
भावस्तयो रनौचित्या दाभासौ परिकीर्तितौ ॥३४॥

॥इति साहित्यबिन्दौ द्वितीयो बिन्दुः॥

काव्यापकर्षका दोषाः काव्यज्ञैः समुदीरिताः ।
तेऽमयात्र प्रदर्श्यन्ते बुधबोध विवृद्धये ॥१॥
कष्टाप्रयुक्तसन्दिग्ध व्यर्थाश्लीला प्रयुक्तकाः ।
अप्रमाण्वाचक क्लिष्टाः पदे दोषा नवोदिताः ॥२॥
न्यूनं विसन्धि व्याकीर्णं समाप्तपुनरात्तकं ।
भग्नप्रक्रमतच्छन्दो वाक्यगर्भमरीतिमत् ॥३॥
अविमृष्ट विधेयांशं नेयार्थं निहतार्थकं ।
विमतं चाप्रसिद्धं च वाक्ये दोषाश्चतुर्दश ॥४॥

ग्राम्याद्यश्चार्थदोषास्स्यादुद्युक्तिः स्मृतान्तरः ।
पौनः पुन्येन दीप्ताद्य रसेदोषाः प्रकीर्तिताः ॥५॥
पदवाक्य तदर्था दौ येदोषाः पूर्व मीरताः ।
तेषां क्व चद्दोषत्व मिष्यते काव्य कोविदैः ॥६॥
नोऽक्रमनुप्रासेषु श्लेषादौ ना युक्तता ।
मिथः स्तोत्रे न सन्दिग्धं व्यर्थ यमकादिषु ॥७॥
ना श्लीलं भगवत्पादौ तद्वदार्नाप्रतीतक्रम ।
नानुप्रासहतं नापि लक्षणादावयाचकम् ॥८॥
प्रतीत्यवाधेन्यूनं न पादभेदे विसन्धिन ।
समासे यतिभंगो न ख्याते र्थे न त्रिहेतुना ॥९॥
भिन्न वाक्ये समप्तं न प्राम्यत्वं न द्रुसोक्तिषु ।
सर्वेषामपि दोषाणा मनुकारे न दुष्टता ॥१०॥
॥इति साहित्य विन्दौ तृतीयो विन्दुः ॥

रीतयश्च गुणाः प्रोक्ताः काव्य शोभाकरायतः ।
ततस्तेषां च तासां च क्रियते लक्षणं मया ॥१॥
तत्तद्रसोप कारिण्यस्तत्तद्देश समुद्भवाः ।
भवन्ति रीतयो गौड़ी वैदर्भी लाटकास्तथा ॥२॥
गौड़ी दीर्घ समासास्यादनुप्रसान्विता तथा ।
अल्पवृत्तिस्तुवैदर्भी लाटिका मृदुभिः पदैः ॥३॥
गुणामाधुर्य मोजश्च प्रसादश्चेति तेत्रयः ।
चित्तद्रवणतारूपानन्दो माधुर्य मीरितम् ॥४॥
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।
चित्त विस्तृत रूपाद्दीप्त तौजः प्रकीर्तितम् ॥५॥
क्रमेणाधिकतास्य वीरे वीभत्सरौद्रयो ।
व्याप्य भवतियश्चित्ते ऽनजः शुष्केन्धनेयथा ॥६॥

स प्रसादोमतोधारैः सर्वत्र विहितस्थितिः ।
तेषां शब्दार्थ निष्ठत्वं गुण वृत्त्या मतं बुधैः ॥७॥
त्रिष्वेवान्तर्भवन्त्यन्ये दपहानाच्च केचन ।
भजन्त्यन्ये सदोषत्वं क्वापि तस्मात्त्रयोमताः ॥८॥
अवृत्तिरल्पवृत्तिर्वा माधुर्ये रचनामता ।
समासस्य च बाहुल्य मुद्भटाघट नौजसि ॥९॥
प्रसाद घटनाज्ञेया श्रुतमात्रार्थ बोधिका ।
वक्त्राद्यौचित्यतः क्वापि भिन्ना हिरचनादयः ॥१०॥
॥ इति साहित्य बिन्दौ चतुर्थो बिन्दुः ॥

काव्य शोभाकराः प्रोक्ता अलंकारा मनीषिभिः ।
तेऽत्रापि प्रदर्श्यन्ते शब्दस्यार्थस्य भेदतः ॥१॥
चित्र वक्रो क्त्यनुप्रासगूढश्लेष प्रहेलिकाः ।
प्रश्नोत्तरं च यमकमष्ट शब्दगता स्मृते ॥२॥
तच्चित्रं यत्र वर्णानां खड्गाद्याकार कारणम् ।
वक्रोक्तिः श्लेषतः काक्वा परस्यार्थस्य कल्पना ॥३॥
शब्द साम्य मनु प्रासो लाटस्तात्पर्य भेदतः ।
व्यंजनानां सकृत्साम्य छेकानुप्रासईरितः ॥४॥
क्रियागुणादिकं गूढं, श्लेषः श्लिष्ट पदैः पुनः ।
अर्थ द्वयस्य कथनं, सकृत्प्रश्नः प्रहेलिका ॥५॥
प्रश्नोत्तरंच विविधं वहिरंतः प्रभेदतः ।
यमकं चार्थ भिन्नाना मर्थेसति पुनः श्रुतिः ॥६॥
उपमा चारु सादृश्य मुपमानोपमेययोः ।
मालोपमोपमानत्व एकस्य बहुधामता ॥७॥
उपमाया निषेधोयोऽनुपमासा प्रकीर्तिता ।
अनन्वयस्तु चैकस्य ह्युपमानोपमेयता ॥८॥

तुल्य वस्तु ज्ञान जन्या स्मृतिः स्मरण मीरितम् ।
उपमानोपमेयत्वाऽभेदो रूपक मिष्यते ॥९॥
प्रतिपमुपमानस्य कैमर्थ्यं यदि मन्यते ।
संभावनास्या दुत्प्रेक्षास्वरूप फलहेतुभिः ॥१०॥
बहुभिर्बहु धै कस्योल्लेखेनोल्लेख उच्यते ।
सौल्याद् तस्मिन् यातद्धीर्भ्रान्तिमान्प्रति भान्वितः ॥११॥
प्रस्तुते परसन्देहः सन्देहालंकृतिर्मता ।
अपन्हुतिरलंकारो ऽपह्नवात्कस्यचिद् भवेत् ॥१२॥
उपमानं निषिध्यान्य स्थापनं निश्चयो मतः ।
कथ्यते ऽतिशयोक्तिः सा प्रस्तुतोत्कर्ष मीर्यतः ॥१३॥
प्रकृताऽप्रकृतानां वैक धर्मस्तुल्ययोगिता ।
प्रकृताऽप्रकृतानांचैक धर्मो दीपकंमतम् ॥१४॥
वाक्यानामेकधर्मत्वे प्रतिवस्तूपमेरिता ।
उत्कर्ष उपमेयस्योपमानाद् व्यतिरेककः ॥१५॥
सहोक्ति स्तु सहार्थस्य वलेनैक द्विवाचकम् ।
सा विनोक्ति विनाकिंचित्केनचित् यन्नशोभते ॥१६॥
अप्रवन्वस्तु संबन्ध उपमाकान्दर्शना ।
दृष्टान्त उपमानादे र्मर्म्य प्रतिबिम्बनम् ॥१७॥
समासोक्तिः प्रतीतिर्यत्प्रकृते ऽप्रकृतस्यसा ।
सोऽलंकरः परिकारः साथ यत्र विशेषणम् ॥१८॥
अप्रस्तुत प्रशंसेयं यत्रसा प्रस्तुताश्रया ।
व्याजस्तुतिर्यत्रनिन्दा स्तुतिभ्यां स्तुतिनिन्दने ॥१९॥
साधनार्थान्तरन्यासो यत्सामान्य विशेषयोः ।
यत्राभासो विरोधस्य सावरोध उदीरितः ॥२०॥
विचारस्यो मत्याक्षेपः स्वेनोक्तस्य निषेधकृत् ।
कारणमाला यत्र पूर्वं कारणं क्वच कार्यकम् ॥२१॥

सैकावली परं यत्र स्थाप्यतेऽपोह्यते च प्राक्।
स्वभावोक्तिस्तु शिश्वादेः चेष्टाऽसाधारणी मता ॥२२॥
छलोक्ति निह्नवाभूयः छलेनोद्भिन्न वस्तुनः।
परिवृत्तिः क्रयवद्भ्यां द्वयोर्न्यूनातिरिक्तयो ॥२३॥
पर्यायोक्तं यत्र गम्यवचो वैचित्र्यमावहेत्।
विनैव कारणं कार्योत्पत्तिश्चेत् सा विभावना ॥२४॥
कारणं कार्यकृन्नेद् विशेषोक्तिर्निगद्यते।
कार्यस्य कारणस्याथो ऽसंगति भिन्नदेशता ॥२५॥
पर्यायोऽनैकतो ह्येकं भवति क्रियते ऽथवा।
विषमः स यदेकत्र विरूपद्वयवर्णनम् ॥२६॥
स समो वर्णनं यत्र द्वयोरेवानुरूपयोः।
स व्याघातो ऽन्यथाकारी तथा कारी भवेद्यदि ॥२७॥
स विशेषो विनाधारं यत्राधेयस्य वर्णनम्।
क्रमेणोक्त पदार्थानां यथा संख्यं क्रमान्वयः ॥२८॥
समाधिर्यत्र कार्यस्य सौकर्यं कारणान्तरात्।
स्वगुणत्यागतोऽन्यस्य गुणग्राही तु तद्गुणः ॥२९॥
परिसंख्या परित्यज्यैकं परस्मिन्नियन्त्रणम् ॥३०॥
वर्णनं तदुदात्तं यत्समृद्धिशालि वस्तुनः।
प्रतियोग्य विरोधोयो विकल्पः समबलयोः ॥३१॥
समर्थनार्हस्यार्थस्य काव्यलिंगं मतं बुधैः।
प्रत्यनीकं रिपोः कस्मिन्स बान्धवे पराक्रमः ॥३२॥
काव्यार्थापत्तिरर्थस्य सिद्धिः कैमुतिकान्यायात्।
उत्तरोत्तरमुत्कर्षो यत्र सारः प्रकीर्तितः ॥३३॥
तिलतण्डुलसन्न्यायात्स्थितिः संसृष्टिरेतयोः।
नीरक्षीरनयादेषां संबन्धः संकरो मतः ॥३४॥

अलंकारागणानां गः प्रसिद्धा अत्र दर्शिताः ।
अप्रसिद्धानिबंधस्तु केवलं ग्रन्थविस्तरः ॥३५॥
काठिन्य विहाय हित्वा यथाशक्ति धिया मया ।
साहित्यामृतभीरूणां साहित्यामृतपीतये ॥३६॥
साहित्यबिन्दुरुद्धृतः साहित्यामृत-सिन्धुतः ।
वेदाधिकेद्विमहसे विक्रमादित्यवत्सरे ॥३७॥
मानार्हता यद्यपि सज्जनानां साधारणानां नभवेदमुष्य ।
तथापि मा स्याद् विबुधोत्तमानां साहित्यसर्वार्थविदेमुदेच ॥३८
श्रीमत्पण्डितराजपण्डितजगन्नाथेभ्रयातेदिवम् ।
किंशून्यासि किमाकुलासि कवितेसाहित्यवाग्देवते ॥
एतंगून्भ्वकुलं निभाल्यव अपिप्रसादमासादय ।
सैवाल्य प्रतिभासलूक्तिपुरसः स नन्दयताभन्यता ॥३९॥
यातास्तं हि गुणज्ञता समुदिता भूयानसूयामरः ।
कालोऽयं कलराजगाम महता बुद्धेरपि भ्रामकः ।
अस्त्येका विनयाधिकातिन्पुरो वाग्देवि मेऽभ्यर्थना,
मद्ग्रन्थस्य रहस्यवेदनपरः कोप्यस्तुधीरः सदा ॥४०॥
आसतेभास्करोयावत् यावच्च-दातचन्द्रमाः ।
तावन्मनो विनोदाय कवीनां अस्तु वस्तुनः ॥४१॥
॥ इतिसाहित्य बिन्दौ दशमोबिन्दुः ॥

———

—सूचना—

कारिकावृत्युदाहरणैरयंग्रन्थ स्त्रिधाऽयवतिष्ठते । तत्र प्रथमसंस्करणे कास्वन कारिका अपि संगृहीताआसन् । द्वितीय संस्करणेऽपि प्रमाद वशात्ताएव मुद्रिता जाताः । आगामिसंस्करणे एताश्च
न्यक्कृत्य ... [illegible]



॥ श्रीगणेशायनमः ॥

साहित्य विन्दुः ।

अथ प्रथमो विन्दुः ।

इह खलु "मङ्गलाचरणं शिष्टाचारात् फलदर्शनात् श्रुतितश्चेति सांख्यस्मृतेः । "मङ्गलादीनि मङ्गलमध्यानिमङ्गलान्तानि च शास्त्राणि प्रथन्ते" इत्ति भूवादिसूत्रभाष्योक्तेश्च प्रारिप्सितप्रतिबन्धकोपशमनफलं शिष्टाचारपरम्परा प्राप्तं, "समाप्तिकामो मङ्गलमाचरेत्" इतिश्रुति-समर्थितं, गणेशादिनमस्कारात्मकमङ्गलंशिष्यशिक्षार्थं निवध्नंश्चिकीर्षितं प्रतिजानीते—

श्रीगणेशं नमस्कृत्य मामकीं नाम मातरम् ।
पितरं मोक्षरामाह्वं मूलचन्द्रं च सोदरम् ॥१॥
जीन्दपुर्यास्त्रिक्रोशे जामणी-ग्राम सन्निधौ ।
कुरुक्षेत्र—मध्यवर्ति रिढोली—ग्रामवासिना ॥२॥

'विद्यासागर' इत्येतत्सुवर्णपदधारिणा ।
गौड़ पण्डित वर्येण छज्जूरामेण शास्त्रिणा ॥३॥
साहित्य-शिक्षा मादाय साहित्यागम विस्तरात् ।
साहित्य-बिन्दुः क्रियते साहित्यज्ञानवृद्धये ॥४॥

साहित्यागमविस्तरात्साहित्यशास्त्रविस्तरं प्रविश्य, ल्यब्लोपे पंचमी । साहित्यं च सहितयोर्भावः कर्म वा साहित्यं ष्यञ्प्रत्ययः । सहभावश्च–शब्दार्थयोः, सहितयोः शब्दार्थयोः काव्येप्रयोगात् । तुल्यकक्षत्वे न्यूनानतिरिक्तत्व चमत्कारजनकत्वाच्च । तदिदं कवि-कर्मणः शासकत्वात्साहित्यशास्त्रमितिव्यपदिश्यते । यत्रेदमुच्यते-ऽस्माभिः "तावच्छास्त्रं रुचिकरं न्यायव्याकरणादिकम् । कान्ता-कटाक्षवद्यावत्साहित्यं नावलोक्यते ॥ साहित्यात्प्रकृतेः पुंसः संसारो जायतेऽखिलः । साहित्यादेवमोक्षश्च जीवात्म-परमा-त्मनोः । किंबहुना—अधीयानोऽपि शास्त्राणि साहित्येन विना तु ना । सम्यङ् नाप्नोतिशास्त्रार्थानर्थान् भाग्यमृते यथा ॥ अत्र साहित्यागमो विषयः । तज्ज्ञानं प्रयोजनम् । तज्ज्ञानका-मोऽधिकारी । प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः । इत्यनुबन्धचतु-ष्टयम् । ग्रन्थाध्ययनप्रवृत्तिप्रयोजकज्ञानविषयत्वंचानुबन्धसामान्य लक्षणम् । तत्र-विषयज्ञानादिष्टसाधनत्वप्रकारकं कृतिसाध्यत्व-प्रकारकं चेति ज्ञानद्वयं जायते । विशिष्टबुद्धौ विशेष्यतावच्छे-दकधर्मप्रकारकनिश्चयस्यकारणत्वात् । अधिकारि-ज्ञानेन कृति-साध्यत्व प्रकारकं ज्ञानं जायते । तच्च प्रवृत्तिसाध्यत्वं, प्रयोजनज्ञानेन चेष्टसाधनत्वप्रकारकं ज्ञानं जायते । इष्ट-साधनत्वं चेष्टनिष्ठसाध्य-

तानिरूपकत्वम्, संबन्धज्ञानेन चोभयज्ञानं जायत इति विवेकः। न च नित्येसन्ध्यावन्दनादावप्रवृत्ति-प्रसङ्गः। तत्रेष्ट साधनत्वा-भावादितिवाच्यम्। तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वेन कल्पनात्। न चैवं तस्य काम्यत्वापत्तिः फलवत्त्वादिति-वाच्यम्। फलकामनापूर्वकानुष्ठानाभावात् ॥ ४॥

तत्रतावत्काव्यलक्षणमाह—

रम्यं शब्दार्थयुगलं काव्यमस्माभिरिष्यते।
रम्यताऽऽलौकिकाह्लाद-जनिका तत्र मन्यताम् ॥५॥

तत्र=शब्दार्थयुगले, रम्यता=रमणीयता, साचपुनःपुन रुच्चारणेनानुसन्धानेनचालौकिकमाह्लादं जनयति। अलौकिकत्वं चाह्लादगतश्चमत्कार त्वापरपर्यायोऽनुभव साक्षिको जातिविशेषः। पुत्रस्ते जातः, धनं तेदास्यामि, इतिवाक्यार्थ बुद्धि जातस्याह्लादस्य नालौकिकत्वम्। अतस्तस्मिन्वाक्ये नैवकाव्यत्व-प्रसङ्गः। एवंहि चमत्कार-विशिष्टं शब्दार्थयुगलं काव्यमिति फलितम्। काव्यं पठितं, काव्यं बुद्ध मित्युभयविध-व्यवहार-दर्शनात्, काव्यपद प्रवृत्ति-निमित्त'व्यासज्यवृत्ति, लक्ष्यतावच्छेदक-काव्यत्वस्योभय-वृत्तित्वात्। उभयोरेवयथायथं कविप्रतिभाया आधारभूतत्वाच्च। यत्त्वग्निपुराणे—"शास्त्रेशब्द-प्रधानत्वं तेनकाव्यं विशिष्यते"" इति कर्तव्यतालोकेसर्वाशब्दव्यपाश्रयेति वाक्यपदीये चोक्तं तदर्थाश्रय त्वाभिप्रायेण, अतएव—"नामरूपेव्याकरवाणीति श्रुतिः संगच्छते। पूर्वैः काव्यतत्त्वविद्भिः विपश्चिद्भिर्विद्वन्मनोविनोदाय काव्यस्य नानालक्षणानि कृतानि तेषुकानिचिद्विद्वद्बुद्धिवैशद्याय लिख्यन्ते!

तथाहि—"शब्दार्थौ सहितौ काव्यमितिकाव्यालंकार-सारस दिवाकरो भामहः । 'इष्टार्थव्यवच्छिन्नापदावली काव्यमिति काव्यालंकार कुमुद-कलाधरो दण्डी । काव्यस्यात्माध्वनिरितिध्व-न्यालोककारः काव्यपुरुषावतार आनन्दवर्धनः । तददोषौशब्दार्थौ सगुणावनलंकृती पुनः क्वापीति काव्यप्रकाशकारो वाग्देवता-वतारोमम्मटः । वाक्यंरसात्मकं काव्यमिति साहित्यार्णवकर्णधारः साहित्यदर्पणकारः श्री विश्वनाथः । कवयतिरसभावान् विमृशती-तिकविः, तस्यकर्मकाव्यमिति, साहित्यविद्यावधिर्विद्याधरः। निर्दोषंगुणवत्काव्यमलंकारैरलंकृतम् । रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिंचविन्दति ।। इतिसरस्वतीकण्ठाभरणकारः सर्वज्ञो-भोजराजः । निर्दोषा लक्षणवती सरीतिगुणभूषिता । सालंका-ररसानेकवृत्तिर्वाक् काव्यनामभाक् ।। इतिचन्द्रालोककर्ता पीयूष वर्षोजयदेवः ।। यत्तु—सहृदयगोष्ठी-गरिष्ठ कवि-पण्डित राज जगन्नाथ प्रणीते रसगङ्गाधरे—रमणीयार्थ प्रति पादक शब्दः काव्यमिति काव्यलक्षणमुक्तं तन्नयुक्तम् । काव्यत्वप्रयोज कस्यास्वादव्यञ्जकत्वस्यशब्दार्थयुगलेऽविशेषात् अतएव—वेद त्वादेरुभयवृत्तित्वप्रतिपादकं, तदधीतेतेद्व देतिसूत्रस्यभाष्यं संग च्छते । अर्थावबोधोवेदनमिहाभिप्रेतं न स्वरूपमात्रम् । भाम रुद्रटमम्मटवक्रोक्ति-जीवितकारादयोऽपि हि शब्दार्थयोः साहित्य मेवकाव्यत्वप्रयोजकमभिप्रयन्ति । अन्यथा—साहित्यमिति व्यप देशोऽपि शास्त्रस्यास्य न युज्येत इति पंडितराजस्य मूलच्छेदं पाण्डित्यप्रकर्षः ।।५।।

अस्यग्रन्थस्य काव्याङ्गत्वेन काव्य फला भिन्न फलवत्त्वमिति लक्षणमुक्त्वा काव्यस्य फलान्याह—

धर्मस्यार्थस्य कामस्य मोक्षस्यापि प्रयोजकम्।
कीर्ति-प्रीतिकरं चाह भामहः काव्य-सेवनम् ॥६॥

तत्र काव्यतो धर्मप्राप्तिरीश्वरस्तवनादिना। यदुक्तं-स्तुति-कुसुमाञ्जलौ—"ईशेतुव्ययिता सतां प्रभवति प्रख्यातये भूतये। चेतोनिर्वृतये परोपकृतयेधर्माप्तये भारती" इति॥ काव्याला-पांश्च वर्जयेदितिस्मृति वाक्यं तु भगवद्भिन्नवर्णनविषयकमेव, अतएव-श्रीमद्भागवते-प्रथमस्कन्धे पंचमाध्याये "नयद्वचश्चित्र-पदंहरेर्यशः, स वाग्विसर्गो जनताघविप्लव इत्याद्युक्तम्। अर्थ प्राप्ती राजादिस्तुत्या। यत्रेदमनुश्रूयते-"पवित्रेयत्कुरुक्षेत्रे स्थाण्वीश्वर महापुरम्। सम्राट् हर्षस्ततो राज्यं चक्रेहर्षप्रदोविदाम्॥ लिखित्वा तस्यवै हर्ष-चरितं काव्यमद्भुतम्। समागतः कविर्बाणः तच्चतस्मैन्यवेदयत्॥

तत्काव्यामृतमापीय हेम्नोभारशतं नृपः। स्वसभायाः प्रधानत्वं बाणाय कवये ददौ॥ कामस्य-विषयभोगादेः स्वर्गादेर्वाकामना-विषयस्यप्राप्तिरर्थद्वारा, अर्थसाध्ययज्ञादिद्वारा वा प्रसिद्धैव। "धर्मादर्थस्ततः कामः कामात्सुखसमुन्नतिरिति स्मृतेः, स्वर्ग-कामोयजेत" इतिश्रुतेश्च। मोक्षप्राप्तिस्तु-मोक्षोपयोगिवाक्योप-निषदादौव्युत्पत्तिजनकत्वात्। "लोकव्युत्पन्नस्य वेदार्थ-प्रतीतेरि-तिसांख्यदर्शनात्। मुमुक्षवोऽपि सिध्यन्ति विरागात् रागपूर्वका-

दित्यभियुक्तवचनाच्च। एत एव—धर्मार्थकाममोक्षाः पुरुषार्थपदे-नोच्यन्ते, तथा चाग्निपुराणे-"धर्मार्थकाममोक्षाख्याः पुरुषार्था उदाहृता इति॥ ते च सुखंदुःखाभावश्चेति नैयायिकाः। भोगापवर्गाविति सांख्याः। यज्ञादि कर्मेति मीमांसकाः। ऋते ज्ञानान्न-मुक्तिरितिश्रुतेर्ब्रह्मज्ञानमेवेतिवेदान्तिनः। पञ्चदेवभक्तिरितिवयं स्मार्ताः। कीर्तिकरत्वं—वाल्मीकि, व्यास, भास, शूद्रकविक्रम, कालिदास नाटककार, प्रवरसेन, सातवाहन, गुणाढ्य, समुद्रगुप्त साहसाङ्क, कालिदासकाव्यकार, कुमारदास, भर्तृहरि, भारवि, भट्टि, भट्टनारायण, सुबन्धु, हर्षवर्द्धन, बाण, दण्डि, भवभूति, मुरारि, रत्नाकर, विशाखदत्त, त्रिविक्रम, पद्मगुप्त—कालिदास, राजशेखर, भोजराज, सोमदेव, क्षेमेन्द्र, विल्हण, कल्हण, मङ्ख, जयदेव, श्रीहर्ष, वासुदेव, जगद्धर, जगन्नाथ, नीलकण्ठ, वेङ्कटाध्वरि, हरिहर, अम्बिकादत्त, अखिलानन्द, प्रभृतीनामिव, चन्द्र, सूर, तुलसी, केशव, देव, विहारि, भूषण, मतिराम, पद्माकर, गुप्त, प्रसादादीनामिव वा। प्रीतिकरत्वं—"कादम्बरीरसज्ञानामा-हारोऽपि नरोचते" "काव्य शास्त्र-विनोदेन कालोगच्छति धीमताम्, इत्यादिना सहृदयानामतीव सुप्रतीतम्। काव्यसेवनं काव्यस्यनिर्माणं पठनं च, अयमेवार्थः "काव्यंयशसे" इत्यादि सूत्रेणाभिहितः साहित्यशास्त्रनिर्यासे काव्यप्रकाशे मम्मटेनापि॥६॥

काव्यनिर्माण समयमाह—

कविसंकेत युक्तेन कविना कीर्तिमिच्छुना।
मनः प्रसत्तौ कर्तव्यं काव्यमित्याह वाग्भटः॥७॥

कवि संकेतश्च त्रिविधः । यथाह—'शौद्धोदनिः' असतोऽपिनिबन्धेन सतामप्यनिबन्धनात् । नियमस्य पुरस्कारात्संप्रदाय स्त्रिधा-कवेः ॥ वस्तुगत्या यन्नभवतितदपिकविभिर्निबध्यते, मुखेचन्द्रत्व कमलत्वादि, कीर्त्यादौशुक्लत्वादि । किंचित्पारमार्थिकमपिन निबध्यते । वसन्ते मालती-पुष्पादि । नियमाख्यानं-"शूलीनसर्पी गिरिशः शशी न हरिणो विधुः । इन्दुमौलिर्महादेवो गङ्गामौलि-र्नतु क्वचित् ॥ नैषधेऽप्युक्तं—भंक्तुं प्रभुर्व्याकरणस्य दर्पं पद प्रयोगे कविलोक एव । शशो यदस्यास्ति शशीततोऽय मेवंमृगो-ऽस्यास्तिमृगीतिनोक्तः ॥ तथ्यतरं चैतत्प्रतीमः "कवीनांघटना-न्यैव चराचर-विलक्षणा । अकर्तुमन्यथा—कर्तुं कर्तुं या क्षमते जगत् ॥ अपारे काव्य संसारे कविरेव प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥ अधिकमलंकार-शेखरे द्रष्टव्यम् । मनः प्रसक्तिर्मनः प्रसादः स्फुर्तिरितियावत् ॥७॥

सकल पुरुषार्थ साधन-क्षमस्य काव्यस्य प्रादुर्भावे व्युत्पत्तिः शक्तिरभ्यासश्च कारण मित्याह—

तस्य काव्यस्य निर्माणे समुल्लासे प्रचारणे ॥
व्युत्पत्तिः शक्तिरभ्यासः त्रयं हेतुर्नहेतवः ॥८॥

अत्रहेतुपदं काव्योत्पादप्रयोजकतावच्छेदकसमुदायत्वावच्छि-न्नपरम् । प्रयोजकताच-व्युत्पत्तिशक्त्यभ्यासात्मके समुदाये काव्यो-त्पत्तिसमानाधिकरणाभावाप्रतियोगित्वरूपा । अर्थात्—काव्यस्य रचने समुत्कृष्टत्वे प्रसिद्धौ च व्युत्पत्त्यादि त्रयं दण्ड चक्रादि न्यायेन हेतु र्नतृणारणिमणिन्यायेन हेतवः । तत्र—व्युत्पत्तिर्बोधः,

शक्तिः कवित्ववीजरूपः प्राक्तन संस्कार विशेषः। सैव प्रतिभोच्यते यां विना काव्यं न प्रसरेत्प्रसृतं वोपहासाय। अभ्यासः पुनःपुनर्गद्य पद्य रचनम्। एतत्त्रित्वं मिलितमेव काव्यनिष्ठकार्यता निरूपित कारणतावच्छेदकम्। यत्तु—तैलङ्ग-पुङ्गवो रसगङ्गाधरकारः काव्य—घटनानुकूलशब्दार्थोपस्थिति रूपां कविगतां प्रतिभामेव केवलां काव्यस्य कारण माह। तन्न। कविर्मनीषीपरिभूः स्वयम्भूरितिश्रुति प्रतिकूलत्वान्मम्मटादि ग्रन्थ-विरोधाच्च। स्वयम्भूः स्वतः सिद्ध शक्तिमान्, परिभूः सर्वार्थज्ञानवान्, मनीषी मनन शीलः, कविः काव्यकर्ता भवतीति श्रुत्यर्थः॥ अत्रेदंमहाकविनीलकण्ठोक्तमपिवोध्यं "स्तोतुंप्रवृत्ता श्रुतिरीश्वरं हि न शाब्दिकंप्राह न तार्किकंवा। ब्रूतेतुतावत्कविरित्यभीक्ष्णं काष्ठापरासा कविता ततोनः ॥८॥

सम्प्रति, छात्रमति-वैशद्याय रुद्रट-मम्मटा दिसम्मतानि व्युत्पत्त्यादि लक्षणानि क्रमेणाह—

छन्दो-व्याकरणज्ञत्वं, कलाकोष-प्रवीणताम्।
युक्तायुक्त विवेकं च व्युत्पत्तावाह रुद्रटः ॥९॥

छन्दः=पिङ्गलादिसूत्रम्, तच्च द्विविधं वैदिकं लौकिकं च वैदिकछन्दांसि वेदेषु लौकिकछन्दांसि रामायणादिषूपयुज्यन्ते। पादपद्मद्वयंछन्द" इतिसिद्धान्तशिरोमणौ भास्करोक्तेः षड्ङ्गेषुछन्दसः पादस्थानीयता। तथाचपादाभ्यांरहितस्यमानवस्ययथादुरवस्था-जायते तथानेन विना शास्त्रस्येतिवोध्यम्। व्याकरणं=पाणिनीयादि। तस्य प्रयोजनमाहवामनः—"शब्दस्मृतेः शब्दशुद्धिरिति।

कलाः=नृत्यगीतवाद्यप्रभृतयः चतुःषष्टिसंख्याकाः शैवशास्त्रे काम-शास्त्रे च प्रसिद्धाः । कोषोऽमरसिंहादिप्रणीतः परस्पराकांक्षा-रहितः श्लोकसमूहः । तस्यापिप्रयोजनं वामन एवाह—"अभि-धानकोशतः पदार्थनिर्णय" इति । युक्तायुक्तविवेके युक्तमेव निवध्यमानंकविव्युत्पत्तेरुत्कर्षं पुष्णाति । अयुक्तंत्वपकर्षम् । यदाह-रत्नकण्ठः—"एकः श्लोकवरो विवेकरचितोहृद्यः सतांसत्कवेर्नैवेष्टः कुकवेर्विवेकरहितः कृत्स्नः प्रबन्धोऽपिवा । वक्रोक्त्यावलितः सहासरभसः पौराङ्गना विभ्रमो हर्षोत्कर्षकरोयथानहितथा-ग्रामीणवध्वारतम् ॥ ९ ॥

शक्तिं निपुणतां लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यासंहेतुं तत्राहमम्मटः ॥१०॥

तत्रेतिकाव्योत्पत्तित्वावच्छिन्नं प्रतीत्यर्थः । हेतुमसाधारण-कारणम् । "जात्याकृतिव्यक्तयः पदार्थ" इतिन्यायसूत्रे पदार्थ-इत्यत्रैकवचनेन यथा त्रिष्वेकपदशक्यत्वं, तथात्र परस्परसापेक्षा-नामेव हेतुत्वं लभ्यते नतुव्यस्तानाम् । शक्तिरुक्ता । कार्यानुकूल-कारणनिष्ठसामर्थ्यं वात्रशक्तिः । अनुकूलत्वं च संसर्गः, फल-निष्ठजन्यतानिरूपितजनकत्वम् । लोकः स्थावरजङ्गमात्मकलोक-वृत्तं, योगादुपचाराद्वा । शास्त्यनेनेति शास्त्रमितिव्युत्पत्त्याशास्त्रं-श्रुतिस्मृतिपुराणादिकम् । यदुक्तं भट्टपादैः—"प्रवृत्तिर्वानिवृत्तिर्वा नित्येनकृतकेनवा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ तत्र नित्येन श्रुत्यादिना कृतकेन पुराणादिना, प्रवृत्तिः—"अहरहः सन्ध्यामुपासीत, सत्यंवदेत्यादिश्रुत्या सन्ध्यावन्दनसत्यभाषणादौ ।

निवृत्तिः—"मागृधः कस्यस्विद्धनं, समूलो वाएषपरिशुष्यति योऽनृत मभिवदतीत्यादिश्रुत्या चौर्यानृतभाषणादौ। यद्वा-प्रवृत्तिः पुराणाद्यु पदेशेन पित्राज्ञापालनादि रामादिकार्येषु,निवृत्तिः परस्त्री-हरणादि, रावणादिकार्येषु। लोकोत्तरवर्णनानिपुणकविकर्म-काव्यम्। यत्रेदमुच्यते—किं कवेस्तेन काव्येन वाणेनेवधनुष्मतः। परस्य हृदयेलग्नं यन्नघूर्णयतेशिरः॥ आदिपदादितिहासो रामा-यणभारतादिः; अवेक्षणं पुनःपुनरनुसंधानंतज्जन्या निपुणता-व्युत्पत्तिरप्युक्तैव, काव्यज्ञशिक्षयाकाव्यकरणाभ्यासः। यदा-हुर्वृद्धाः—"अनारतं गुरूपान्तेयःकाव्येरचनादरः तमभ्यासं विदुः। अयमेवाशयः "श्रुतेन यत्नेन च वागुपासिता ध्रुवं करो-त्येवकमप्यनुग्रह" मितिदण्डिनाध्वनितः॥१०॥ काव्यभेदानाह—

यत्रशब्दस्तथैवार्थौ गौणभावमुपाश्रितौ।

कमप्यर्थमभिव्यंक्तस्तत्काव्यंध्वनिरुत्तमम् ॥११॥

अर्थं=व्यंग्यार्थं, कमपीति चमत्कारहेतुम्। ध्वन्यमानार्थस्य चमत्कारसारत्वात्। तेनातिगूढस्फुटव्यंग्ययोर्निरासः। तदुत्तमं काव्यं ध्वन्यतेऽस्मिन्नितिव्युत्पत्त्याध्वनिरित्युच्यते। ध्वनिकारमते-परिणतबुद्धीनामेतदतिरिक्तं काव्यमेव न, यतोहिनहिकवेरिति-वृत्तमात्रनिबन्धनेन महाकवित्वपदलाभः पुराणेतिहासादेरेव-तत्सिद्धेः। यत्तु रसगङ्गाधरकारेण व्यंग्यस्यप्राधान्या प्राधान्याभ्यां ध्वनेर्भेदद्वयंस्वीकृतंतच्चिन्त्यम्। व्यंग्यप्राधान्य एव ध्वनित्वाङ्गी-कारात्। अन्यथा ध्वनिकारादिप्राचामाचार्याणां संकेतविरोधः। यदितु तत्संकेतसेतुं निर्भिद्य स्वतन्त्रं गम्यते, तदान्येप्येवंविधा-

बहुभेदा भवितुमर्हन्तीत्यनवस्थापातः । उदाहरणं ममैव–'गुरुमध्य-गता सीता लीलाकमलताड़िता । नतं च राममालोक्य मन्दमन्द-मघूर्णत ।। क्रियाविशेषणानां कर्मत्वमिति भाष्योक्तेर्मन्दमन्द मितिर्द्वितीयान्तं प्रकारे गुणवचनस्येति द्विभावः । अघूर्णतेत्यनेना-समीक्ष्यकारिन् किमिदमनुचितं कृतवानसीत्यर्थ संवलितोऽमर्षश्चर्व णाविश्रामधामत्वा त्प्राधान्येन व्यज्यते शब्दोऽर्थ अतत्रगौणः।अत्र-रसगङ्गाधर कारेणोदाहृते—"गुरुमध्यगतामयानताङ्गी" तिपद्ये तु नताङ्गीपदेच्युतसंस्कृतिदोषः । "अङ्गगात्रकण्ठेभ्यइत्यस्यभाष्या-नुक्तत्वात् । अतएव सुगात्रीत्यादयोऽपप्रयोगाएवेति शेखरकारा-णामुक्तिः संगच्छते ।। ११ ।।

यत्र वाच्यचमत्कारो व्यंग्यार्थापेक्षयापुनः ।
तद्वदन्ति गुणीभूतव्यंग्यं काव्यन्तु मध्यमम् ।। ११।।

वाच्ये – व्यंग्यार्थापेक्षया चमत्कारिणि सति, मध्यमं काव्यं गुणीभूतव्यंग्यमित्यभिधीयते । यथोक्तं ध्वन्यालोके—"यत्र-व्यंग्यान्वयेवाच्यचारुत्वं स्यात्प्रकर्षवत् । प्रकारोऽन्यो गुणीभूतव्यंग्यः काव्यस्य दृश्यते ।। अस्याष्टौभेदाः काव्यप्रकाशकृता प्रदर्शिता उदाहृताश्च ते तत्रैव कणेहत्य निरीक्षणीयाः । दिङ्मात्रमुदाहर-णम्—"वानीरकुञ्जोड्डीन शकुनि कोलाहलं शृण्वन्त्याः । गृह-कर्मव्यापृताया गोप्याः सीदन्त्यङ्गानि ।। अत्र दत्तसंकेतः कृष्णो-लतागृहं प्रविष्टः । अहन्तु गृहकर्म व्यापृततया तत्र न गन्तुमश-क्नुवं, इति व्यंग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ।।१२

शब्दार्थयोः चमत्कारः परस्परमपेक्षया ।
प्रधानं यत्र तज्ज्ञेयमधमं चित्रसंज्ञकम् ॥१३॥

यत्रार्थापेक्षयाशब्दस्य शब्दापेक्षया चार्थस्यचमत्कारोऽधिकः तद् द्विविधं चमत्कृतिहेतु व्यंग्यरहितं चित्रकाव्यम् । तत्र शब्द-चित्रं यथा मम—

'प्रचण्डदैत्यदोर्दण्ड मद खण्डन हेतवे ।
नमो भक्ताम्ररक्षायै रम्भास्तम्भाय शम्भवे ॥

शम्भवे—'शम्भुरीशःपशुपति' रित्यमरात् शिवाय, 'स्वयम्भूः शंभुरादित्य इति नामसहस्रात्--विष्णवेवा नमोऽस्त्वितिशेषः। नमः स्वस्तीतिपाणिनि सूत्रेण चतुर्थी। उत्कृष्टनिष्ठं स्वनिष्ठाप-कृष्टत्व बोधनं नमःशब्दार्थः । श्रीगणेशं नमस्कृत्येत्यादौतुनमः शब्दयोगेऽपि नसा, द्वितीयया कारक विभक्तित्वेन बलीयस्यावाधा दितिशेखरोक्तेः। अर्थवतो नमः शब्दस्यैव तत्र ग्रहण मिति भाष्योक्तेश्च। अधिकं मदीये शेखर—शैलीके सिद्धान्त-कौमुदी प्रकाशे द्रष्टव्यम्। शिवपक्षेप्रचण्डदैत्या स्त्रिपुरान्धकादय स्तेषाम्। विष्णुपक्षे-प्रचण्डदैत्या हिरण्याक्ष हिरण्यकशिपु मधुकैटभादय स्तेषां दोर्दण्ड मदस्य खण्डन हेतवे, भक्ताएवाम्रवृक्षा इति मयूरव्यंसकादिसमासो रूपकंच तेषां रक्षायै "क्रियार्थोपपदस्य कर्मणि स्थानिन इत्यनेन चतुर्थी। रम्भास्तम्भायेत्युभयत्रतुल्यम्, रम्भास्तम्भेनाम्र वृक्षरक्षणंभव तीतिलोक प्रसिद्धिः। अत्रोदाहरणेऽर्थचमत्कृतिः शब्दचमत्कृतौलीना। अर्थचित्रं यथाममैव—'सुधाधवलि

तात्यन्तविशालाकाशशालिका । चन्द्रमूर्तिरिवाभाति देहली सौघमालिका ॥ सौधमालिकापक्षे-सुधयालेपन द्रव्येण, धवलिता लिप्ता, अत्यन्तविशालातिविस्तृता, आकाशस्य शालेव शालिका स्वार्थेकः कात्पूर्वस्येतीकारः । गृहमिवोच्चत्वात्, चन्द्रमूर्तिपक्षे-सुधा-धवलिताऽमृतयुक्ता । सुधा लेपोऽमृतंसुधेत्यमरः । पातालंत्रीमुखं नाकः सागरश्चसुधाकरः । एतान्यमृतधामानि प्रवदन्ति मनीषिणः इति मदीये दुर्गाभ्युदयेद्रष्टव्यम्,अत्यन्त विशालेमहत्याकाशे शालते शोभत इति शोभाशालिनीत्यर्थः । अत्र शब्द चमत्कृतिरर्थ चमत्कृतौलीना । एतेकाव्यप्रभेदाध्वनिकृतापिमताः । यदुक्तं तेन—"प्रधानगुण भावाभ्यां व्यंग्यस्यैवं व्यवस्थिते । उभेकाव्येततोऽन्यद्यत् तच्चित्रमभिधीयते ॥ अयमर्थः---व्यङ्गार्थस्य प्राधान्येध्वनिः । गुणीभावेतु गुणीभूतव्यंग्यता । ततोऽन्यद्रस भावादि रहितं चित्रम् यदुक्तं तत्रैव—"रसभावादि विषय विवक्षा विरहेसति । अलंकार निबन्धोयः स चित्र विषयोमतः ॥ प्राथमिकानामभ्यासार्थिनांकृतेचित्रकाव्यमिद मस्तीतिध्वनिकाराशयः । एतेन चित्रकाव्यं सर्वथानास्त्येवेतितदाशयं वदन्दर्पणकारः स्थूलदृश्यैव॥१३॥

पुनस्तस्यैवकाव्यस्य द्वैविध्यमिहदर्श्यते ।
दृश्यश्रव्यत्व भेदेन बुधव्युत्पत्तिहेतवे ॥१४॥

पुनर्भेदत्रय निरूपणोत्तरम् । तस्येतिध्वनिगुणीभूत व्यङ्गचित्रात्मकस्य, द्वैविध्यं-संख्याविप्रतिपत्तिनिरासाय । तेच द्वैविधे दृश्यश्रव्यत्वरूपे । तत्रेद मवधेयम्—"कठिनः श्रव्यनिवन्धो दृश्य नि वन्धस्तुभवति सुकुमारः । पुरुष महिलानां यावदन्तरं तावदेते-

षाम् ॥ भगवान्भरतोऽप्याह –"मृदुशब्दाभिधानंच कविः कुर्यात्तु रूपकम् ॥१४॥

दृश्यंतत्राभिनेयं तद्रूपारोपात्तु रूपकम् ।

तद्दृश्यकाव्यं, नटे रामयुधिष्ठिरादि स्वरूपा रोपाद्रूपकमित्युच्यते । यथोक्तं दशरूपके-—" रूपकंतत्समारोपात्, इति ॥ "यथामुखादौ पद्मादेरारोपो रूपकंभवेत् । तथैव नायकारोपो नटेरूपकमुच्यते ॥ अभिनयस्य लक्षणं भेदांश्चत्र ते

भवेदभिनयोऽवस्थानुकारः सचतुर्विधः ॥१५॥

आङ्गिकोवाचिकश्चैव माहार्यः सात्विकस्तथा ।

नटैरंगभंग्यावाक्यविन्यासेन वस्त्रालङ्कारादिभी रंगमञ्चे राम युधिष्ठिरादीनामवस्थाऽनुकरण मभिनयः । अत्र निरन्तरं रसोद्रेको भवति रसाभिलाषावान् प्रेक्षकवर्गश्चात एव तद्दर्शनाय भृशमुत्सुकस्तिष्ठति । अयमेवार्थोमन्दारमरन्दे प्रोक्तः-"उत्पादयन्स हृदये रसज्ञानं निरन्तरम् । अनुकर्तृस्थितोयोऽर्थोऽभिनयःसोऽभिधीयते ॥ यस्य दीर्घयात्रादेःकारणविशेषेण प्रदर्शनं न कर्तुं शक्यते तत्सूच्यमपिवस्तु भवति, अन्यत्र विस्तरः । रूपकस्य-भेदानाह-- ॥१५॥

नाटकंचप्रकरणं भाणव्यायोगवीथिकाः ॥१६॥

प्रहासाद्याश्च विज्ञेया रूपकस्य भिदादश ॥

भिदाइति भेदाः 'षिद्भिदादिभ्योऽङ्' । "संख्येयेह्यादशत्रिषु" इत्यनुशासनात् दशादिशब्दानां संख्येयमात्रवाचिता भवादौ विश

त्यादीनां संख्यामात्र वाचकत्वमिति । वस्तुतस्तु-सर्वेषामपि संख्या वाचकत्वशाचकत्वमेव । अधिकं व्युत्पत्तिवादेद्रष्टव्यम् । नाटकमग्रे दर्शयिष्यते । प्रकरणं-मालतीमाधव, मृच्छकटिकादि । भाणः—मुकुन्दानन्द, शृङ्गारतिलकादिः । व्यायोगः---उरुभङ्ग, पार्थपराक्रम, धनंजयविजय, कल्याण सौगन्धिकादिः । वीथी–विक्रमोर्वशीयादिः । प्रहासः–प्रहसनम्-मत्तविलास, हास्यार्णव, लटक मेलकादिः । आदिपदात्समवकार डिमेहा मृगाङ्क परिग्रहः । तत्र-समवकारो भासकृतं पञ्चरात्रम् । डिमः-त्रिपुरदाहः । ईहामृगः-कुसुमशेखरादिः । अङ्कः–शर्मिष्ठाययाति, रतिदर्पणकारः । अत्रेदमपिवोध्यम्,नाटके प्रकरणे च पञ्चभिन्यूना दशभिरधिका अङ्का-नभवन्ति । वालरामायण हनुमन्नाटकादितु महानाटकम् । भाण वीथ्योरेकएवाङ्कः ! डिमेहामृगयोः चत्वारः । समवकारे त्रयोऽधिकमन्यत्र ।।१६।।

विनाविशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ।।१७।।

सर्वेषां प्रकरणादीनामनुकारात्मकत्वेनाभेऽदेपि वस्तु नेता रसश्चतेषांभेदकः ।। वस्तुतस्तु–पारिभाषिक भेदातिरिक्तो नकश्चिदेषु मौलिकोभेदः ।।१७।। नाटक लक्षणमाह —

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धि समन्वितम् ।
वीरशृङ्गार शान्तानामेकोऽङ्गी तत्र संभवेत् ।।१८।।

ख्यातं--रामायण भारतादि प्रसिद्धं वृत्तं यत्र यथा रामचरितानर्घ राघव, प्रसन्नराघव, वेणीसंहार, शाकुन्तल वाल भारतादि । यथा वा मम श्री छज्जूरामायणम् । दशानामपि रूपकाणां कथाभेदेन

भेदत्रयं संभवति, ऐतिहासिक पौराणिक काल्पनिक भेदात्। तत्रैतिहासिकानि शाकुन्तल, रामचरित, वेणीसंहारादीनि। पौराणिकानि--पार्वतीपरिणय, कंसवध, दुर्गाभ्युदयादीनि। काल्पनिकानि-मालती माधव, नागानन्द, प्रबोधचन्द्रोदय प्रभृतीनि। हिन्द्यां-जयपराजय, दाहर, चन्द्रगुप्तादीन्यैतिहासिकानि। सत्य हरिश्चन्द्र सगर विजयादीनि पौराणिकानि, कामना प्रभृतीनि काल्पनिकानि। सन्धयो विलासादयः तल्लक्षणो दाहरणानि-दशरूपकादौद्रष्टव्यानि। तत्रेतिनाटके, नाटकस्य प्रशंसामाह भरतः—"नतज्ज्ञानं नतच्छिल्पंनसा विद्यानताः कलाः। नासौनयोनतत्कर्मनाटके यन्नदृश्यते॥ अन्येऽपीह श्लोकाभवन्ति—"वेदं वेद व्रिजादन्यः क आकाशमिवाद्भुतम्। नाट्यवेदोविजयते सर्वेषां रञ्जयन्मनः॥ "अहोप्रभावो वाग्देव्या यदस्यानाट्यदर्पणे। स्वभावः सर्वलोकस्य प्रत्यक्ष इव दृश्यते॥ "कोऽन्यःकालमतिक्रान्तं नेतुं प्रत्यक्षतांक्षमः। कविप्रजापतींस्त्यक्त्वा नाट्यनिर्माणशालिनः॥ "यानेवशब्दान्वयमुल्लपामः यानेवशब्दान्वय मुल्लिखामः। तैरेवनाट्यस्थितिमात्ररम्यैः सम्मोहयन्ते कवयोजगन्ति॥ अत एवहि-"काव्येषु नाटकंरम्यम्" "नाटकान्तं कवित्वमित्याद्या बाल वृद्धं प्रसिद्धम्॥८॥ अङ्क लक्षणमाह—

प्रत्यक्षनेतृचरितो रसभावसमुज्वलः।
अन्तर्निष्क्रान्त निखिलपात्रोऽङ्कइतिकीर्तितः॥१९॥

प्रत्यक्षं-प्रत्यक्षवदाभासमानं, नेतुर्धीरोदात्त, धीरोद्धत, धीरललितधीरप्रशान्तस्य रामभीमवत्सराज माधवादेश्चरितं यत्र तथा-

विधः। अत्र विशेषोदशरूपा वलोके कामशास्त्रे च द्रष्टव्यः । भरत-स्त्वाह–"प्रस्तुतार्थोपसंहारोयत्राङ्कः सोऽभिधीयते । अर्थप्रसङ्ग मादाय पात्रनिर्गम इष्यते ॥१६॥ अथ नाटक रचनाप्रकारमाह—

तत्रपूर्वंपूर्वरङ्गः सभापूजा ततःपरम् ।

कथनं कविसंज्ञादे र्नाटकस्याप्यथामुखम् ।२०॥

तत्रेतिनाटके। सभापूजा--विनीतवचनादिना सभ्यानामभि मुखीकरणम् । कविसंज्ञादे रित्यादि पदात्कवि गोत्र ग्रहणम्। गोत्रंनाम च वध्नीया दितिभरतोक्तेः। आमुखं=प्रस्तावना, यथोक्तं सुधाकरे--"विधेर्यथैवसङ्कल्पो मुखतां प्रतिपद्यते । नाटकादि प्रबन्धस्य तथा प्रस्तावना मता ॥२०॥

यन्नाट्यवस्तुनः पूर्वं रङ्ग विघ्नोपशान्तये ।

कुशीलवाःप्रकुर्वन्ति पूर्वरङ्गः सउच्यते ॥२१॥

"वाक्यार्थाभिनयोनाट्यं, यत्कारिषुनटव्यपदेश इतिकौमुदी-कारः। तस्मान्नाट्य वस्तुनोऽभिनयारम्भात्पूर्वं रङ्गे नाट्यशालायां संभाव्यमानोयो विघ्नस्तस्यशान्त्यर्थं यं प्रकुर्वन्ति नटाः सपूर्व--रङ्गः।नाट्यवस्तूपोद्‌घात इतियावत्।उपोद्घा तत्वंच प्रकृतसिद्धय-नुकूल चिन्ताविषयत्वम् ॥ अत्रेदमपिवोध्यम्–भारतीय नाट्यशा-स्त्रानुसार मेकैव नाट्यशाला विकृष्ट चतुरस्रत्र्यस्र भेदेन त्रिधा विभज्यते। विकृष्टा-विदुषां राज्ञां विशिष्टधनिकानां, चतुरस्रा सर्वसाधारण जनतायाः, त्र्यस्रा स्वकीय कार्यकारिणां चकृतेऽभवत्। नाट्यशालायाः पश्चाद्भागे यवनिकाभवति। अस्या रूप

रेखा नाटकीयरसानुसारं परावर्तते। तद्यथा-रौद्ररसाय रक्ता, भयानकाय कृष्णा, शृङ्गारायश्यामा, करुणायचित्रा, अद्भुताय पीता, वीभत्साय नीला, वीराय कपिशेति। ऋग्वेदानुसारं नाटकस्य त्रीणिमूलानि–गीतकाव्याख्यानकथोपकथनकाख्यानि। नाटकोत्पत्यारम्भस्थानं च सर्वं प्रथमं भारतवर्षमेव मन्यते विद्वद्भिः। मेक्डानलकीथप्रभृतिभिर्यूरोपीय—विद्वद्भिरप्येतत्स्वीकृतम्। अस्यावश्य कर्त्तव्यस्य नान्दीनामाङ्गस्य स्वरूपमाह----

आशीर्वचन संयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥२२॥

स्तुतिरिति नमस्कारस्याप्युपलक्षणम्। तच्च स्वबोधकत्वेसति परवोधकत्वम्। यदाहकोहलः-गो ब्राह्मण नृपादीना माशीर्नान्दीति कथ्यते ॥२१॥ प्रस्तावनायाः स्वरूपमाह----

नटीविदूषकोवापि पारिपार्श्विकएववा।
सूत्रधारेण सहिताः संलापंयत्र कुर्वते ॥२३॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखंतत्तु विज्ञेयं नाम्ना प्रस्तावनापिसा ॥२४॥

नटी सूत्रधारस्यपत्नी। विकृतवेषोहास्यकारी च विदूषकः पारिपार्श्विक सूत्रधारौ भरतेन लक्षितौ "सूत्रधारस्य पार्श्वेयः प्रवचन् कुरुतेऽर्थनाम्। काव्यार्थ सूचनालापं सभवेत्पारि पार्श्विकः॥ "नाटकीय कथासूत्रं प्रथमंयेन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥२३।२४॥

सूत्रधारं वदेद्भाव इतिवै पारिपार्श्विकः ।
सूत्रधारो मारिषेति पारिपार्श्विकमेवच ॥२५॥
विष्कम्भकोमध्यपात्रंभूतभाव्यर्थसूचकः ।
प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ॥२६॥

भूतभाव्यर्थसूचकः=वृत्तवर्तिष्यमाणकथा निदर्शकः, अनुदात्तोक्तिः साधारणोक्तिः स्पष्टमन्यत् । इमौद्वावपि विष्कम्भकप्रवेशकौ दुर्गाभ्युदयस्य द्वितीये षष्ठेचाङ्के द्रष्टव्यौ ॥२६॥

अर्थं कञ्चन पात्रं वा समाक्षिप्यैव सूत्रधृक् ।
प्रस्तावनान्ते निर्गच्छेत्ततो वस्तुप्रयोजयेत् ॥२७॥

अर्थमाक्षिप्यवेणीसंहारे। पात्रमाक्षिप्य मम दुर्गाभ्युदयनाटके। सूत्रधृक्=सूत्रधारः, निर्गच्छेन्निःसरेत्ततः कविः वस्त्वितिवृत्तं, प्रयोजयेत् उपस्थापयेत् । वस्तुच द्विविधं मन्यते । यदुक्तमाचार्यनखकुट्टेन-"इतिवृत्तंहिनाटयस्य शरीरं परिकीर्तितम् । गौणमुख्यविभेदेन तच्चापि द्विविधं भवेत् ॥ रामादेश्चरितंमुख्यं सुग्रीवादेस्तुगौणकम् ॥२७॥ अथनाटयोक्तयः—

सर्वश्राव्यं प्रकाशंस्यादश्राव्यं स्वगतंमतम् ।

सर्वश्राव्यंयद्वस्तुतत्प्रकाशमित्युच्यते । यत्तु सर्वस्याश्राव्यं तत्स्वगतमिति । यथादुर्गाभ्युदये षष्ठेऽङ्के दीर्घजानुः स्वगतम् । अहो अद्यापिशुंभस्यजयाशा, प्रकाशम्–वक्रमुख, इत्यादिना । किंचिन्नियतश्राव्यमपिभवति विस्तरभयात्तन्नलक्षितमुदाहृतं चास्माभिः ।

नामकार्यं नाटकस्य गर्भितार्थ प्रकाशकम् ॥२८॥

यथारामाभ्युदयादि । ममवा दुर्गाभ्युदयम् ॥२८॥

अथ काव्यसंहारप्रशस्त्यौ—

वरप्रदानसंप्राप्तिः काव्यसंहारइष्यते ।

देवद्विजनृपादीनां प्रशस्तिः शुभशंसनम् ॥२६॥

यथा दुर्गाभ्युदये किंतेभूयःप्रियंकरोमि । इदमस्तुभरतवाक्यम् ।

विप्राणां बदनेषु वेदभगवानास्तां समस्तांशतः,
त्वत्पादाम्बुजयोः समस्त सुखयोर्निर्व्याजभक्तिर्भवेत् ।
वाग्देव्या सममस्तु वास्तुनि सतांलोकाभिरामारमा,
वृद्धियान्तु सुखानिसन्तु मतयोधर्मे नृणां सर्वदा ॥

"जन्मनाब्राह्मणोज्ञेयः संस्काराद्द्विज उच्यते । विद्यया याति विप्रत्वमिति स्मृतिलक्षणलक्षितानां विप्राणां वदनेषुमुखेषु "षण्णां भगइति स्मृतेर्भगवानैश्वर्यादिषड्गुणसंपन्नः प्रशंसायां मतुप्, वेदो जैमिनिसूत्रितो मन्त्रब्राह्मणात्मकः शब्दराशिः सच न पुरुषनिर्मितः । वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययनसामान्यादधुनाध्ययनंयथा ॥ इत्यादिनावेदापौरुषेयत्वस्यसाधितत्वात् 'यः कल्पः सकल्पपूर्वः' इतिन्यायेन संसारस्यानादित्वादीश्वरस्य च सर्वज्ञत्वादीश्वरोगतकल्पीयंवेदमस्मिन् कल्पेस्मृत्वोपदिशतोस्यैतावतैवोपपत्तौनिर्मितत्वकल्पनानुपपत्तेश्चेति मीमांसान्यायप्रकाशे । समस्तांशतः समस्तैरङ्गोपाङ्गैः सहास्तां विराजतां, सतां विदुषां सज्जनानां वा, वास्तुनिगृहे वाग्देव्या सरस्वत्यासह रमत इति रमा लक्ष्मीः । रमेः पचाद्यचि टापि प्रत्ययान्तत्वादप्रातिपदि

कत्वेऽपि ङ्याप्प्रातिपदिकादित्यत्रङ्यापोः पृथग्ग्रहणात्, लिङ्ग-विशिष्टपरिभाषया वा स्वादयः, हल्ङ्यावितिसुलोपः। सधन्यः सपुमान् लोके यस्त्वया देविवीक्षित इत्यभियुक्तोक्तेः सा लोकाभि-रामाऽस्तुनिवसतु स्पष्टमन्यत् ॥२९॥ अथभाषाविभागः—

संस्कृतं चैव हिन्दी च द्वेभाषे काव्यवर्त्मनः।

संस्कृते संस्कृतकविः हिन्द्यांहिन्दीकविर्लिखेत् ॥३०॥

अर्थात् काव्यमिति। काव्यनिर्माणाय साम्प्रतं द्वेभाषेस्त इति शेषः। यदाहवामनः। न प्रसिद्धे क्रियाध्याहारदोषः। नच त्रयः काला इत्यादौ कस्याश्चिदपि क्रियाया अध्याहारो न कर्तुं-शक्यते वर्तमानकालिकसत्ताया भूतकालिकसत्ताया भविष्यत्का-लिकसत्ताया वा कालत्रयेवाधितत्वादितिवाच्यम्। 'ज्ञायन्ते' इत्य-ध्याहारेण वर्तमानकालिक ज्ञानविषयताश्रयत्वस्यतत्रसत्वेना-दोषात्। सन्तीत्यध्याहारोऽपि कर्तुंशक्यते लडुपात्तवर्तमानत्व-स्याविवक्षितत्वादित्यलमधिकेन। आन्तरिक विचाराणां भावानां चान्यान्प्रतिस्पष्टतया प्रकटीकरणाय सरलसाधन भाषेत्यस्मत्प्रिया-वामदेवोपाध्यायाः। साच स्वाभाविक संस्कारवशात्संस्कृतं देव-वाणीविद्वद्वाणीतियावत्। "विद्वांसोहिदेवा इति श्रुतेः। संस्कृत-भाषात्रिविधा - वैदिकी, पौराणिकी, साहित्यकी च। हिन्दी हिन्दुस्थानस्य भाषा, साचापि त्रिविधा, चन्द्रकालिकी, तुलसी-कालिकी, संस्कृतपरिष्कृताऽस्मत्कालिकी च। हिन्दी भाषायाः सम्प्रति स्वर्णयुगो यत्रेदमुच्यतेमयैव—"हिन्दीकृतेशताब्दीयं मन्ये स्वर्णयुगायते। यदस्याद्दृश्यतेभूयान् प्रचारः स्त्रीषुपुंसुच॥

सर्वोत्कृष्टा मधुरा च हिन्दीभाषाममेन्द्रप्रस्थद्वीपस्येत्यपिद्योत्यम्। प्राकृतभाषातु साम्प्रतिकैः कविभिः काव्येषु न प्रयुज्यते। उदाहरणमत्र कवि देवीप्रसादस्य पुण्यश्लोकोदयम्। मम दुर्गाभ्युदयञ्च। यथोत्तरं मुनीनां प्रामाण्यमितिभाष्योक्त्या साम्प्रतिकसिद्धान्तस्यैवानुसरणं करिष्यन्ति कविवरा इतिवयंदृढं विश्वसिमः। उभयेषांमुनित्वंतु—"नानृषिः कुरुते काव्यमिति देवीभागवतेसर्वज्ञभगवद् व्यासवचनात् ॥३०॥ अथ श्रव्यकाव्यानि—

श्रव्यं श्रोतव्यमात्रंतद् गद्यपद्यमयं द्विधा।

वृत्तबन्धोज्झितं गद्यं पद्यं वृत्तैः प्रकल्पितम् ॥३१॥

श्रोतव्यमात्रं श्रवणमात्रविषयं न तु प्रेक्षणार्हमभिनेयं च। यदाहभोजोऽपि—"श्रव्यंतत्काव्यमाहुर्यन्नेदयते नाभिनीयते। श्रोत्रयोरेव सुखदं भवेत्तदपि सुन्दरम्। वृत्तमनुष्टुबादि। दण्डीत्वाह—"अपादः पदसन्तानो गद्यमाख्यायिकाकथा।" पद्यं पादेन संयोगात्पादोभागश्चतुर्थकः॥ तत्रैकस्यैवघटकलशादिव्यपदेशवद्गद्यस्यैव कथाख्यायिकादिसंज्ञान्तरमितिनेहोक्तम्। तत्र गद्यकाव्यानिवासवदत्ता, कादम्बरी, हर्षचरित, दशकुमारचरित, शिवराजविजय, पञ्चतंत्र, हितोपदेशादीनि। हिन्दीगद्यकाव्यानि हिन्दी महाभारत, शुकोक्तिसुधासागर, प्रेमसागर, प्रेमाश्रम प्रभृतीनि। पद्यकाव्यानि द्विविधानि—महाकाव्यानि खण्डकाव्यानि च।

सर्गबन्धो महाकाव्यं खण्डकाव्यं ततोऽन्यथा।

महाकाव्यं तदेवोच्यते—यत्रकस्यापि महापुरुषस्यचरित्र-

चित्रणं पूर्णतयोपलभ्यते । तस्यैकदेशस्यवर्णनं यत्र भवति तत्खण्डकाव्यमितिविवेकः । महाकाव्यमीशानसंहितानुसारम् । अष्टसर्गैर्नन्यूनंत्रिंशत्सर्गैर्नाधिकं प्रतिसर्गं भिन्नवृत्तं च । क्वचिन्न्यूनाधिक्यमपिहरविजयवासुदेवविजयादौ विपर्यासदर्शनात् । मुक्तकादीनामत्रैवान्तर्भावः । तत्रपद्यमहाकाव्यानि—बुद्धचरित, रघुवंश, किरातार्जुनीय, भट्टि, माघ, हरविजय, पृथ्वीराजविजय, नवसाहसाङ्कचरित, विक्रमाङ्कचरित, नैषधचरित, सुलतानचरितादीनि । हिन्दीमहाकाव्यानिपृथ्वीराजरासो, रामचन्द्रिका, रामचरितमानस, साकेत, कामायनी प्रभृतीनि । खण्डकाव्यानि सर्गबन्धादि नियमरहितानि नलोदय, मेघदूत, गीतगोविन्द, गाथा, शतकत्रय, मयूरशतकामरुशतकादीनि । हिन्दी खण्डकाव्यानि—सूरसागर, बिहारीशतसई, वृन्दशतसई, जयद्रथवध पथिकादीनि ।

गद्यपद्यमयंकाव्यं चम्पूरित्युच्यतेबुधैः ॥३२॥

चम्पूकाव्यानि—नलचम्पू, रामायण चम्पू, भारतचम्पू, बृन्दावन चम्पू, नीलकण्ठ विजयादीनि । हिन्द्यां चित्राधार, यशोधरा प्रभृतीनि । काव्यस्य द्वौपरिपाकौप्रसिद्धौ यथोक्तम्—अर्थगम्भीरिमा पाकः सद्वेधा कविसम्मतः । द्राक्षापाको नारिकेलपाकश्चप्रस्फुटान्तरौ । द्राक्षापाकस्तु विज्ञेयः स्फुरदन्तर्बहीरसः । स नारिकेलपाकः स्यादन्तर्गूढरसोदयः ॥ आद्यस्य शाकुन्तलादिः । द्वितीयस्य किरातार्जुनीयादि रुदाहरणम् ॥

इति साहित्य शिक्षायां प्रथमोऽध्यायः समाप्तः ।

———

अथ द्वितीयोऽध्यायः।

काव्यशब्दार्थयोः पूर्वैर्योविमर्शः प्रदर्शितः।
सएवात्रातिसंक्षिप्य लिख्यतेबोधवृद्धये ॥१॥

काव्यशब्दार्थयोः—काव्यलक्षण प्रविष्टशब्दार्थयोः, शब्दत्वजातिमत्त्वं शब्दस्य तदभिधेयत्वं चार्थस्य प्रसिद्धमेवलक्षणम्। संबन्धश्चतयोः तादात्म्यमेव,सचपदेवाक्येच अतएवाहन्यायभाष्यकार संबन्धज्ञानार्थं चेदंपदलक्षणाया वाचोवाक्यलक्षणायाश्चेति। नच शब्दार्थयोः तादात्म्यस्वीकारे मध्वादि शब्दोच्चारणे मुखे माधुर्या द्यापत्तिरिति शंकनीयं, वौद्धेमध्वादावर्थे माधुर्यादि शक्तिमत्त्वा भावात्। अतएव "शब्दज्ञानानुपाती वस्तुशून्योविकल्प" इति योगसूत्रंसंगच्छते। वस्तुशून्योबाह्यार्थरहितः। विकल्पोबुद्धि परिकल्पितइतितदर्थः। अतएवच—"एषवन्ध्या सुतोयातीत्यत्रवन्ध्या सुतादेर्बाह्यार्थ शून्यत्वेऽपि बुद्धिपरिकल्पितं वन्ध्यासुतश वाच्यार्थं मादायार्थवत्वात्प्रातिपदिकत्व मन्यथाऽर्थवत्वाभावे प्रातिपदिकत्वाभावात्स्वाद्युत्पत्ति र्नस्यादित्यन्यत्रविस्तरः पूर्वैरि मम्मटादिभिर्यो विमर्शो विचारः प्रादर्शिस एवेति विशेष जिज्ञासुभि तेषामेवग्रन्थेषु द्रष्टव्य इतिध्वनयितुम्। अतिसंक्षिप्येत्यनेन तस ग्रहण धारण सुखताप्रदर्शिता। "समासोक्तस्य चार्थस्य सु ग्रहण धारणे" इत्यभियुक्तोक्तेः॥

स्याद्वाचकोलाक्षणिकः शब्दोऽत्रव्यञ्जकस्त्रिधा।
वाच्यादय स्तदर्थाःस्यु तात्पर्यार्थोऽपिकेषुचित् ॥२॥

अत्र काव्ये, शब्दस्त्रिविधस्तदुपाधीनां त्रैविध्यात्, ननु विभागादेर्वा त्रित्वे सिद्धे त्रिधाग्रहणं व्यर्थमिति चेन्न। न्यूनाधिक संख्याव्यवच्छेदार्थत्वात्। तेषां शब्दानामर्था अपि क्रमाद् वाच्य लक्ष्यव्यङ्ग्याःस्युः। अभिहितान्वयवादिप्राचीननैय्यायिकमते—तात्पर्यार्थोऽपिनास्मन्मते इतिकेषुचिदित्यनेन ध्वन्यते षष्ठ्यर्थे सप्तमीयम्। अभिहितान्वयवादिभिर्वाक्यार्थबोधाय तात्पर्यनाम्नीवृत्तिः स्वीक्रियते, तदर्थश्च तात्पर्यार्थः। यथा—घटंकरोतीत्यत्र घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थोबुध्यते। तत्र घटपदस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता, वृत्तितातु न कस्याप्यर्थ इत्यपदार्थोऽपि वृत्तिता तात्पर्यवृत्त्याभासते। एवं देवदत्तो ग्रामं गच्छतीत्यस्य ग्रामकर्मक गमनानुकूलकृतिमानदेवदत्त इतिशाब्दबोधेऽनुकूलत्वञ्च, अर्थात्—एवमादिस्थलेषु तात्पर्यवशादशक्योऽप्यर्थोवाक्यात्समुल्लसति। नव्यनैय्यायिकगदाधरप्रभृतयस्तुव्युत्पत्तिवादादाविमां तात्पर्यवृत्तिंसंसर्गमर्यादामाचक्षते। अन्विताभिधानवादि मीमांसकविद्वांसस्तु--क्रियाकारकयोःप्रथमत एवान्वयबोधोजायते ततः शक्तिग्रहः पदविशेषसाहचर्यात्तु विशेषस्मरणमिति किं तात्पर्यवृत्त्यङ्गीकारेणेत्याहुः ॥२॥ शब्दस्यव्यञ्जकतावदन्ययोरपि व्यञ्जकतामाह—

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

सर्वेषां=वाच्यलक्ष्यव्यंग्यानामपीत्यपिर्भिन्नक्रमः। न केवलं शब्दस्यैव वाच्यस्यैव वा व्यञ्जकत्वमपितुव्यंग्यार्थस्यापिव्यञ्जकत्वमिति बोधयितुमिदम्। वक्त्रादिवैशिष्ट्यानवतारेऽर्थान्तर-

व्यञ्जकत्वं न संभवतीति प्रायशइत्युक्तम्। तत्र वाच्यस्य व्यञ्ज-कत्वं यथा—'अवलोकय निष्पन्दो बिसिनीपत्रेवकोभाति। निर्मलमरकतभाजन परिस्थितो बिमलशङ्खइव ॥

"क्रियापिकृत्रिमं कर्मेत्यादिभाष्योक्तेः 'पश्यमृगोधावतीतिवत्–वकपदे न द्वितीयापत्तिः। अवलोकयेति विध्यर्थेलोट्। विधिश्च-प्रवर्तनारूपः, प्रवर्तनात्वंच प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्याप्यस्तीतीष्ट साधनत्वमेवविध्यर्थः। इष्टत्वंच-समभिव्याहृतपदोपस्थापितकामनाविषयत्वं स्पष्टमन्यत्। श्रीकृष्णं प्रतिगोप्याः कस्याश्चिदुक्तिरियम्। अत्र निष्पन्दशब्दस्यार्थेन क्रियाविरहेणवकगतमाश्वस्तत्वंव्यज्यते अतः संकेतस्थानमेतत्। लक्ष्यार्थस्ययथा—

'साधयन्ती प्रियेकान्तमतिदूनासिमत्कृते ।
सद्भावस्नेहकर्तव्यं तावद्विरचितं त्वया ॥

हे प्रिये, प्रियसखि, मत्कृते-मदर्थं कान्तं साधयन्ती–प्रियसमीपेगच्छन्ती, साधिरयन्तोगमनार्थे प्रयुज्यते। अतिदूनासिपरि-तप्तासि दूङ् परितापेकर्तरिक्तओदितश्चेतिनत्वम्। अत्रमत्प्रियं हरिंरमयन्त्यात्वयाशत्रुत्वमाचरितमितिलक्ष्यं, तेन च हरिविषय-सापराधत्वप्रकाशनं व्यंग्यम्। व्यंग्यस्य यथा—

'कुरङ्ग मातङ्ग पतङ्ग भृङ्ग मीनाहताः पञ्चभिरेवपञ्च।
एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेवपञ्च ॥

पञ्चभिर्ज्ञानेन्द्रियैः पञ्चविषयान् सेवते भुंक्ते, भोक्तापुरुषो भोक्तव्याविषयाभोगसाधनानीन्द्रियाणीतिन्यायभाष्यकारः। स्पष्ट-

मन्यत् । अत्रेन्द्रियाणामतिप्रमाथित्वं व्यज्यते, तेन तेषां वशीकरणं कथञ्चित् केषांचिदेवशुभकर्माणिकुर्वतामिहजन्मनिजन्मान्तरेवा भगवद्भक्त्या शास्त्राभ्यासेन च जायते इति व्यज्यते । यत्रेदमुच्यते— "ईश्वरानुग्रहादेषा पुंसामिन्द्रियवासना । महाभयं प्रकुर्वाणा द्वित्राणामेव नश्यति ॥२॥ वाचकादीनां स्वरूपमाह—

साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ॥३॥

यस्य शब्दस्य यत्राव्यवधानेन संकेतोगृह्यते स तस्यार्थस्य वाचकः। यन्मुख्यविशेष्यशाब्दबोधानुकूलशक्तिमत्त्वं यत्पदे तिष्ठति तत्रैवतद्वाचकत्वव्यवहारात् । तदुक्तं योगभाष्येपि स्थितोऽस्यवाच्यस्यवाचकेन संबन्ध इति । संकेतश्चास्माच्छब्दादयमर्थो बोद्धव्य इतिभगवदिच्छारूपःसोऽयंपदविशेष्यकोऽर्थविशेष्यकोबोधविशेष्यकश्चेति शक्तिवादेविचारः । सएवशक्तिः । इयंशक्तिरीश्वरेच्छारूपत्वाद्गुणान्तरगतैवेति न्यायविदः । पदार्थान्तरमेवेति पूर्वोत्तरमीमांसकाः । पदपदार्थयोःसम्बन्धान्तरमेववाच्यवाचकभावरूपाशक्तिरितिवैय्याकरणा आलंकारिकाश्च आहुरितिकृतमप्रकृतविस्तरेण । संकेतग्रहस्तुअसतिबाधके व्याकरणोपमानकोषाप्तवाक्यादितः ॥३॥ अभिधामाह—

तत्रसंकेतितार्थस्य बोधनादग्रिमाऽभिधा ।
संकेतो गृह्यते जातौ गुणद्रव्य क्रियासु च ॥४॥

तत्र तावत्, संकेतितार्थस्य-मुख्यार्थस्य, मुख्यत्वंच लक्ष्यव्यंग्यापेक्षया प्रथमोपस्थितिविषयत्वम् । बोधनात् स्वज्ञानेनशाब्द-

बोधजननात् तथा चाभिधीयते कथ्यते सांकेतिकः शब्दार्थोऽन-येति निर्वचनात्संकेतितार्थबोधजनिका शक्तिरभिधेत्युच्यते। सा-च त्रिविधा-केवलसमुदायशक्तिः, केवलावयवशक्तिः, समुदायाव-यवशक्तिश्च, एताएवंविधा रूढि, योग, योगरूढि, शब्दैर्व्यपदिश्य-न्ते। अवयवार्थमनपेक्ष्य समुदायशक्तिमात्रेणार्थबोधकत्वं रूढित्वम्। अवयवार्थसंवलित समुदायशक्त्यार्थबोधकत्वं योग-रूढित्वम्। अवयवशक्त्या समुदायशक्त्या चार्थबोधकत्वं यौगिक-रूढित्वम्। आद्यायाडित्थादिः, द्वितीयायाः पाचकादिः, तृतीयायाः पङ्कजादिरुदाहरणम्। चतुष्टयी शब्दानां प्रवृत्तिरिति ऋलृक्सूत्रभा-ष्यरीत्याशब्दोजात्यादिभिश्चतुर्धाभिद्यते। तत्र-'गोःवाभिसम्बन्धाद् गौरिति वाक्यपदीयोक्तेर्जातिर्गोपिण्डादिषुगोत्वादिका गोत्वंच गोर्भावः सचप्रकृतिजन्यबोधेप्रकार इति कौमुदीकारः। गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगितानवच्छेदकधर्मत्वादित्यनुमानात्। नच जातिव्यक्त्योर्वैय्याधिकरणसंभवः। गोत्वादिमत्त्वस्याधेयता-संबन्धेनगवादिव्याप्यत्वात्। "सत्वे निविशतेऽपैतिपृथग्जातिषु दृश्यते" इत्यादि वोतोगुणवचनादितिसूत्रभाष्योक्तलक्षणो गुणो विशेषाधानहेतुः शुक्लादिः। द्रव्यशब्दा देवदत्तयज्ञदत्तविष्णुमित्रा-दयः। क्रियाः साध्यत्वेनाभिधीयमानाःपचतिपाकादयः। 'यावत्सिद्ध-मसिद्धंवासाध्यत्वेनाभिधीयते। सा क्रियेतिहयुक्तेः। "नहिक्रिया क्रियान्तर समवायं गच्छतीति सार्वधातुकेयगितिसूत्रभाष्योक्तेः-क्रियान्तराकांक्षानुत्थापकतावच्छेदकधर्मवत्त्वं साध्यत्वम्। अन्यत्सिद्धत्वमिति। एष्वेवव्यक्तेरुपाधिषु-संकेतोगृह्यतेन

व्यक्तिमात्रे, सर्वासुव्यक्तिषु संकेतग्रहस्वीकारे व्यक्तीनामानन्त्या द्युगसहस्रेणापि सर्वासांतासांज्ञातुमशक्यत्वात् । सामान्यलक्षणानङ्गीकारात् । एकस्यां व्यक्तौसंकेतग्रहस्वीकारे तदतिरिक्तभानाभावव्यभिचारात् । नापिजातिमात्रे व्यक्तिविनाजातिभानस्यासंभवेनव्यक्त्यप्रतीतिप्रसङ्गात्, तस्माज्जात्यादि विशिष्टेसः । न चात्रतौदोषौ सामान्यलक्षणया सर्वव्यक्त्युपस्थितौ सर्वत्र संकेतग्रहसौकर्यादितिन्यायविदः । भाष्यकारास्तु—"उभयोरुभयं पदार्थ इत्याहुः ! जातिर्व्यक्तिश्चद्वयमपिगवादिपदानामर्थ इति तदर्थः । सरूपसूत्रभाष्यात्तु जातिविशिष्टव्यक्तिरर्थ इति बुध्यते । अधिकमस्माभिर्न्यायसिद्धान्तमुक्तावलीटीकायां मूलचन्द्रिकायां प्रतिपादितमिति तत्तत्रैवकरोहत्यानिरीक्षणीयम् ॥ ४ ॥ लाक्षणिक निरूपणाय तदुपाधिलक्षणां लक्षयति—

मुख्यार्थबाधेतद्योगे रुढितोऽथप्रयोजनात् ।
अन्योऽर्थोलक्ष्यतेयत्सा लक्षणाऽरोपितक्रिया ॥५॥

मुख्यार्थस्य-वाच्यार्थस्य, बाधे-वक्तृतात्पर्याविषयत्वे, तद्योगेऽमुख्येन लक्षणीयेन मुख्यार्थस्य योगे सम्बन्धेसति, रूढितः प्रयोजनाद्वाय यावृत्याऽन्योर्थो मुख्यार्थतावच्छेदकातिरिक्तधर्मावच्छिन्नो लक्ष्यतेसालक्षणा । रुढिप्रयोजनान्यतर हेतुकत्वेसति मुख्यार्थतावच्छेदकातिरिक्तधर्मावच्छिन्नार्थबोधजनको व्यापारोलक्षणेतिफलितम् । 'पंचापः सुन्दरः' इत्यादौ पञ्चापादिशब्दो देशविशेषेस्वार्थेनसंभवति । विवक्षितस्याङ्गप्रत्यङ्गादिनिरुपित-

सौन्दर्यस्यतत्राभावात्। यथाशब्दशक्त्या स्वोत्पन्ना स्त्रीपुरुषां-ल्लक्षयति। यथाच-'कुरुक्षेत्रेऽस्मद्गृहम्' इत्यत्र चत्वारिंश-त्क्रोशपरिमिताभूमिः कुरुक्षेत्रपदवाच्यातत्रसर्वदेशावच्छेदेनगृहा-संभवादाधारधेयसंबन्धेनास्मद्गृहाधिकरणत्वयोग्यंतदेकदेशंलक्ष-यति, सालक्ष्यते स्वाभिमतार्थोऽनयेतिनिर्वचनाल्लक्षणाभण्यते। पूर्वत्र हेतूरूढिः प्रसिद्धिरेव। द्वितीयप्रयोगे स्वगृहस्यपवित्रत्वादि बोधनरूपंप्रयोजनम्। इयमेव नैयायिकैः स्वारसिकलक्षणोच्यते। मुक्तावलिकाराः मुख्यार्थस्यान्वयानुपपत्तितात्पर्यानुपपत्तिचलक्षणा बीजमाहुः। वेदान्तपरिभाषाकारास्तु केवलांतात्पर्यानुपपत्तिमेव। मीमांसकाश्चान्वयानुपपत्तिम्। महावैयाकरण-भाष्यकारास्तु 'सतितात्पर्ये सर्वे सर्वार्थवाचका इतिलक्षणैव नास्तीत्याहुः। परन्तु योगिदृष्ट्याभगवद्भाष्यकारोक्तिरियं नास्मद्दृष्ट्या शास्त्रंत्वस्मदभि-प्रायेणेति वैयाकरणैरपिस्रामन्तव्या॥ ५॥

व्यंग्येनरहितारूढौ सहितातु प्रयोजने।

प्रयोजनमनुद्दिश्यरूढिव्यतिरिक्तयालक्षणया नार्थं प्रतिपाद-यन्तिसाहित्यविदः। अतोरूढिलक्षणायांनकिञ्चिदपिव्यंग्यं भवितुमर्हति। प्रयोजनवत्यांतुपावनत्वातिशयादिव्यंग्यमस्त्येवेति। प्रयोजनंहिव्यञ्जनव्यापारगम्यमेव प्रयोजनव्यङ्ग्ययोरेकार्थ-त्वात्।

तच्चगूढमगूढं वा तदेषा कथिता त्रिधा॥६॥

तच्चव्यंग्यं—सहृदयमात्रवेद्यं गूढं, तदेवहिकामिनीकुचकलश-वच्चमत्करोति। यथाममच्छायापद्ये—

'भवतोपकृतं यन्मेवहु तत्र किमुच्यते।
एवमेव सखे कुर्वन् सुखमास्वशतं समाः॥

शतंसमाः=शतवर्षपर्यन्तं, परमावधिश्चैषकलावायुषः।'शतायुर्वैपुरुष' इतिश्रुतेः। "योऽधिकं जीवति स वर्षशतंजीवतीति भाष्योक्तेश्च। सत्ययुगे चतुःशतवर्षाणां त्रेतायुगे त्रिशतवर्षाणां द्वापरयुगे द्विशतवर्षाणांचायुः पुंसामासीत्। न चैवं स्वीकारे कथमथर्ववेदे-सहस्रायुः सुकृतः सञ्चरेयम्। इत्युक्तंमतिवाच्यम्। भगवतायास्केन निरुक्ते शतसहस्रादि शब्दानां बहुत्वसंख्यावाचकत्वस्यनिर्धारणात्। एतेन "षष्टिवर्षसहस्राणि जातस्य मम कौशिक" "शतयोजनविस्तीर्णं समुद्रमित्यादि रामायणाद्युक्तं व्याख्यातम्। वशिष्ठ व्यासादीनां तु यावधिकारमवस्थितेर्बह्वायुष्ट्वम्। सुखं सुखपूर्वकं यथास्यात्तथा, क्रियाविशेषणस्थले द्वितीयातिरिक्तविभक्तिर्नोत्पद्यते, क्रियाविशेषणानां कर्मत्वं क्लीवत्वं चेत्यनुशासनेन तत्र कर्मत्वातिदेशात्। "भवदादिसर्वनाम सामान्यवाचीतिभाष्योक्तेरियं कंचिदपकारिणं प्रत्युक्तिः स्वविरुद्धमपकारादिरूपमर्थं लक्षयति। निरपराधस्यापिसख्युमर्मानिष्टमाचरतस्तवदुष्टत्वं दुःशकंवक्तुमितिस्वसाधुत्वद्योतनं व्यंग्यम्। तच्चातितरांनिगूढंसहृदयमात्रवेद्यत्वात्। तथाचोक्तश्लोक एवं फलतिः। "भवतापकृतं यन्मे वहुतत्र किमुच्यते। एवमेवाऽसखे कुर्वन् दुःखमास्वशतंसमाः॥ अगूढं सहृदयासहृदयवेद्यं, तच्च वाच्यायमानतयानचमत्करोतियथा ममच्छायापद्ये—

'लक्ष्मी परिचयान्मूढाहार्दज्ञा विदुषामपि।
यौवनस्य मदः स्त्रीणां ललितान्युपशिक्षति॥

लक्षधातोरीप्रत्ययेमुड़ागमेच लक्ष्मीः प्रसिद्धैव तस्याः परिचयोलाभः तस्मान्मूढा मुहवैचित्त्ये, वैचित्यमविवेक इति कौमुदीकारः। मूर्खा अपि विदुषांहार्दज्ञा अभिप्रायवेदिनो भवन्ति। स्त्रीणां स्त्रीभ्यः चतुर्थ्यर्थे षष्ठी स्त्रियस्त्रिविधाः स्वस्त्री परस्त्री साधारणस्त्रीति। पद्मिनीहस्तिनीशंखिन्यादयो भेदाः कोकशास्त्रादवगन्तव्याः। ललितानिरतिचेष्टितानि। सुगतमन्यत् अत्रोपशिक्षतीत्यनेनाविष्करोतीतिलक्ष्यते। चेतनधर्मस्योपशिक्षणस्य यौवनमदेवाघात गाढाविष्कारोऽनायासेनललितज्ञानंच व्यंग्येतयोश्चवाच्यवत्प्रतीतेरगूढत्वं, वाच्यवृत्त्यनालिङ्गितस्यैवव्यंग्यस्य चमत्कारजनकत्वात्। एवं चैषालक्षणानाम्नीवृत्तिः। अव्यंग्या गूढव्यंग्या अगूढव्यंग्याचेतिभेदात्त्रिधा। व्यंग्यरहिता रूढि लक्षणैकविधैव, प्रयोजनवती प्रथमतोद्विविधाशुद्धागौणी च। शुद्धाचतुर्विधा उपादानलक्षणा, लक्षणलक्षणा, सारोपासाध्यवसानाच। गौण्यपि सारोपासाध्यवसानाचेति षड्विधा, गूढागूढत्वेनद्वादशधा, मिलित्वा त्रयोदशविधालक्षणा। तत्र भाष्ये कुन्तान् प्रवेशय, गङ्गायामाश्रम, इत्युपादानलक्षणलक्षणयोरुदाहरणे। आयुर्घृतम्, आयुरेवेदम्, इति च सारोपासाध्यवसानयोः। इमेभेदाः शुद्धायाः। 'गौर्वाहीकः, 'गौरयम्, इति गौण्याः। आयुर्घृतमायुरेवेदमित्यादौजन्यजनकभावादिसंबन्धः तत्पूर्वकेसारोपासाध्यवसाने पूर्वत्र क्षीरादिवैसादृश्येनापरत्रनियमेनायुर्जनकत्वादिप्रयोजनम्। आदिपदबोध्यास्तादर्थ्यादयःकाव्य प्रकाशेऽलंकारसुधानिधौचोदाहृताः। गौणभेदयोस्तु–गौर्वाहीकइत्यत्रसादृश्यं लक्ष्यतालच्छेकं गवाभेदप्रत्ययः प्रयोजनम्, गौरयमित्यत्रसर्वथाभेदावगमश्च। यत्रत्वविनाभा-

वोऽर्थापत्तिर्वा तत्रनोपादानलक्षणारूढिप्रयोजनयोरभावात् ॥६॥
लाक्षणिकमाह—

तद्भूर्लाक्षणिकस्तत्र व्यापारो व्यञ्जनात्मकः ।

तद्भूर्लक्षणाश्रयः शब्दोलाक्षणिकः कथ्यते । तत्र लाक्षणिके शब्दे व्यज्यतेविलक्षणोऽर्थोऽनयेतिव्यञ्जनातदात्मकोव्यंग्यप्रकाशानुकूलो व्यापारः । व्यञ्जकनिरूपणायव्यञ्जनां लक्षयति—

विरतावभिधादीनां यथार्थोबोध्यतेऽपरः ॥७॥
सावृत्तिर्व्यञ्जनानाम शब्दादीनां निगद्यते ।

अभिधालक्षणातात्पर्यवृत्तिषु स्वंस्वमर्थं बोधयित्वा विरतासु ययाऽन्योमुख्यलक्ष्यतात्पर्यार्थतावच्छेदकातिरिक्त( )धर्मावच्छिन्नोऽर्थोबोध्यतेसावृत्तिर्व्यञ्जनेत्याख्यायते । इयं च मुख्यतयाऽलंकारिकैर्वैय्याकरणै रेवचस्वीक्रियते, हठत्यागेतुसर्वेषामेतत्स्वीकार आवश्यकः । साचद्विविधा शब्दनिष्ठा अर्थनिष्ठाच । शब्दनिष्ठाऽपि द्विविधा, अभिधामूला, लक्षणामूलाच । प्रसङ्गसङ्गत्या लक्षणामूलातावल्लक्ष्यते—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥८॥
फले शब्दैक गम्येऽत्र व्यञ्जनान्नापराक्रिया ।

शीतत्वपावनत्वादि प्रयोजनंप्रतिपादयितुं यत्र 'गङ्गायामाश्रमः' इत्यादिर्लाक्षणिकशब्दः प्रयुज्यते तत्रनान्यतः शब्दात्तत्प्रतिपत्तिः । गङ्गात्वेनतटस्य प्रतीतावेवतत्प्रतीतेर्नत्वन्यथायथावा—"जातालताहिशैले" इत्यादौकनकलतात्वेनैवरूपेणवोधस्यचमत्कारजनकत्व-

नेतरथा नचतत्रव्यंग्यनिष्ठव्यञ्जनादृतेऽन्यः कश्चनव्यापारोऽस्ति-सहृदयसम्मतः ॥७८॥ ननु प्रयोजनप्रतिपादनेऽभिधादिरेवास्तु-समर्था किमकिंचित्करव्यञ्जनयेत्यत्राह—

नाभिधासमयाभावाद्धेत्वभावान्न लक्षणा ॥९॥

"गङ्गायामाश्रम" इत्यादौ-शैत्यादयोधर्माः तटादौ प्रतीयन्ते तत्रगङ्गादिशब्दानां संकेताभावान्नाभिधा । नापिचलक्षणा—मुख्यार्थबाधस्यरूढिप्रयोजनयोश्चाभावात । मुख्यार्थतावच्छेदकतया मुख्यार्थप्रतियोगिकाभावस्यरूढिप्रयोजनयोरन्यतरस्यचलक्षणायां कारणत्वात । किञ्च—"अद्यारभ्यचिरं साधो निःशङ्कमिहसंचर। रेवाकुञ्जेमृगेन्द्रेण स श्वाद्य प्रतिघातितः ॥ अत्र भिक्षुकंप्रत्येवं वदन्त्याः कुलटायाः प्रतिवेशिनं प्रतिनिःशङ्करत्यभिधानंव्यंग्यं, तदेतद् व्यञ्जनांविनानैव लब्धव्यम्। अत एव निपातानांव्यञ्जकत्व स्फोटस्य व्यंग्यताचहर्यादिभिरुक्ता। व्यंग्यताचैषा शब्दतदर्थपदपदैकदेशवर्णरचना चेष्टादिष्वपितथैवानुभवात्। अनुसित्याव्यंजनांगतार्थयतोभट्टमहिमादेस्तुमतसर्वथैवनयुक्तं तद्धेतूनामनैकान्तिकादि दोषग्रस्तत्वेनाभासत्वात्। द्योतकत्वतात्पर्यग्राहकत्वादिशब्दैर्व्यवहरद्भिर्नैयायिकैरपिव्यञ्जनास्वाकार्यैवेत्यन्यत्रविस्तरः ॥९॥

अथाभिधामूलाव्यञ्जनानिरूप्यते—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥ १०॥

अनेकार्थस्य अनेकत्रगृहीतशक्तिकस्यशब्दस्य, नच नानार्थेषु तस्यैकस्याएवशक्तेरुपगमात्कथं नानार्थत्वं नानाशक्तिमत्त्व

नानार्थत्वादितिवाच्यम् । शक्यतावच्छेदकभेदेन शक्तिभेदस्याव-श्यकत्वात् । अवच्छेदकभेदस्यावच्छेद्यभेदनियतत्वात् । अन्यथा-ह्यर्यादिपदेऽपिशक्त्यैक्यापत्तेः । यत्तु यथाधानकर्मत्वगोत्वादि रूपशक्यतावच्छेदकभेदेऽपिनशक्तिभेदः अवच्छेदकतायाव्यास-ज्यवृत्तित्वात् । तथाहर्यादिपदेऽपिचन्द्रत्वसूर्यत्वयोर्व्यासज्यवृत्ति-शक्यतावच्छेदकतास्वीकारान्नशक्तिभेदइतितन्न । नानार्थपदात्प्र-त्येकधर्मावच्छिन्नस्यापिप्रतीत्याप्रत्येकएवावच्छेदकत्वपर्याप्तेरवश्यो-पगन्तव्यतया शक्यतावच्छेदकभेदेनशक्तिभेदस्यावश्यकत्वादित्य-लंतर्ककर्कशविचारेण । वाचकत्वेद्वितीयार्थवोधकत्वेसंयोगादिभि-र्नियन्त्रितेनिवारितेसति, नियन्त्रणमपरार्थोपस्थितिप्रतिबन्धः । वाच्यातिरिक्तार्थधीकरोव्यापारोऽञ्जनंव्यञ्जनैवनाभिधादिकम् । क्वचिदेवशब्दंविनापितदर्थप्रत्ययोऽब्भक्षोवायुभक्षइतिवत्, अपएव भक्षयति वायुमेवभक्षयतीतिभाष्योक्तेः । यत्तत्र रसगङ्गाधरका-रेण नानार्थस्याप्राकरणिकेऽर्थेव्यञ्जनेतिमम्मटादिसिद्धान्तोनयुक्त इत्युक्तं तन्नसमीचीनम् । तादृशार्थस्यव्यञ्जनैकगम्यतायाः सकला-चार्यसम्मतत्वात् । यदपिचतेनैवोक्तं–"प्राकरणिकाप्राकरणिकयो-रर्थयोरुपमायां-सा कदाचित्स्यादपीत्यस्माकं प्रतिभातीति, तदपि-नसम्यक् । "अन्तरेणडाविवाहश्चेदादौकिंनविधीयते' इतिलौकिक-न्यायविरोधात् । संयोगादयश्च भगवताभर्तृहरिणोक्तावाक्यपदीये-

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्यसंनिधिः ॥
सामर्थ्यमौचिती देशः कालोव्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतवः ॥

तत्रसंयोगः प्रसिद्धसम्बन्धः, वियोगोविश्लेषः, साहचर्यं साहश्यं, सदृशयोरेवसहप्रयोगादिति कर्मप्रवचनीययुक्ते द्वितीयेति-सूत्रभाष्येध्वनितम्। विरोधिताप्रसिद्धवैरम्, अर्थः प्रयोजनम्। प्रकरणं, वक्तृश्रोतृबुद्धिस्थत्वम्, लिङ्ग-परपक्षव्यावर्तकोधर्मः। संनिधिरेकार्थता। सामर्थ्यं-शक्तिःकारणतावा। औचितीयोग्यता, व्यक्तिः पुंनपुंसकादि। एतेहितात्पर्यसंदेहनिरासद्वाराशब्दस्यवि-वक्षितार्थज्ञानजनकाभवन्ति। क्रमेणोदाहरणानि—सशङ्खच-क्रोहरिः, 'अशङ्खचक्रोहरिः, अत्रशङ्खचक्रसंयोगस्य विष्णा-वेवदृष्टचरत्वात्तत्संयोगात्रयोगौविष्णुमेवबोधयतोनत्विन्द्रादिकम्। "भीमार्जुनौ" इत्यर्जुनः पार्थएवभ्रातृत्वेनसहचरत्वान्नसहस्रबाहुः। नचेन्द्रपुत्रत्वाद्विष्णोरंशत्वाद्वाऽभ्यर्हितं चेत्यनेनार्जुनस्यपूर्वनिपातो-युक्तइतिवाच्यम्। भ्रातुर्ज्यायसइत्यनेनज्यायसोभ्रातुःपूर्वनिपातात्। भाष्येतुसर्वतएवाभ्यर्हितंपूर्वमितिस्थितम्। कर्णार्जुनौ, इतिकर्णः सूतपुत्रोनतुश्रोत्रम्। तयोर्वैरस्यप्रसिद्धत्वात्। स्थाणुंवन्देभवच्छिदे, इतिस्थाणुः शिवोनतुशुष्कवृक्षः, "तमेवविदित्वाऽतिमृत्युमेतीत्या-दिश्रुत्याभवच्छेदनकर्तृत्वस्यार्थस्यशिव एव प्रसिद्धेः। "सर्वंजा-नातिदेवः' इतिदेवः प्रकृतेभवान्। 'कुपितोमकरध्वज इति मकर-ध्वजः कामोनतुसमुद्रस्तत्रकोपकर्तृत्वलिङ्गाभावात। वेदान्तसूत्रि-तोऽभिमानिव्यपदेशस्तुनात्राभिप्रेतः। नचकामेऽपिकोपकर्तृत्वंन-सम्भवतितस्यानङ्गत्वप्रसिद्धेः। अशरीरं वावसन्तं नप्रियाप्रिये स्पृशतइतिश्रुतेश्चेतिवाच्यम्। हरतापितनुंयस्य शम्भुनानहृतंबलम्, धावत्यग्रेकलितललिताकाण्डकोपोमनोभूः" इत्याद्यभियुक्तोक्त्या-शौर्यकोपादिगुणानांतत्राङ्गीकारात्। 'देवः पुरारिः, इति पुरारि-

पदसंनिधेः देवः शिवोनतुराजादिः, तत्रपुरारित्वासंभवात्। 'मधु-नामत्तः पिकः' इतिमधुवसन्तः। कोकिलत्वजात्यवच्छिन्नकोकिलमादनेमधोरेवशक्तिः। नतुपुष्परसादेरप्रसिद्धत्वात्।

'पातुवोदयितामुखम्' इतिमुखमौचित्यात्सांमुख्यम्। नचमुखशब्दस्यवदनवाचकत्वमस्तु चुम्बनादिनावदनस्यापि कामत्राणजनकत्वौचित्यादितिवाच्यम्। असंमुखीनदयितावदनस्यकामत्राणजनकत्वौचित्याभावात्। 'विभातिगगनेचन्द्रः' इतिचन्द्रोगगनदेशस्थः चन्द्रमानतुकर्पूरपूरः तस्याकाशवृत्तित्वाभावात्। 'निशिचित्रभानुः' इतिचित्रभानुर्वह्निः। रात्रिकालेसूर्यभानस्यासंभवात्। 'भातिरथाङ्गमिति' नपुंसकव्यक्त्या रथाङ्गंचक्रम्। नतुपक्षी तद्वाचकस्यपुंस्त्वात्। 'स्वरस्तु-'इन्द्रशत्रुर्वर्धस्वे'त्यादौ वेदएवविशेषप्रतीतिकरो नतुकाव्येइतितस्यविषयोनोदाहृतः। आदिपदादभिनयादिर्यथा-साहित्यकौमुद्यां—'एतावत्कुचपद्मयमेतावन्नेत्रपङ्कजा। पङ्कजाद्य, भवत्वद्यतवद्यस्यलंकृतिः॥ अतिदुर्लभायां कस्यांचिद्गोपकुमार्यामासक्तचित्तेन श्रीकृष्णेन तदवाप्तये मुहुरभ्यर्थितायाः साधितार्थायाः कस्याश्चित्प्रगल्भदूत्या विवक्षितार्थाकृतिप्रदर्शकहस्तादिव्यापाररूपाभिनयद्वारा तां प्रदर्शयन्त्याः श्रीकृष्णं प्रत्युक्तिरियम्। अत्रकुचादीनां कमलकोरकाद्याकारत्वंहस्तचेष्टया वोध्यते। 'नमुने' इतिसूत्रभाष्येऽप्युक्तम्—'इहेङ्गितेन निमिषितेन चेष्टितेनाप्यभिप्रायोगम्यतइति। इत्थमनेकार्थस्यशब्दस्ययया द्वितीयार्थो वुध्यते साव्यञ्जनैव, यथा—शालकादिप्रयुक्ते—'सुरभिमांसंभक्षयतीत्यादौ। अत्र सुगन्धिमांसभोजनप्रकरणे द्वितीयार्थगोमांसोपस्थितौ विदग्धस्य भोक्तुर्जुगुप्साजायते। ननु प्रथमार्थवोधानन्तरं ताद-

शपदज्ञानस्य विरामात्कथं व्यञ्जनयापि द्वितीयार्थधीरितिचेन्न। प्रथमार्थप्रतीतेर्व्यापारस्य शृङ्खलाया अविच्छिन्नत्वात्। एवंसत्यपि द्वितीयार्थप्रतीतिरत्रनास्त्येवेतिकेषांचित्प्रवादस्तु हठवादग्रस्तएवे. तिप्रेक्षावद्भिरुपेक्षणीयएवनापेक्षणीयः ॥१०॥

तद्युक्तो व्यञ्जकस्तत्वं द्वयोश्च सहकारतः।

तया व्यञ्जनया युक्तः शब्दोव्यञ्जक इत्युच्यते। तत्त्वं व्यञ्ज. कत्वम्, द्वयोः शब्दार्थयोः, यथाशब्दोव्यञ्जकत्वेऽर्थमपेक्षते तथार्थः शब्दमपि "नसोऽस्तिप्रत्ययोलोकेयत्रशब्दोनभासते" इति वाक्यपदीयोक्तेः। "शब्दपूर्वकोह्यर्थेसंप्रत्ययइतिभाष्योक्तेश्च। तदेकस्यव्यञ्जकत्वेऽन्यस्यसहकारोऽवश्यमङ्गीकर्तव्यः। सम्प्रत्या. र्थीव्यञ्जनोच्यते—

वक्त्रादीनां च वैशिष्ट्यादार्थी सा व्यञ्जनेष्यते ॥ ११॥

यः परबोधनाय वाक्यमुच्चारयतिसवक्ता। सच कविः तन्नि. बद्धोनायकादिश्च। आदिपदात्प्रतिपाद्य काकु चेष्टादेः परिग्रहः। एषां संकरे–यस्यप्राधान्यं तेन व्यपदेशः। प्राधान्येनव्यपदेशाभव. न्तीतिसिद्धान्तात्। प्राधान्यंचचमत्कारप्रयोजकत्वम्। वैशिष्ट्या. द्विशेषयोगात्सहकारादितियावत्। तदभावेव्यञ्जनानुदयात्। एवंचवक्त्रादिवैशिष्ट्यहेतुकायान्यार्थधीः तद्धेतुव्यापारत्वमार्थीव्य. ञ्जनेतिफलितम्। यथा – 'गतोऽस्तमर्कः' इतिवाक्येन द्विजातौ वक्तरिप्रतिपाद्ये वा 'संह्रियन्तांगावो गृहंप्रतिनिवर्तामहे' इत्यादिका अर्थावक्त्रादिवैशिष्ट्याद्ध्वन्यन्ते। अथासंख्यभेदस्यापिध्वनेर्ध्व. निकारदिशाकेऽपिविशेषाः प्रदर्श्यन्ते। तथाहि द्विविधोध्वनिः

अभिधामूलो लक्षणामूलश्च, तत्राद्यस्त्रिविधोरसवस्त्वलंकारध्वनि-भेदात्। रसध्वनिरुदाहरिष्यते। वस्तुध्वनिर्यथागाथायाम्—

'पथिक, नात्रस्रस्तरमस्तिमनाक्प्रस्तरस्थलेग्रामे।
उन्नतपयोधरं प्रेक्ष्य यदिवससितद्वस॥

हे पथिक, अत्रास्मिन्प्रस्तरस्थले पाषाणबहुलेग्रामे, मनागल्प-मपि, स्रस्तरंकटादिकं नास्ति। उन्नतपयोधरंवाघुकमेघं, दृष्ट्वा-यदिवस्तुमिच्छसितद्वसेतिदूत्यभिप्रायः। अत्रमूर्खप्रायेग्रामे स्त्थरं-कामशास्त्रमीषदपिनास्तियद्युपभोगक्षमोऽसितदानिः शङ्कमास्वेति-वस्तु व्यज्यते।

अलंकारध्वनिर्यथा—नलचम्प्वां भट्टत्रिविक्रमस्य,
नलोऽपिमांप्रत्यनलोसि यत्तद्भवाद्दशांनैषध,नैषधर्मः।

मां दमयन्तींप्रति अनलोऽग्निरसिभवसिअसूभुर्वात्यनुशासनात्। भव द्दशांदयालूनाम्। स्पष्टमन्यत्। अत्रविरोधाभासालंकारोव्यज्यते। वस्तुत्वस्यव्केवलान्वयित्वादलंकारस्यवस्तुत्वेऽपि गोवलीवर्दन्यायेन वस्त्वलंकारयोर्भेदः। अलकायस्यापि ब्राह्मणश्रमणन्यायेनालंका-रत्वम्। इमौशब्दशक्तिमूलौ। अर्थशक्तिमूलस्तु द्वादशविधः काव्य-प्रकाशादौ कृतविचार इत्यलं पिष्टपिष्टया। द्वितीयश्च द्विविधः—अर्थान्तरसंक्रामितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च। आद्योयथा-ध्वन्यालोके—

'एवमेवजनस्तस्याददाति कपोलोपमायां शशिविम्बम्।
परमार्थतोविचारेपुनश्चन्द्रः चन्द्रएववराकः॥

एवमेवविनैवविचारम्, जनोलोकस्तस्याः कपोलौचन्द्रेणो-पमीमीते। परमार्थतोवस्तुतस्तुस्पष्टमन्यत्। अत्रमुख्यार्थतावच्छे-

दकं द्वितीयचन्द्रत्वं, लक्ष्यतावच्छेदकेक्षयित्वरूपेऽर्थेपरिणमति द्वितीयोयथाभगवद्गीतायाम्—'यानिशासर्वभूतानां तस्यां जागर्तिसंयमी । यस्यांजाग्रतिभूतानि सा निशा पश्यतो मुनेः॥ निशेतिच निशेर्वानिशा, आत्मनिष्ठा, संयमी तस्यां जागर्ति यस्यांतु विषयनिष्ठायां भूतानिजाग्रति सा आत्मतत्वं पश्यतोमुनेः निशा। अनेनहि वाक्यार्थेन न निशार्थोनवाजागरणार्थः कश्चिद्विवक्षितः किं तर्हि तत्वज्ञानानवहितत्वमतत्वपराङ्मुखत्वंच अधिकभेदादिकमस्मदीयगुरुवर--विद्यामार्तण्डसीतारामशास्त्रिचरणैः संकलिते साहित्योद्देशे द्रष्टव्यम् ॥११॥ सम्प्रतिरसध्वनिमुदाहर्तु रसध्वनेरात्मारसो निरूप्यते।

विभावेनानुभावेन व्यक्तः संचारिणा तथा।
रसतामेतिरत्यादिः स्थायीभावः सचेतसाम् ॥१२॥

नायकादि निष्ठोऽपिरत्यादिः ज्ञानसंबधेनसहृदयनिष्ठोरसोभवतीतिभावः। विभावादयश्चर्चिष्यन्ते। व्यक्तोव्य क्तविषयीकृतः व्यक्तिश्चभग्नावरणाचित् । यथाहिशरावादिनापिहितोदीपस्तन्निवृत्तौसंन्निहितान्पदार्थान्प्रकाशयते स्वयंचप्रकाशते। एवमयमात्मचैतन्यंविभावादिसंवलितान्रत्यादीन् । भगवान्भरतोप्याह—विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। अस्य सूत्रस्य चत्वारोव्याख्यातारः। तत्र मीमांसकरीत्याभट्टलोल्लटमतेस्थायिनां विभावेनोत्पाद्योत्पादकभावरूपादनुभावेन गम्यगमकभावरूपाद् व्यभिचारिणापोष्यपोषकभावरूपात्संबन्धान्मुख्ययावृत्त्या रामादावनुकार्येतद्रूपतानुसंधानाद्रसस्यनिष्पत्तिरुत्पत्तिः। परमत्र राम-

दावेवरसनिष्पत्त्या सहृदयेरसनिष्पत्त्यभावाच्चमत्कारानापत्तिरिति-दोषः । तार्किकरीत्या श्रीशंकुकमतेस्थायिनो विभावादिभिः संयोगादनुमाप्यानुमापकभावरूपात्संबन्धाद्रसस्य निष्पत्तिरनुमितिः । प्रत्यक्षमेवज्ञानंचमत्कारजनकं नानुमित्यादिकमितिलोकप्रसिद्ध्याऽत्रापिदोषः । प्रत्यक्षाकलितमेवपदार्थमनुमानेनबुभुत्सन्तेतर्करसिका इतित्वन्यदेतत् । सांख्यरीत्याभट्टनायकमते-विभावादिभिः संयोगाद्भोज्यभोजकभावरूपात्संबन्धाद्रसस्यनिष्पत्तिर्भुक्तिरिति । एतादृशव्यापारद्वयकल्पनेमानाभावोऽत्रापिदूषकः । साहित्यरीत्याऽभिनवगुप्तपादमतेविभावादिभिः सह व्यंग्यव्यञ्जकभावरूपात्संबन्धाद्रसस्यनिष्पत्तिरभिव्यक्तिः । अनवद्यमेतन्मतम् । एवं नानाजातीयाभिः शेमुषीभिर्नानारूपतयाऽवसितस्याभिधयानभिधेयस्य, लक्षणयापिचालक्षणीयस्य, परमानन्दाविनाभावितया केवलं व्यञ्जनयाप्रतीयमानस्यास्यरसस्यविकाशक्रमस्त्वेषः— भगवता भरतेन नाट्यशास्त्रेरसः पूर्णरूपेणनिरूपितः । भामहभट्टोद्भटाभ्यामस्यरसवदाद्यलंकारतया परिस्थितिः कृता । दण्डिनाऽसावंकुरितोऽपि न पल्लवितः । ध्वनिकारलोचनकाराभ्यामेतस्य प्राधान्यं प्रवर्तितं, मम्मटविश्वनाथजगन्नाथप्रभृतिभिरेषपरांकाष्ठामारोपितो विजयतेतराम् ॥१२॥ नन्वेषांविभावादीनां यथासंख्यंकारणकार्यसहकारित्वेकथंत्रयाणामेवरसोद्बोधेकारणतावच्छेदकत्वमितीत्युच्यते—

कार्यकारणसंचारिरूपा अपिहि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्येवतेमताः ॥१३॥

लोकतोलोके सार्वविभक्तिकस्तसिः। रसोद्बोधेरसव्यञ्जके कारणानीत्यस्यसमानलिङ्गकत्वाऽभावेऽपिसमानवचनकत्वं "प्रत्यक्षानुमानोपमानशब्दाःप्रमाणानीतिवत्। सामग्रीभेदेनतन्निष्ठकारणत्वस्यभेदाद्बहुवचनान्तता। 'वेदाः प्रमाणमित्यत्रतु विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वंविवक्षितं, तच्चप्रकृत्यर्थतावच्छेदकेप्रमितिकरणत्वेऽन्वेति। एवं 'इतिहेतुस्तदुद्भवे' इत्यत्र काव्यप्रकाशेपिद्रष्टव्यम् ॥१३॥ ननुयदिविभावानुभावव्यभिचारिणांमिलितानामेवरसनिष्पत्तिहेतुत्वंतदाकथंकारं तेषामेकस्यद्वयोर्वासद्भावेऽपिसरस्यादित्युच्यते—

सद्भावश्चेद् विभावादेर्द्वयोरेकस्यवा भवेत्।
झटित्यन्यसमाक्षेपेतदा दोषो न विद्यते ॥१४॥

समाक्षेपोऽध्याहारः सचप्रकरणादिवशात्। यथा—

'त्वन्मुखं यदि मुग्धाक्षि, वृथाचन्द्रमसः कथा।
त्वन्नेत्रेर्यदि रम्भोरु, शोच्यमम्भोरुहंवहु ॥'

अत्र नायिकामात्रविभाववर्णनेऽपि संचारिणामौत्सुक्यादीनामनुभावानां नेत्रविस्फारादीनामौचित्यादेवाक्षेप इतिसंक्षेपः ॥१४॥ सम्प्रतिरसंप्रमाणयति—

प्रमाणं चर्वणैवात्र स्वाभिन्नेविदुषांमतम्।

अत्रेतिरसपदशक्यतावच्छेदकत्वेनासिद्धेरसे, स्वाभिन्नेचर्वणातादात्म्येननिष्पन्ने, यथानीलोघटइत्यत्रनीलतादात्म्यंघटेभासते। नीलतादात्म्यवान्घटइतिबोधस्तथाप्रकृतेऽपिबोध्यम्। नच 'नीलो

घट' इत्यत्र विशेषणविभक्तिः किमर्थेतिवाच्यम्। तस्याः पदसाधुत्वार्थकत्वात्। अतएवचिन्तामणिकारादिभिरुक्तम्—"विशेषणविभक्तिः साधुत्वार्थाऽभेदार्थिकावेत्यलमप्रकृतेन। चर्वणैवभगवतीस्वसंवित्स्वस्वरूपादभिन्नेतस्मिन्प्रमाणमितिवृद्धाः। चर्वणा च काव्यार्थज्ञानजन्यः स्वादः सच परब्रह्मास्वादात्समाधेर्विलक्षणः। अथास्यां चर्वणायां सुखांशभानेकिंमानमितिचेत्, समाधावपितज्ज्ञानेकिं मानमितिपर्यनुयोगस्यतुल्यत्वात्, 'समाविप्रतिपत्तिः स्यादितिजैमिनिसूत्रात्। 'यत्रोभयोः समोदोषः परिहारोऽपितादृशः। नैकस्तत्रानुयोक्तव्यइतितन्त्रवार्तिकोक्तेश्च। "सुखमात्यन्तिकंयत्तद्बुद्धिग्राह्यमतीन्द्रियमित्यादिः शब्दोऽस्ति प्रमाणमितिचेदत्रत्यत्रापि—"रसोवैसः" "रसंह्येवायंलब्ध्वानन्दीभवतीत्यादिश्रुतिः प्रमाणम्। अथकेतेविभावादयइत्यपेक्षायां विभावमाह—

रत्या द्युद्बोधका लोके विभावाः काव्यनाट्ययोः ॥१५॥

येहिलोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्तएव काव्येनाट्ये चनिवेशिताः सन्तो विभावाः कथ्यन्ते।

आलम्बनोद्दीपनाख्यौ तस्यभेदावुभौ स्मृतौ।
आलम्बनं नायकादिस्तमालम्ब्यरसोद्गमात् ॥१६॥

तस्य विभावस्य, नायकादिरित्यादिपदेन नायिकादीनांग्रहणम्। भेदद्वयमिदमग्निपुराणेप्युक्तम्— "विभाव्यतेहिरत्यादिर्यत्रयेनविभाव्यते। विभावोनामसद्वेधाऽलम्बनोद्दीपनात्मकः॥ यमुद्दिश्यरत्यादिः प्रवर्ततेसआलम्बनम्। नायकनिष्ठेरसे नायिकालंबनं

नायिकानिष्ठेचतस्मिन्नायकइतिनविस्मर्तव्यम्। निमित्तंचोद्दीप तच्च चन्द्रिकोपवनगमनरमणीगानरहःस्थानादिकम् ॥१६॥

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥१७

आलम्बनोद्दीपनकारणैरुद्बुद्धंरत्यादिभावं,'रामोऽयंसीताविषयकरतिमान्' इत्येवंबहिरनुमापयन्यःखलुकार्यमितिनाम्नाव्यपदिश्यतेसोऽनुपश्चाद्भावोयस्येतिव्युत्पत्त्याकाव्यनाट्ययोरनुभावः॥१

विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्चतद्भिदाः ॥१८॥

स्थायिनिरत्यादौ, उन्मग्ना बुद्बुद्वत्, विद्युत्विद्योतवत् झटितिप्रतीताः। निर्मग्ना विलम्बप्रतीतिकत्वेनातिरोहितायेधम स्तेत्रयस्त्रिंशद्व्यभिचारिणःकथ्यन्तेरससहकारित्वात्॥१८॥तेचयथ

आलस्यं चैव दैन्यं च चिन्तामोहः स्मृतिधृतिः ।
निर्वेदग्लानिशङ्काख्या स्तथासूया मदश्रमाः ॥१९॥
व्रीड़ाचपलताहर्ष आवेगोजड़ता तथा ।
गर्वोविषाद औत्सुक्यं निद्रापस्मार एव च ॥२०॥
सुप्तंप्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिव्याध्युन्माद तर्कामरणंत्रास एव च ॥२१॥

एषुमरणं न प्राणवियोगात्मकंग्राह्यं चित्तवृत्यात्मकेषुभावे मुख्यमरणस्यासंभवात् । ननुमात्सर्यक्षमासंशयादीनामपिलक्ष

दर्शनात्कथमेतत्परिगणनंपर्याप्तमितिचेन्न। उक्तेष्वेषामन्तर्भाव-संभवात्। यत्त्वत्ररसगङ्गाधरकारो गुरुदेवनृपपुत्रादिविषयांरतिं-मेलयित्वाऽव्यभिचारिणांचतुस्त्रिंशत्संख्यामाह। तन्नयुक्तम्। मुनि-गणनाभङ्गप्रसङ्गात्। मम्मटादिभिर्देवादिविषयरतेर्भावत्वेनोत्की-र्तनाच्च ॥१६।२०।२१॥ अथरसभेदानाह—

शृङ्गार हास्य करुणरौद्रवीरभयानकाः॥
बीभत्साद्भुतशान्ताश्च काव्येनवरसाः स्मृताः॥२२॥

अत्रनवेति रसाइतिच द्वेऽपिपृथक्पदे। अन्यथासमाहार-समासे "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट इतिभाष्यकारेष्ट्या-त्रिलोकीतिवत् नवरसीत्यापत्तेः। कामस्य सकलजातिसुलभतया-ऽत्यन्तपरिचितत्वेनसर्वान्प्रतिहृद्यतेतिपूर्वं शृङ्गारस्य तदनुगामित्वा-द्धास्यादीनांपश्चान्निर्देशः। नचरतेः परमाह्लादजनकत्वेन रामा-दाविवसहृदयेऽपि सुखजनकत्वादस्तु शृङ्गारस्य रसत्वं, सीतादाव-गम्यात्वज्ञानोत्पादस्तु स्वात्मनिरामाद्यभेदबुद्ध्याप्रतिवध्यते। करु-णादीनांतु स्थायिनः शोकादेर्दुःखसंभिन्नत्वेनकथंरसत्वम्। नायक-इवसहृदयेऽपिदुःखजननस्यैवौचित्यात् इतिवाच्यं, शोकावच्छिन्नस्य चैतन्यानन्दस्याधिकत्वात्, शोकांशस्यन्यूनत्वात्। अतएवहिकरु-णादिरसप्रधानेषु रामायणादिप्रबन्धेषु रामलीलादिषु च सर्वेषां प्रवृत्तिर्दृश्यते। नचसत्यस्यैव शोकादेर्दुःखजनकत्वंप्रतिनियतं नपुनः कल्पितस्यापीतिनायकस्यैवनसहृदयस्यदुःखमितिशक्यमभि-धातुं रज्जुसर्पादीनामपिभयकम्पानुत्पादकत्व प्रसङ्गात्॥ २२॥

क्रमेणलक्षणोदाहरणान्येषामाह। तत्रशृङ्गारः—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
पुरुषप्रमदाभूमीरसः शृङ्गार इष्यते ॥२३॥

मन्मथोद्भेदः=कामोद्रेकः, सच यूनोः परस्परावलोकनचित्त-मिलनचुम्बनालिङ्गनादिसंकल्पाद्भवति । "नयनप्रीतिः प्रथमंचित्तासङ्गस्ततोथसंकल्पइत्यादिरतिरहस्योक्तेः । यथा ममच्छायापद्ये-

'शून्यंकुञ्जगृहं दृष्ट्वा पत्युः सुप्तस्य छद्मना ।
चुम्बमाना मुखं राधा स्मित्वा कृष्णेन चुम्बिता ॥

शून्यं सख्यादिरहितम् । अनेन चुम्बनप्रवृत्तियोग्यताध्वन्यते । "मुखनेत्रस्तनबाहुमूलकपोलौष्ठद्वयवराङ्गान्यष्टौ चुम्बनस्थानानिरागतः सर्वाण्यपीतिकामशास्त्रम् । रागहेतुकोऽधरकरणकः संयोगानुकूलोव्यापारश्चुम्बनपदार्थः । स्मित्वा=स्मितंकृत्वा, स्मितंचोत्तमानांहासोविशेषोनाट्यशास्त्रेद्रष्टव्यः । अत्र भगवान्कृष्णआलम्बनम् । शून्यंलतागृहमुद्दीपनम् । चुम्बनमनुभावः हासः सञ्चारी, रतिःस्थायीभावः तज्ज्ञसामाजिकेशृङ्गाररसव्यक्तिरेवमग्रेऽपि । एष द्विविधः संभोगो विप्रलम्भश्च, संयुक्ताभ्यांस्त्रीपुरुषाभ्यांभुज्यत इतिसंभोगः । वियुक्ताभ्यां प्रलभ्यत आत्मात्रेतिविप्रलम्भः । रतेः संयोगकालावच्छिन्नत्वेप्रथमः । वियोगकालावच्छिन्नत्वेद्वितीयः । संभोगश्चानुपदमुदाहृतोविप्रलम्भोयथाममसुलतानचरितकाव्ये—

'अभिनय नयने निमीलिताक्ष, कृतकसमाधिरयं तवप्रतीतः ।
अलमलघुतयाऽद्यमामनङ्गज्वरदवधुं स्ववधूं कुरुष्व कण्ठे ॥

अभिनयोद्घाटय, कृतकसमाधिः छलघटितसमाधिः, अलघुतया विलम्बेनालं, विलम्बोनकर्तव्यः, गम्यमानापिक्रियाकारकवि-

भक्तौप्रयोजिकेतितृतीया।यद्यपि स्त्रियोविलासैरेवानुरागंप्रकटयन्ति नतुकण्ठतस्तथाप्यतिकामातुरत्वादेवमुक्तिः। एषोऽभिलाषहेतुको विरहहेतुकोवा/नचयमकालंकारघटितत्वेनतवेदंपद्यंनास्योदाहरणं भवितुमीष्टे "ध्वन्यात्मभूतेश्शृङ्गारे यमकादिनिवन्धनम्। शक्तावपि प्रमादित्वं विप्रलम्भेविशेषतः॥ इतिकाव्यपुरुषावतारध्वनिकारवच नादितिवाच्यम्। एतादृशरचनायाः सहृदयहृदयानुद्वेजकत्वेनरस- पोषकत्वेनचत्यागानर्हत्वात्। अस्याशेषविशेषाः प्रकाशादिभ्योऽवग न्तव्याइत्यलंचूर्णचूर्णनेन।शृङ्गाररसो वारणादिप्रयोगे प्रकृष्यतीति- साहित्यकौमुदीकारः। युक्तं चैतत्—यदाहभरतोऽपि—"नहुकार्य- तेयतः खलु यत्र प्रच्छन्नकामुकत्वंच। याचमिथोदुर्लभतासापरमा- मन्मथस्यरतिः॥ यथा--'पश्येत्कश्चिच्चलचपलरेकात्वराऽहंकुमारी। हस्तालम्बंवितरहहहाव्युत्क्रमः कासियासीत्यदौ॥२३॥ अथहास्यः-

हास्योहासस्थायिभावः श्वेतः प्रमथदैवतः।

मुखविकाशोहासः। श्वेतः श्वेतवर्णः, "मालिन्यं व्योम्निपा- पेयशसि धवलता गीयतेहासकीर्त्योरितिकविसम्प्रदायात्। यथा- लंकारशेखरे—

'नपुंसकमितिज्ञात्वा प्रियायै प्रेषितंमनः।
तच्चतत्रैव रमते हताः पाणिनिना वयम्॥

नस्त्रीपुमानितिनपुंसकं स्त्रीपुंसयोः पुंसकभावोनिपातनादि- तिकौमुदीकारः। "स्तनकेशवतीस्त्रीस्याल्लोमशः पुरुषः स्मृतः। उभयोरन्तरं यच्च तदभावेनपुंसकम्॥ इतिहिभाष्योक्तं लौकिकं स्त्रीपुंसयोर्लिङ्गम्। उभयोः सदृशंनपुंसकम्। परमेतल्लक्षणं सर्वत्र-

नोपयुज्यतेऽचेतनेखट्वामालादौवाधात्स्त्रीप्रत्ययानापत्तेः। अत-इयमर्यामदर्मितव्यवहारविषयत्वं स्त्रीपुंनपुंसकत्वंबोध्यम्। तत्र मनश्च तत्रैवप्रियायां, रमते वर्तमानसामीप्येभूतेलट् अरंस्तेत्यर्थः। स्पष्टमन्यत्। अत्रमन आलम्बनं भगवत्पाणिनिकृत लिङ्गानुशा-सनद्वारा तन्नपुंसकत्वज्ञापनमुद्दीपनम्। रमतावेगावनुभावव्यभि-चारिणौ। यथावा—

'किंचक्रे कालिदासेन मागधी येन वर्णिता।
किंचक्रेभारविर्येन मातरिश्वा नियोजितः॥

उभयत्र किंचक्रेकथयतेतिप्रश्नकाकुरुपहासार्था। निन्दितमेव-तौचक्रतुरित्यर्थः। चक्रइतिकर्मणिकर्तरिचपरोक्षेलिट्। परोक्षत्वं-च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वं, तेनचक्रे सुबन्धुरित्यादिकमसाध्वेवेतिभूषणकारः। बोपदेवस्तुमुग्धबोधेलिटः-परोक्षार्थत्वंनाद्रियतेतन्नयुक्तमपाणिनीयत्वात्। नचात्र क्रियाद्वये-पुनरुक्तिरितिवाच्यम्। तस्योद्देश्यप्रतिनिर्देश्यभिन्नविषयत्वात्। अत्रमागधीत्यस्य प्रथमोऽर्थः सुदक्षिणा द्वितीयस्तुहास्यव्यञ्जकः। एवंमातरिश्वेत्यत्रापिबोध्यम्। अथकरुणः—

इष्टनाशादनिष्टाप्तेः करुणाख्योरसो भवेत्॥२४॥

अनिष्टमिष्टान्यत्वं नञ्सूत्रभाष्येतथैवसिद्धान्तितत्वात्। तार्किकास्तुसर्वत्रात्यन्ताभावमेवनञर्थमाहुः। करुणाख्यः करुणपदवाच्यो यथाममदुर्गाभ्युदये—'प्रसूनास्तीर्णतल्पेयोऽशेतानल्पेऽसुरेश्वरः। क्षितौशेतेस कीर्णोऽयं विवर्णोधूलिधूसरः॥ प्रसूनंपुष्पम्। अनल्पे-महति। कीर्णःप्रक्षिप्तः। स्पष्टमन्यत्। अत्रमृतशुंभासुरआलम्बनम्।

तत्कालावच्छिन्नदर्शनादिकमुद्दीपनम्। रोदनमनुभावो दैन्यादयः संचारिणः। यथावाममैव—

'सुशीलसोमदत्ताख्यौ हा सुतौ विनयान्वितौ।
किमतोदुःखबाहुल्यं पश्यतो मे दिवंगतौ॥ अथरौद्रः—

रौद्रः क्रोधस्थायिभावोरक्तोरुद्राधिदैवतः।

क्रोधः प्ररूढकोपः। नह्यकुपितः क्रुध्यतीतिभाष्योक्तेः। रुद्रः शिवः। स च चेतनोऽपिर्जीवाद्भिन्नः। माण्डूक्यादौ "एषसर्वज्ञः, एषसर्वेश्वर" इत्यादिना तस्य जीवकोटिप्रवेशनिरासात्। "शिव-एकोध्येय" इत्यादिश्रुत्याध्येयत्वोक्तेश्च। नच देवीभागवते रुद्रस्य ब्रह्मपुत्रत्वं, महाभारतेशिवएवभगवानित्युपक्रम्य।

"सोऽसृजद्दक्षिणादङ्गाद्ब्रह्माणंलोकसंभवम्।
वामपार्श्वात्तथाविष्णुं लोकरक्षार्थमद्भुतम्।
युगान्तेचैवसम्प्राप्तेरुद्रं प्रभुरथासृजत्॥

इत्यादिना शिवस्य ब्रह्मविष्णुरुद्रजनकत्वमुक्तम्। महोपनिषदि-रुद्रस्यविष्णुपुत्रत्वमुक्तमितिपरस्परंविरोधइतिवाच्यम्। महाभाग्या-द्देवताया एकआत्मा बहुधा स्तूयते इतरेतरजन्मानोभवन्ति कर्म-जन्मान इतिनिरुक्तसमाधानात्। अतएवपृथ्वीगौर्भूत्वाब्रह्माणम-याचतेतिभागवतोक्तं, अग्निर्ब्राह्मणोभूत्वा खाण्डवमयाचतेति भारतोक्तं च संगच्छते। उदाहरणं यथादुर्गापाठे—

'गर्जगर्जक्षणंमूढ, मधुयावत्पिवाम्यहम्।
मयात्वयिहतेऽत्रैव गर्जिष्यन्त्याशुदेवताः॥

गर्जगर्जेतिक्रोधेद्विरुक्तिः। मधुमाक्षिकं नतुमदिरा, तस्य

अपवित्रत्वेन परमपवित्राया भगवत्यास्तत्पानकर्तृत्वासम्भवात् नचयुद्धोपयोगित्वात्सैवात्रविवक्षितेतिवाच्यम् । "आसिञ्जठरे ध्वजमिमितिमन्त्रेमाक्षिकस्यापियुद्धोपयोगित्वश्रवणात् । अपवि- त्वंचतस्याभगवान्भाष्यकृदाह-"योह्यजानन्नपि ब्राह्मणंहन्यात्सुरां पिवेत्सोऽपिमन्येपतितः स्यादित्यादिना । एवं नमांसमश्नीयादि श्रुतिनिषेधात् मांसविषयेऽपिवोध्यम् । "पशुपुष्पार्घधूपैश्चे दुर्गापाठस्यत्वयमाशयः । गवादिपशुं देवीनिमित्तं कुर्यात् । अ एवदेवनिमित्तंत्यक्ता देवीगौर्देवीमहिषोऽयमितिप्रसिद्धिः । मय देव्या, त्वयिमहिषासुरे, युष्मदः स्वसंवोध्येऽस्मदः स्वोच्चारयितृ शक्तौ मयात्वयीत्यादिवाक्याद्देवीकर्तृकमहिषासुरकर्मकघातानु पत्तिः । तत्र देव्युच्चरितत्वस्यमहिषासुरादिसंवोध्यत्वस्यचाभावात् ऋष्यादेस्तादृशवाक्यप्रयोक्तृत्वात्सुरथादेस्तत्संवोध्यत्वादिति सामान्यप्रत्यासत्त्या देव्यादिवाक्यस्यापिज्ञानात् । इयंहिमहिषा प्रतिभगवत्या उक्तिः । अत्रमहिषासुरआलम्वनम् । तच्छत्रो नमुद्दीपनम् । वधादिफलक प्रतिज्ञानुभावः । अन्यनैरपेक्ष्यग गर्वोव्यभिचारी । अथवीरः—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ॥२५॥

उत्साहोहिपरपराक्रमादिस्मरणजन्य उन्नतिजनकश्चित्तवृ विशेषः । उत्साहप्रधानोगूढगर्वो वीररसध्वनिरित्यभिसन्धि उदाहरणंप्रसन्नराघवे—

'हत्वाकथंचिदपराजकुमारमत्तम्,
नेवानरापसद, क्व [illegible]ऽसि ।

त्वांहन्तुमिच्छतिदशाननशासनेन,
दर्पोद्धतोधृतधनुर्ननुमेघनादः ॥

अक्षं अक्षयकुमारम्। नामैकदेशेसर्वनामग्रहणात्। मेघनादस्योक्तिरियम। अत्रहनूमानालम्बनम्। दशासनशासनमुद्दीपनम्। सर्वत्रोपेक्षानुभावोगर्वोव्यभिचारी। अयं वीररसश्चतुर्विधः। दानदयायुद्धधर्मैस्तदुपाधेश्चतुर्विधत्वात्। तत्रदानवीरोभोजसेठसूरजमल्लबिड़लागोयनकाभामाशाहादिः। तत्प्रशंसापद्यानिमयाकृतानि प्रसङ्गाल्लिख्यन्ते।

अपूर्वकविताकर्त्रे लक्षंप्रत्यक्षरंददौ।
कविकल्पतरुर्भोजः प्रशस्यः कस्यनाभवत् ॥

कविकल्पतरुः कविजनाश्रयः। "नृपस्तु विबुधाश्रयः कतिनसन्तिकुक्षिम्भरा" इत्युक्तेः। "सालक्ष्मीरुपकुरुतेययाकवीनामितिभारव्युक्तेश्च।

परेषामिति प्रसिद्धः पाठः।

ससूर्यमल्लोधर्मात्मा दानवीरेषुसंमतः।
हरद्वारादि—तीर्थेषु धर्मशालाशतंयतः ॥
स जयति युगलकिशोरो बिड़लामन्दिरविधानाद्यः।
देहल्यादि स्थाने लक्ष्मीसाफल्यमातेने ॥

मन्दिरादिव्ययेलक्ष्मीसाफल्यंश्रुतिस्मृतिपुराणप्रमाणसिद्धम्।

स गौरीशंकरोधन्यो येन दिल्लीमहामखे।
सार्धद्विलक्षरूप्याणां सौवर्णीदक्षिणाददे ॥ णि

अयं शतमुखकोटिहोमात्मकोमहायज्ञः दिल्लीस्थनिगमबोधनाम्नियमुनातटे ममप्रधानद्रष्टृत्वे विक्रमीय द्विसहस्रमितेसंवत्सरेजातः।

यत्राग्निप्रक्षेपाङ्गकोदेवतोद्देशपूर्वकोमहान्द्रव्यत्यागोऽनुष्ठीयते स महायज्ञपदार्थ इतिभाट्टदीपिकायाम । सौवर्णी–सुवर्णविकारभूता अनुदात्तादेश्चेत्यञ्टिड्ढेति ङीप् । गिन्नीतिभाषायाम । दक्षिणा दक्षतेःसमर्द्धयतिकर्मणइतिनिरुक्तकारः । यज्ञे दक्षिणायाएवप्राधान्यं "हतोयज्ञस्त्वदक्षिण इत्यभियुक्तोक्तेः । अधिकमस्मत्प्रियवेणीरामस्ययज्ञमीमांसायां, उदाहरणमस्मन्मित्रमथुराप्रसाददीक्षितस्यवीरप्रतापनाटके—

'अम्लायावलिनालताहरिपदेसत्येयुगेस्वाध्वरे
सिक्तासा शिविना दयासलिलतः त्रेतायुगस्यान्तरे ।
कर्णः पल्लवितां विधातुमभवच्छक्तश्चतांद्वापरे
सेयं साध्वमृतैः कलौ फलवतीमाम्नात्वयासाध्यते ॥

इयंभामाशाहं प्रति प्रतापस्योक्तिः । अमृतैरयाचितद्रव्यैः स्पष्टमन्यत् । दयावीरो हिन्दुजातिः । यथामम—

'अकिञ्चनस्यगोमातृधनस्य वंशावारणे ।
प्राणा अपि तृणानीव दातव्या हिन्दुबन्धुभिः ॥

अकिञ्चनस्य किमपिकर्तुं वक्तुंचाशक्नुवतोगोधनस्य । न गच्छतीतिगौरिति व्युत्पत्तिर्महिष्यादावतिप्रसक्तागमनकर्तृत्वम् महिष्यादिसाधारणत्वादितिवाच्यम्, शक्यतावच्छेदकगोत्वस्य महिष्यादावसत्वेनातिप्रसङ्गाभावात् । नच गोत्वस्य वृषभादिसाधारणस्यातिप्रसक्ततया शक्तौनावच्छेदकत्वसंभवइतिवाच्यम् तस्यातिप्रसक्तत्वेपि शक्यत्वोपगमेक्षतिविरहादित्यलमप्रकृतेन तृणानीत्युपमाननिष्ठभिन्नलिङ्गतानदूषणमनुद्वेजकत्वात् । अत्रा

आलम्बनम्। प्रतिदिनमघिपुण्यभारतं लक्षगवांवध उद्दीपनम्। तद्वारणप्रतिज्ञानुभावः प्राणनैरपेक्ष्यगम्यगर्वो व्यभिचारी। युद्धवीरः पृथ्वीराज शिवराजप्रतापादिः। यथोक्तं मयका—

पृथ्वीशिवप्रतापाद्या जित्वागौर्यादिभूपतीन्।
म्लेच्छाक्रान्ते महीलोके हिन्दुधर्ममरक्षिषुः॥

म्लेच्छायवनाः। हीनं दूषयन्तीतिहिन्दवः। तेषांधर्मः सनातनधर्मः। "सनातनमेनमाहुरित्यथर्वश्रुतेः सनातनत्वमत्यन्ताभावाप्रतियोगित्वम्। न सर्वकालावच्छिन्नग्राह्यत्वयोग्यत्वंव्यभिचारात्। सचधर्मोऽनेकविधः अहिंसासत्यमस्तेयंशौचमिन्द्रियनिग्रहः। दानं दयादमःशान्तिः सर्वेषांधर्मसाधनम्॥ इतियाज्ञवल्क्यस्मृतेः। युद्धवीरः श्रीरामविक्रमादिः। युद्धवीरस्योदाहरणं वीररसस्योदाहरणमेव। यथावाममम—

'किमहंवर्णयेवीर्यं' रामविक्रमयोस्तयोः।
याभ्यांजितौमहावीरौ लंकेश्वरशकेश्वरौ॥

धर्मवीरोयुधिष्ठिरादिर्यथोक्तंव्यासपादैः 'धर्मएव हतोहन्ति धर्मोरक्षतिरक्षितः। निदर्शनं तयोः साक्षाद्दुर्योधनयुधिष्ठिरौ॥ मयाचाप्युक्तम्—"हकीकतश्चपूर्णश्चगुरुगोविन्दपुत्रकौ। स्वधर्मपरिरक्षायैतृणवद्देहमत्यजन्॥ हकीकतो हकीकतरायः। पूर्णः पूर्णभक्तः। पुत्रकावित्यल्पार्थेकन्। स्वधर्मपरिक्षायैहिन्दुधर्मं रक्षयितुम्। उदाहरणं ममैव—"नास्था योगे नचवसुचयेरम्यरामोपभोगे, यद्यद्भाव्यंभवतु सकलं तत्स्वकर्मानुसारम्। एतत्प्राथ्यं ममतु विबुधानोमुधा वच्मिकिंचित्, धर्मेश्रद्धाप्रसरतु सदा निश्चलानिश्छलामे॥ नास्थानचित्तवृत्तिर्नचकथमास्थाक्तिन्प्राप्तेरितिवाच्यम्। व्यवस्थायाः

र्मितिज्ञापकादितिकौमुदीकारः। 'योगश्चित्तवृत्तिनिरोधस्तथवयोग-सूत्रात्। धर्मश्च–यतोऽभ्युदयनिःश्रेयससिद्धिः सधर्मः,इतिकणा-दसूत्रितोह्येवसर्वसम्मतः। अयमेवसनातनधर्म इति वैदिकधर्म-इतिचगीयते। यत्रेदमुच्यतेऽस्माभिः—

जयतुसनातनधर्मोहिन्दूजातीयजीवजीवातुः।
यद्रक्षायै वारंवारं जन्माग्रहीदीशः॥

'त्रयोधर्मस्कन्धा यज्ञोऽध्ययनंदानऋचोतश्रुतिडिण्डिमः। 'स्व-धर्मेनिधनंश्रेयःपरधर्मोभयावह इतिभगवद्गीतोक्तेः। स्वधर्मःकदा-पिनोहेयःपरधर्मश्चनग्राह्यः। श्रद्धाविश्वासः। निश्चलादृढा निश्छला छद्मरहिता, वस्तुतस्तुवीरस्यवहवोभेदा अतएव पाण्डित्यवीरस्वा-तन्त्र्यवीरादयोऽपिभवन्ति। तत्रपाण्डित्यवीरोयथामम—'मयिकु-र्वतिशास्त्रार्थं चार्वाकस्तुभवत्यवाक्। जैनःश्रयतिमौनत्वं समाजः समजस्तथा॥ चारुलोकसम्मतंवक्तीतिचार्वाकः प्रसिद्धनास्तिकः। यन्मते "अङ्गनालिङ्गनाजन्यं सुखमेवपुमर्थता। लोकसिद्धोभवेद्रा-जापरेशोनापरःस्मृतः॥ इत्यादि। जैनोपिप्रसिद्धनास्तिकः। समाज-आर्यसमाजः। समजः पशुसंघइतिकौमुदीकारः। तद्वद्भवतीत्यर्थः। अथवेदमेवपद्यंभगवत्पादविषयएवंपरिवर्तनीयम्। 'अखर्वगर्व-हारकेश्रुतिस्मृतिप्रचारके, अनल्पकल्पनावतिप्रजल्पतीहशंकरे। वृहस्पतिर्नजल्पतिप्रसर्पतीवसर्पराट् असम्मुखश्चषण्मुखः चतुर्मुख-श्चदुर्मुखः॥ शंकरेभगवत्पादशंकराचार्ये, स्पष्टमन्यत्। अत्रचार्वा-कादिरालम्बनम्। सभादर्शनमुद्दीपनम्। सर्वाविद्वत्तिरस्कारोऽनु-भावोगर्वोऽयभिारी॥ एवमग्रिमेऽपिवोध्यम्॥ स्वातन्त्र्यवीरः

प्रतापतिलकगान्धिजवाहरादिः । तत्रप्रतापविषयेऽस्मन्मित्रमथुराप्रसाददीक्षितस्य वीरप्रतापनाटके—

"यावन्मे धमनीमुखेषु रुधिरक्लेदोऽपिसंतिष्ठते ,
मांसंवाऽस्थनितिष्ठतिक्वचिदपिप्राणाः शरीरेस्थिताः ।
तावन्म्लेच्छपतेः कथंचिदपिन प्राप्स्याम्यहंनिघ्नताम्
स्वातन्त्र्यस्यपदे समस्तवसुधांनेतुंयतिष्येभृशम् ॥

मेममप्रतापस्य, म्लेच्छपतेरकब्बरस्य, निघ्नतामधीनताम् । स्पष्टमन्यत । अत्राकब्बरादिरालम्बनम् । तत्कर्तृकस्वबन्धनेच्छादिरुद्दीपनम् । भूमिस्पर्शपुरःसरं प्रतिज्ञानुभावः । तदधीनत्वास्वीकार गर्वोव्यभिचारी । तिलकादिविषयेयथाममैव—

'सुखंच वसु देहश्च सर्वं ममसमर्पितम् ।
भारतस्यास्तु देशस्याधिकार परिरक्षणे ॥

भारतदेशशब्दोऽत्रलाक्षणिकः । भारतीयजनतायाइति तदर्थः । अत्र भारतजनतालंबनंतद्दैन्यदर्शनमुद्दीपनम् । स्वातन्त्र्यग्रहणेप्रतिज्ञानुभावः । सुखादित्यागरूपोगर्वो व्यभिचारी । समेषामेषामुद्देश्यतावच्छेदकं स्वराज्यप्राप्तित्वमेकमेवेत्येकमेवोदाहृतम् ॥ २५ ॥

अथभयानकः—

भयानकोभयस्थायिभावः कालाधिदैवतः ।

मनसो वैक्लव्यं भयम् । कालोयमः । यथारसगङ्गाधरे—

"श्येनमायान्तमालोक्यनभस्तः स्रस्तलोचनः ।
कम्पमानसमस्ताङ्गः पस्पन्दे नहि शावकः ॥

शावकः कपोतशिशुः श्येनं बाजपक्षिणम् , नभस्तोनभसः

पञ्चम्यास्तसिल् आयान्तमालोक्य नपस्पन्द-किंचिदपि न चचाल। स्पन्दिरकर्मकः। तस्यकेवलव्यापारेशक्तिः। फलस्यधात्वर्थतानवच्छेदकत्वात्। सकर्मकाणान्तु फलावच्छिन्नव्यापारेशक्तिः। ज्ञादिधात्वर्थभूतंज्ञानादिकेचित्फलत्वेनकेचिद्व्यापारत्वेनव्यवहरन्ति। मीमांसकमते-धातूनांफलमात्रेशक्तिर्व्यापारस्तुतिङ् वोध्य इतिदिक्। अत्रश्येन आलम्वनम्। सवेगापतनमुद्दीपनम्। नेत्रसस्तत्वादयोऽनुभावाः। दैन्यादयः संचारिणः। अथवीभत्सः—

जुगुप्सास्थायिभावस्तुवीभत्सः कथ्यतेरसः ॥२६॥

जुगुप्सा घृणा, साचाहृद्यवस्त्वनुभवाच्चित्तमुद्रणम्। यथातत्रैव-

'नखैर्विदारितान्त्राणांशवानांपूयशोणितम्।
आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः॥

वेतालयोषितः प्रेताङ्गनाः, पूयशोणितं दुर्गन्धरक्तमन्यत्सुगतम्। शवाइहालम्वनम्। आन्त्रविदारणाद्युद्दीपनम्। रोमाञ्चादयोऽनुभावाः, आवेगादयः संचारिणः ॥२६॥ अथाद्भुतः—

अद्भुतो विस्मयस्थायिभावोगन्धर्वदैवतः।

विस्मयोलोकोत्तरवस्तुदर्शनजन्माविकाशः। यथाममदुर्गाभ्युदये—

अहोरूप महोधाम अहोचास्यानवंवयः।
नूनंह्यदृष्टपूर्वेयं देवैरथचदानवैः॥
वल्गुना केशभारेण मुखचन्द्रेणभास्वता।
मृदुना पाणिपादेन मोहयन्ती जगन्मनः॥

अहो आश्चर्यजनकं जगद्विलक्षणमितियावत्, रूपंधामप्रतापः वल्गुनामनोहरेण, भास्वतादेदीप्यमानेन, पाणयोः पादयोश्च

समाहारे—"द्वन्द्वश्चप्राणितूर्येतिसूत्रेणैकवत्वं, सनपुंसकमितिनपुंसकत्वंच, नात्रभावोवक्तुरधमत्वात। अत्रभगवत्यालम्बनम्। तत्कान्तिरुद्दीपनम्। तद्वर्णनमनुभावोहर्षोव्यभिचारी। अथशान्तः—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥२७॥

शमोनिर्वेदः, सचतत्वज्ञानादिजन्मा विषयवैराग्यम्। यथामम—

'शत्रौमित्रेमुनौ म्लेच्छे लोष्ठे रत्ने गृहे वने।
दुःखे सुखे तृणे स्त्रैणे समदृष्टि मनोमम॥

समदृष्टौ शरदिसरिदिवचित्तंप्रसीदति। प्रसन्नचेतसोह्याशुबुद्धिः पर्यवतिष्ठते, परिस्थितबुद्धिः परमात्मानंपश्यतीतिभावः। तत्र मुनौ=योगसूत्रोक्ताऽहिंसासत्यास्तेय ब्रह्मचर्यापरिग्रहशौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानात्मकयमनियमशालिमहात्मनि। म्लेच्छेगवादिमक्षियवनादौ, 'नम्लेच्छोयवनात्परइतिस्मरणात्। लोष्ठे लोहे, तृज्वत्सूत्रभाष्ये लुशेर्लोष्ठं लोहइत्युक्तेः। स्त्रैणे=स्त्रीसमूहे स्त्रीपुंसाभ्यांनञ्स्नञौ, स्पष्टमन्यत। अत्र प्रपञ्चः सर्वोप्यालम्बनं, तत्वज्ञानजन्यं सर्वत्रसाम्यमनुभावः। मत्यादयः संचारिणः। केचिदत्र—"शान्तस्यशमसाध्यत्वान्नटेचतदसंभवात्। अष्टावेव रसानाट्ये न शान्तस्तत्रयुज्यते॥ इत्याहुः। तदसत्, नटेरसाभिव्यक्तेरस्वीकारात्। सामाजिकानां शमवत्त्वेनतत्ररसोद्बोधेवाधकाभावात् अतएव संगीतरत्नाकरे—"अष्टावेवरसानाट्येष्विांतकेचिदचूचुदन्, तदचारुयतः कंचिन्नरसंस्वदतेनटः॥ इत्यादिना नाट्येऽपिशान्तोरसोऽस्तीतिव्यवस्थापितम्। ध्वन्यालोकलोचनेचापि "नास्त्येवशान्तोरसः इतिपूर्वपक्षीकृत्यावसाने मोक्षफलत्वेनास्य परमपुरुषार्थनिष्ठत्वात्सर्वरसेभ्यः प्रधानत्वमितिसिद्धान्तितम्। एवमेवरसतर-

ङ्गिण्यां निरूपितम्। अतएव च प्रबोधचन्द्रोदयादीनांनाट्य स्वीक्रियतेसर्वैरितिसमं समंजसम्। स्नेहोवात्सल्यंमैत्र्यानन्द तुरतेरेवविशेषा न रसाः। तत्रायंविवेकः—'तुल्ययोरतिः स्नेह तयोरेवनिष्कामरतिर्मैत्री। अवरस्य वरेरतिर्भक्तिः। सैव वि रीतावात्सल्यम्। सचेतननामचेतनेरतिराबन्धः। दशरूपकका स्त्वाह—"प्रीतिभक्त्यादयोभावा मृगयाक्षादयोरसाः। हर्षोत्सा दिषुस्पष्टमन्तर्भावान्नकीर्तिताः॥ भगवान्व्यासस्तु-एषु सख्यभक्त्या दिकंमेलयित्वा "मल्लानामशनिरित्यादिप्रसिद्धपद्ये द्वादशरसान् र्शयत्। यत्तु भोजः शृङ्गारप्रकाशनाम्निग्रन्थेशृङ्गारमेकमेवरसं चकार तन्नविचारचारु, अनुभवसिद्धस्य प्रसिद्धस्य चापलापानर्ह मितिन्यायात्सर्वेषामेषामनुभवसिद्धत्वान्मुनिसम्मतत्वाच्च। 'नासूत्र तत्रकर्तव्या यत्रानुगम आचार्येणक्रियतइतिपंक्तिविंशतिसूत्रभाष्ये क्तेमुनिवचनपालनसंभवे उच्छृङ्खलताया अनौचित्यात्। एते रसानां परस्परं कैरपिसहाविरोधः कैरपिचविरोधः। तत्र वी शृङ्गारयोः शृङ्गारहास्ययोः वीराद्भुतयोश्चाविरोधः। शृङ्गार भत्सयोः शृङ्गारकरुणयोः वीरभयानकयोः शान्तरौद्रयोः शान्त शृङ्गारयोश्चविरोधः। कमपिरसंपरिपोष्टुकामेन कविना विरु रसानां निबन्धनंनकार्यम्। "प्रत्यनीकौरसौ क्रौद्धौ तत्संपर्कंविवर्ज येत्। इतिन्यायात्। किंचोत्कर्षाधानाय एकएव रसोऽङ्गीकर्तव्य यदुक्तं ध्वनिकृता—"प्रसिद्धेऽपिनिबन्धानां नानारस निबन्धने एकोरसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता॥ अङ्गीप्रधानोयथानैषधे शाकुन्तलेचशृङ्गारः। माघेदुर्गाभ्युदयेचवीरः। रामायणेउत्तरचरिते चकरुणः। भारतेप्रबोधचन्द्रोदयेचशान्त एवमन्यत्र। एषांरसानां

प्राधान्येध्वनिव्यपदेशहेतुत्वम्। गुणीभावेतुरसालङ्कारत्वमिति। भिन्नोरसाद्यलंकारादलंकार्यतयास्थित इति मम्मटादिसिद्धान्तात्। अत्रेदमवशिष्यतेऽवश्यज्ञातव्यम्-एतयानवरस्याजनिताःतिस्रोऽवस्थाभवन्ति। द्रुतिर्विस्तारोविकाशश्च। शृङ्गारकरुणशान्तेभ्यः चित्तस्यद्रुतिः। वीररौद्रवीभत्सेभ्योविस्तारः। हास्याद्भुतभयानकेभ्यो विकाशइति ॥ २७ ॥ स्थायिभावभेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौभयंतथा।
जुगुप्साविस्मयश्चैवमष्टौप्रोक्ताः शमोऽपिच ॥२८॥

मालतीमाधवेरतिः। लटकमेलकेहासः। उत्तररामचरिते-शोकः। मुद्राराक्षसेक्रोधः। वेणीसंहारे दुर्गाभ्युदयेचोत्साहः। शाकुन्तलपञ्चमांकेभयम्। मालत्यांश्मशानेजुगुप्सा। उत्तरचरितसप्तमांकेविस्मयः। नागानन्देशमइति। अत्रेदमपिबोध्यम् "बहूनां समवेतानांरूपंयस्यभवेद्बहु। समन्तव्योरसस्थायी शेषाः सञ्चारिणो मताः॥ तथाहिहासःशृङ्गारेरतिः शान्तेचदृश्यते। क्रोधोवीरेभयंशोको जुगुप्साचभयानके॥ उत्साहविस्मयौसर्वरसेषुव्यभिचारिणः॥

स्थायिलक्षणमुक्तंदशरूपके—"विरुद्धैरविरुद्धैर्वाभावैर्विच्छिद्यते न यः। आत्मभावंनयत्यन्यान्स्थायीभावःसउच्यते॥ स्थायित्वं वासनात्मतया यावद्रसंवर्तमानत्वम्। तत्र—"रतिर्भवतिदेवादौ-मुनौपुत्रेनृपे गुरौ। शृङ्गारस्तुभवेत्सैव या कान्ताविषया रतिः॥ कान्ताविषयारतिर्विषयानन्दः। तंचानन्दमनङ्गरङ्गरतिरहस्यकारादयः परमात्मपरमानन्देनतुल्यमाहुः। केचिल्लोकानन्दोत्फुल्ललोचना एवमालोचयन्ति— रत्यानन्दोमहानेव परात्मानन्दतोऽपियत्। सुखैकः परमात्मा रतिर्हासुविनाकुतौ ॥२६॥

रसभावौतदाभासौभावस्यप्रशमोदयौ ।
सन्धिः शबलताचेतिसर्वेऽपिरसनाद्रसाः ॥२६॥
शृङ्गारादीरसः प्रोक्ता देवादिविषयारतिः ।
भावस्तयोरनौचित्यादाभासौपरिकीर्तितौ ॥३०॥

तयोरसभावयोरनौचित्याद्रसाभासोभावाभासश्चभवतः। अनौचित्यन्तुसहृदयव्यवहारतोज्ञ`यम्। यत्रतेषामनुचितवीः। तत्र शृङ्गारस्य परपुरुषगतत्वेनस्त्रियाः, परस्त्रीगतत्वेनपुंसः। गुरुवृद्धपित्राद्यालम्बनतयाहास्यस्य, वीतरागाद्याश्रयतयाकरुणस्य, गुरुवृद्धाद्यालम्बनतयारौद्रवीरयोः, वीरगतत्वेनभयानकस्य, ऐन्द्रजालिकाद्यालम्बनतयाऽद्भुतस्य, चाण्डालादिगतत्वेनशान्तस्येति। भावस्य प्रशमः शान्तिः, उदय उद्रेकः, एतयोरुत्पत्तिकालावच्छिन्नयोरेव चमत्कारित्वमनुभवात्। सन्धिः सम्मिलनम्, एककालावच्छेदेन समकक्षयोरास्वादज्ञातयानत्। शबलता—एकचमत्कृतिज्ञानगोचरता। सर्वेचैतेरसनधर्मयोगाद्रसपदवाच्याः। स्थायिनांत्वेतेन संभवन्ति तेषां सन्ततमविच्छेदात्। देवादौत्यादिपदान्मुनिगुरुनृपपुत्रादिविषया, क्रमेणोदाहरणानि—

'दिविवासुविवा वासो नरकेवानरकान्तक।
त्वदीयचरणौ किन्तु मरणेऽपि स्मराम्यहम्॥

दिविस्वर्गे, नरकेरौरवादौ। ननुस्वर्गनरकयोः सद्भावोनिष्प्रमाणइतिचेन्न। सहस्राश्वीने वा इतः स्वर्गोलोकः" भूमेर्लक्षकोशोपरीतितदर्थः। "हविर्भिरेकेस्वरितः सचन्ते नेज्जिह्मायन्त्योनरकंपतामः, इत्यादिश्रुतिभिः स्वर्गनरकयोः स्पष्टतरमभिधानात्।

भट्टपादस्त्वत्रैवमाह—"संदिग्धेपरलोकेऽपि कर्तव्योधर्मसंग्रहः। अस्तिचेन्नास्तिनोहानिरस्तिचेन्नास्तिकोहतः॥ नचैवमीश्वरस्य वैषम्यनैर्घृण्यदोषप्रसङ्गः यत्सकंचित्स्वर्गंगमयति कंचिच्चनरकमिति वाच्यम्। तस्यकर्माधिष्ठातृत्वेन प्राणिनांकर्मानुसारं स्वर्गनरकादिप्रापकत्वात्। तथाचाह सांख्यसूत्रकारोभगवान् कपिलः–कर्मवैचित्र्याद्गति (सृष्टि) वैचित्र्यमिति। कर्मधर्माधर्माविति सांख्यभाष्यकारः। शारीरिकभाष्येभगवताशंकराचार्येणापीदमेवभाषितम्—"जीवकृतधर्माधर्मापेक्षएवतत्तत्फलानिविषमंविभजतेपर्जन्यवदीश्वरोनिमित्तत्वमात्रेण। मरणे=मरणसमये, मरणंचदेहस्य प्राणवियोगः 'नजीवोम्रियते जा० इत्यादिश्रुतेः। 'नजायतेम्रियतेवाकदाचित् गी० इत्यादिस्मृतेश्चजीवस्यनित्यत्वात्। स्पष्टमन्यत्। अत्रभक्तस्यभगवच्चरणस्मरणाभिलाषोभगवतिपरामनुरक्तिंव्यनक्ति ततश्चात्रदेवादिविषयारतिर्भावोव्यंग्यः। रसचमत्कारसत्वेऽपि भावचमत्कारप्रकर्षाद्भावध्वनित्वम्। राजानुगतविवाहप्रवृत्तभृत्यस्येवध्वन्यमानभावस्यप्राधान्यात्। भावशान्त्यादिध्वनिष्वपिभावस्यैवप्राधान्यं नतु शान्त्यादीनां भावचर्वणायामेवचमत्कारोदयात्। मुनिविषयारतिर्मञ्जुरामायणे—'श्रवणाञ्जलि पुटपेयं चक्रेरामायणाख्यममृतंयः। तं वन्देमुनिवर्यंकविधुर्यंवाल्मीकिंभक्त्या॥

मुनिशब्देनमननजन्यब्रह्मज्ञानमुच्यते। कविशब्देन क्रान्तदर्शित्वम्, वाल्मीकि–वल्मीकस्यापत्यं, वल्मीकप्रभवोयस्मात्तस्माद्वाल्मीकिरित्यसौ" इतिब्रह्मवैवर्तात्, गोणिकापुत्रवद्गौणमस्य वल्मीकापत्यत्वंगृहीत्वा, इञ्साधुरपत्यार्थः। वन्देऽभिवादयेस्तौमिवा स्पष्टमन्यत्। [illegible]

लोकस्यज्ञानाञ्जनशलाकया। चक्षुरुन्मील्यतेयेन तस्मैश्रीगुरुवेनमः॥ गुरुमाहात्म्यमृक्श्लोकाभ्यामभ्युक्तम्—"य आतृणोत्यवितथेनकर्णावदुःखंकुर्वन्नमृतंसम्प्रयच्छन्। तंमन्येतपितरंमातरंचतस्मैनद्रुह्येत्कतमच्चनाह॥ अध्यापितायेगुरुंनाद्रियन्ते विप्रा वाचामनसाकर्मणावा। यथैवतेनगुरोर्भोजनीयाः तथैवतान्नभुनक्तिश्रुतंतत्॥ अत्यन्तरे चोक्तम्—"यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ। तस्यैतेकथिताह्यर्थाः प्रकाशन्तेमहात्मनः॥ तैत्तिरीयाश्चामनन्ति—मातृमान् पितृमान् आचार्यवान् पुरुषोवेदइत्यादि। नृपविषयायथारसगङ्गाधरे—

'धर्मस्यात्मा भागधेयंक्षमायाः सारंसृष्टेर्जीवितंविज्ञतायाः।
आज्ञासाक्षाद्ब्रह्मणोवेदमूर्तेराकल्पान्तं राजतां भोजराजः॥

धर्मस्यसदाचारस्यात्मामूर्तिः। क्षमापृथ्वीतस्याभागधेयंभाग्यम्। विज्ञतायाविज्ञतायाः कवितायावाजीवितंप्राणः, आकल्पान्तं कल्पपर्यन्तमित्यभिभिधावव्ययीभावः। राजतांकीर्त्याविलसतु"कीर्तिर्यस्यसजीवतीत्युक्तेः। आशिषिलोट्। पुत्रादिविषयायथामम—

'नन्वेतमेतमिहजीवनरामदेवीरामौ, ममप्रियसुतौसुपरिष्वजेवाम्।
आरोप्यवाहृदिदिवानिशमुद्वहामिचुम्बामिवा करयुगंसुभगं द्वयोर्वै॥

इयंहि स्वपुत्रंचिरञ्जीवि जीवनरामंप्रति स्वानुजनेकीरामपुत्रं चिरञ्जीवि देवीरामंप्रतिचवात्सल्यरूपा रतिः। परपुरुषविषयकोरसाभासो यथाममसुलतानचरितकाव्ये—

'इदमद्भुतयौवनंनयप्रमदाभिः सह पुष्करेक्षण,
क्षणभंगुरविष्टपे सुखंसुखिनोनैवरतेः परंविदुः।
परदारगतं न संगतं कथनं तत्वविदामिदन्तुन
तासितत्वयुवत्वशूरतारहितामाममवधीरितस्मर॥

नरवीरसुलतानंप्रतिदानववधूनामुक्तिरियम्। तत्वविदां यथार्थवक्तृणांनैवापितु सौन्दर्यादिरहितानामेव। स्त्रियोहिताद्दशान्नकामयन्तेऽतएवतैः स्वयंपतितोऽन्यान्यातयतीतिन्यायेनेदमुक्तं नवस्तुतइतिभावः। परस्त्रीविषयकोरसाभासोयथाप्रसन्नराघवे—

'मन्दोदरीमपिविमुञ्चतिराज्यमेतत्,
अप्युन्मदंतवपदाब्जतले करोति।
किं जल्पितेन वहुना सुमुखित्वदर्थे,
स्वान्युच्छिन्नत्यपिशिरांसिपुनर्दशास्यः॥

सीतांप्रति रावणस्योक्तिरियम्। परस्त्रीविषयत्वाद्रसाभासोऽयम्। नचैवंभवतः शृङ्गाररसस्योदाहरणमपिताद्दगेव, राधाकृष्णयोरविवाहेन पतिपत्नीत्वाभावादितिवाच्यम्। तस्यप्राकृतस्त्रीपुरुषविषयत्वेनदिव्यशक्ति-शक्तिमद्राधाकृष्णविषयत्वाभावात्। एवं—"रेमेरमेशोव्रजसुन्दरीभिरित्यादिश्रीमद्भागवतोक्तंसर्वगोपीरमणमपिभगवत्कृष्णस्यनदुष्यति—"ईश्वरस्यनदोषायवह्नेःसर्वभुजोयथेतितत्रैवसमाधानात्। "नेष्टायदङ्गिनिरसेकविभिः परोढा। तद्गोकुलाम्बुजद्दशांकुलमन्तरेणेत्युक्तेश्च। किंवहुनाश्रुतिरपिभगवतीनिष्कलंकत्वमाहतस्य "ब्रह्मण्योदेवकीपुत्र इत्यादिना। अतएव तद्भक्तानामपि रासलीलादौनकाचिदाशङ्का प्रत्युत 'वाङ्मयेषुमधुराहरिगाथास्तत्रकृष्णचरितान्यमृतानि। तेषुचप्रमददिव्यधुनीमेरासकेलिमनुमज्जतिचेतः' इत्यादीनिवचनानिदेषांमुखात्सरसंसमुल्लसन्ति। नचयद्येवमेवेश्वरत्वंप्रकटितंभवति, तदाभगवद्रामचन्द्रादिभिरपिताद्दक्कर्मकथंनकृतमितिवाच्यम्। तस्यमर्यादापुरुषावतारत्वादितिदिक्। यच्चदर्पणकारेण तिर्यग्विषयेरसाभासत्वमुक्तं तन्नयुक्तम्। काव्य-

प्रकाशकाराणां मम्मटपादानां श्रीवाभङ्गाभिराममिति भयानकस्य, मित्रेक्षापिगते, इतिविप्रलम्भस्यचोदाहरणाभ्यांविरोधात्। नखलु मम्मटोक्तिविरुद्धमाद्रियतेकैरपि, अगम्यायांरतिर्भावाभासोयथा—

'यवनीनवनीतकोमलाङ्गी शयनीयेयदिनीयतेकदाचित्।
अवनीतलमेवसाधु मन्ये न वनी माघवनीविनोदहेतुः॥

यवनी–यवनजातीया, जातेरस्त्रीविषयादितिङीष्। माघवनी-वनी,नन्दनवनं, मघोनइयंमाघवनी मघवाबहुलमितिविकल्पान्नत्रा-देशः। गौरादित्वान्ङीष्। कस्यांचनयवनयुवत्यामासक्तस्य ब्राह्मण-यून उक्तिरियम्। 'भावस्यशान्तिर्यथामम—'पादानतंमामालोक्य मुञ्च कोपं चमूरुदृक्। इत्युक्तया तयाश्रंहि मुक्तमुक्तंनकिञ्चन॥ अश्रमश्रुमुक्तंत्यक्तम्। अत्रवाष्पमोचने उत्पत्तिकालावच्छिन्नस्येर्ष्या-ख्यसंचारिभावस्यशमोव्यंग्यः। भावोदयोयथामम 'बहुप्रसाद्यमा-नापिसानहर्षमदर्शयत्। यदासगन्तुमारेभेतदार्तिविललापसा॥अत्र-विषादस्योदयोव्यंग्यो नतु सत्यपिकोपशान्तिरचमत्कारित्वात्। भावस्यसंधिर्यथामम–'श्रीकृष्णचन्द्रमालोक्यमनोवृत्त्यापिदुर्लभम्। मन्मनोमन्मथाक्रान्तंसुखंदुःखंचविन्दति॥ अत्रलोकोत्तर श्रीकृष्ण-दर्शनजन्योर्हर्षविषादयोःसन्धिर्व्यंग्यः। भावस्यशवलतायथामम-'दयितोऽत्यन्तकुपितोमनोमत्तंजनोरिपुः। मन्मन्मथः श्रियोनाथः किंकरोम्यद्यहेसखि॥ अत्र भयचपलताशंकौत्सुक्यानां शवलता। यथावानैषधे— 'लानश्चरामीतिहृदालज्जे हेलांदधौरक्षिजनेऽस्त्र-सज्जे। द्रदयांमभैमी मितिसंतुतोषदूत्यं विचिन्त्यस्वमसौशुशोच॥ अत्रगर्वलज्जा हर्षनिर्वेदानांवहूनांभावानांपरस्परोममदनसमावेशः॥

॥ इति साहित्य शिक्षायां द्वितीयोऽध्यायः समाप्तः॥

अथ तृतीयो बिन्दुः ।

काव्यापकर्षका दोषाः काव्यज्ञैः समुदीरिताः ।
ते मयात्र प्रदर्श्यन्ते बुधबोधविवृद्धये ॥ १ ॥

रसोत्पत्तिप्रतिबन्धकत्वेनकाव्यापकर्षकत्वंदोषसामान्यलक्षणम् । दूषयतिकाव्यमितिदोषः । स च सर्वात्मना त्याज्यः । यथाऽहदण्डी–"तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन । स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ दुष्टं दोषः नपुंसके भावेक्तः । सर्वशरीरं-सुन्दरमपि, एकावयवनिष्ठेन कुष्ठविशेषेण दुर्भगंभवतीतिदृष्टान्तार्थः । भोजोऽप्याह–"दोषाः पदानांवाक्यानामर्थस्यचरसस्यये । हेयाः काव्ये कवीन्द्रैस्ते सर्वेषां विदुषां मते ॥ अर्थात्—काव्ये पदनिष्ठा वाक्यनिष्ठा अर्थनिष्ठा रसनिष्ठाश्चदोषाभवन्तितेऽवश्यं-वर्जनीयाः । तथापि सर्वथानिर्दुष्टकाव्यस्यासंभवएवयत्रेदमुच्यतेऽस्माभिः—सन्तिदोषाः शतं माघे रघुवंश-किरातयोः । नैषधेच-महाकाव्ये नवीनेषुतुकाकथा ॥ काव्यस्यगुणदोषाणामाकरः कथ्यते बुधैः । नैषधंतस्यतेऽस्माभिः प्रदर्श्यन्ते यथामति ।

तान्क्रमेणाह—

कष्टाप्रयुक्तसंदिग्ध व्यर्थाश्लीलाप्रतीतकाः ।
असाध्ववाचकक्लिष्टाः पदे दोषा नवोदिताः ॥२॥

कष्टं श्रुतिकटु यथानैषधे—

'ह्रीणाचहृष्टाचवभाणभैमी । 'क्रियांप्राह्णेतनींकृत्वा,
'दूर्वांकुराढयांनलकण्ठनाले, कटाक्षघारास्तवकीकटाधिप;,
इत्यादिषुपद्यांशेषु माधुर्यगुणस्य शृङ्गारस्यप्राधान्यात्तत्प्रतिकू
वर्णाः कठोरवर्णघटितत्वात् । तथातत्रैव—

'अवोचततस्तन्वीं निषधानामधीश्वरः ।
तदपाङ्गचलत्सार झलत्कारवशीकृतः ॥

अत्रसमाससत्ताश्रुतिदोषमावहति । "अवृत्तिरल्पवृत्तिर्वा
धुर्ये" इत्युक्तेः । अप्रयुक्तं तथाम्नातमपिकविभिर्नादृतं, यथानैषधे
'मुखमयंपद्मः प्रियेतावकम्, अमरादिभिः कोषकारैः प्रयुज्यमा
ताऽवच्छेदकरूपेणपद्मशब्दःपुंसि आम्नातोऽपि अन्यैः कविभिः
प्रयुज्यते । सन्दिग्धंवक्तृतात्पर्यसन्देहजनकम् । यथानैषधे-
'तन्वीमतिक्रामतिमेनकापि । अत्रमेनकापीति द्विपदंचतुः पदंवे
सन्देहः । शाब्दबोधविलम्बोदूषकताबीजम् । व्यर्थंप्रकृतानुपगुण
पादपूरणैकप्रयोजनं, यथानैषधे- 'भूषणेषुयदिवापिगुणेषु, अत्र
ह्यपीशब्दौव्यर्थौ । वेत्यनेनैवसकलेष्टसिद्धेः । प्रयोजनानुसंधानक
मतादूषकताबीजम् । नचास्याधिकपदत्वमाशंकनीयम् । पादपूर
कप्रयोजनस्यापिनिष्फलत्वविरहात् । "मितंचसारंचवचोहिवाग्मि
तेति नैषधपद्ये तु चादयः समुच्चयाद्यर्थानतुव्यर्थाइतिबोध्यम्
अश्लीलमौज्वल्याभाववत् । तच्चत्रिविधम् । अमङ्गल व्रीडाजुगुप्सा
भेदात् । त्रयाणामेवोदाहरणानि नैषधे—तत्रामङ्गलस्ययथा-
'तववर्त्मनिवर्ततां शिवंपुनरस्तु त्वरितं समागमः । हे हंस, तव

र्म्ममार्गः शिवंनिवर्तंतांदूरीकरोतुसत्वंपुनस्त्वरितंमा आगमइति-च्छेदः। व्रीडायायथा—'संभुज्यमानाद्यमया निशान्ते। जुगुप्साया-यथा—'कलाकलापंकिलवैधत्वंवमन्। 'स्वांचमन्तुसरस्वतीम्। एषू-दाहरणेषु निवृत्तिसंभोगवमन्शब्दा अमङ्गलव्रीड़ाजुगुप्साबोधकाः। श्रोतुर्वैमुख्यं दूषकतावीजम्। अप्रतीतमेकशास्त्रमात्रप्रसिद्धम्। यथानैषधे—'ईशाणिमैश्वर्यविवर्तमध्ये। ईशस्ययदणिमैश्वर्यं, तस्यविवर्तोरूपान्तरं मध्यंयस्याःसा तत्संबुद्धौ हे कृशोदरीत्यर्थः। अत्रविवर्तशब्दोवेदान्तशास्त्रे प्रसिद्धोनत्वत्र, "अतत्त्वतोऽन्यथा प्रथाविवर्त इत्युदीरितः। इतिवेदान्तसारोक्तेः। अस्यविवरणं मदीयवेदान्तसारटीकायां द्रष्टव्यम्। अत्रतच्छास्त्रानभिज्ञस्या-र्थानुपस्थितिर्दूषकतावीजम्॥

व्याकरणान्वाख्येयत्वं, पुण्यजनकतावच्छेदकधर्मवत्वंवासाधु-त्वंतद्विरुद्धमसाधुत्वम्। असुरादिवत्-नञोविरोधार्थकत्वात्। अतएव "समानायामर्थावगतौ शब्दैश्चापशब्दैश्चशास्त्रेणधर्म नियम इतिभाष्यम्। "वाचकत्वाविशेषेऽपि नियमः पुण्यपापयो-रितिवाक्यपदीयंचसंगच्छते। उदाहरणानियथानैषधे—'बुद्धी-न्धर्मः खलु शेषबुद्धौ, अत्रधर्मइत्यस्यस्थानेदध्म इतिपाठ्यम्। 'चेष्टाऽयनेशन्नखिलास्तदास्याः। अत्रेत्वंभाष्यकैयटविरुद्धम् 'हरे-र्यदक्रामि,अत्र वृद्धिश्चिन्त्या। 'धरातुरासाहि, लोकेसहोणिवः चिन्त्यः। 'इमांकिमाचामयसे, अत्रपरस्मैपदिनश्चमुधातो-रात्मनेपदंचिन्त्यम्। आचामयेतिपृथक्पदं सेइतिसंबोधनमितिम-ल्लोरमाकारोक्तंतुनयुक्तं क्लिष्टकल्पनात्वात्। 'अपासमपाकृत्यनिभा-

भिभालय, अत्रात्मनेपदिनः परस्मैपदंचिन्त्यम्। कतित्र
स्फुरन्तोपिबहुदोषाविस्तरभयादुर्दर्शाः। एवंसखिना वानरेन्द्र
कृष्णस्यसखिरजुर्नइत्यादिरामायणभारतप्रयोगाणा मार्षत्वे
व्याकरणानिष्पन्नत्वेनासाधुत्वमेव। अतएव नदीसंज्ञा सूत्रेभाष्ये
छन्दोवत्कवयः कुर्वन्तीत्युक्त्वानह्येषेष्टिरस्तीत्युक्तम्।

साधुत्वासाधुत्वविभागश्चाद्यत्वेमुनित्रयमतेनैवेतिकैयटः।

वस्तुतस्तु अनन्यपरतन्त्रानियतिकृतनियमरहितायस्य
नियतेरपिनियन्त्रणंनसहतेसक्रान्तदर्शीकविगणः पाणिन्यादि
यन्त्रणमङ्गीकरिष्यंतीतिवयंनप्रतीमः। अवाचकं प्रकृतार्था
यथानैषधे—'चन्द्राभमाभ्रं तिलकंदधाना। आभ्रमभ्रसं
स्पष्टमन्यत्। अत्रदधानेतिपदं विदधानार्थस्यावाचकम्। वि
णैवविधाने तस्यनियमितशक्तिकत्वात्। नचविधानं व्यं
वाच्यम्। अन्वितार्थान्तरं प्रतिपादयतएवपदस्यव्यञ्जकत्व
चन्द्रालोकेऽप्युक्तम् — "अर्थेविदधदित्यादौदधदाद्यमवाचकं
"विपूर्वोधाकरोत्यर्थे" इत्यनुशासनाज्ज्ञानंदूषकताबीजम्। हि
मर्थप्रतीतेर्व्यवहितत्वम्। यथानैषधे—'ईशाणिमैश्वर्यविव
लोकेशलोकेशयलोकमध्ये। तिर्यञ्चमप्यञ्चमृषानभिज्ञ
तोपज्ञसमज्ञमज्ञम्॥ अत्राज्ञ तिर्यञ्चमपिमां ब्रह्मलोकवासि
'सत्यव्रत यास्यियंव्रत यादित्यस्यप्रथमंप्रवर्तकं विद्धीत्यर्थः। स
हितोभवति। एवंतत्रैवउक्तमित्यर्थे—'अमोघिचञ्चूपुटमौ
श्चादौ। अथवाक्यदोषानाह—

न्यूनं विसन्धि व्याकीर्णं समाप्तपुनरात्तकम्।

भग्नक्रमयतिच्छन्दो वाक्यगर्भमरीतिमत् ॥३।
अविमृष्ट विधेयांशं नेयार्थनिहतार्थकौ ।
विसतं चाप्रसिद्धं च वाक्येदोषाश्चतुर्दश ॥ ४ ॥

न्यूनं किञ्चित्पदशून्यं यथानैषधे—

'दृष्टं दृष्टं महाराज, त्वदर्थाभ्यर्थनक्रुधा ।
यत्ताडयतिमामेवंयन्त्रातर्जयतिभ्रुवा ॥

अत्रैषेतिकर्तृपदंन्यूनम् । यत्ताडयतिमामेषेतिपाठयम् ।

यथावामम—

'लोकेप्रसिद्धनामा सीमाऽऽचारस्यवेदमर्मज्ञः ।
नगरभिवानीधामा सीतारामाभिधः शास्त्री ॥

अत्र जयतीत्यादिपदंनास्ति । 'जयतिभिवानीधामा, इत्येवं तृतीय चरणनिर्माणे कृतेतुनैषदोषः। साकाङ्क्षत्वं चात्रदूषकताबीजम्। एवमधिकपदकथितपदत्वेऽपिदूषणे। तत्राधिकपदंयथानैषधे— 'कुहूगिरश्चञ्चुपुटंद्विजस्यराकारजन्यामपिसत्यवाचम् । अत्ररजनीपदम्। राकापूर्णनिशाकरे, इत्यनुशासनात्पूर्णनिशाकरावच्छिन्नकालत्वस्यैवराकापदार्थत्वान्नत्वह्नः । अतएवाभियुक्ताः प्रयुञ्जते— "राकासुधाकरमुखी, "राकायामकलंकंचेदित्यादि । क्वचिद्विशेषस्यापि सामान्यवाचित्वंतुभाक्तम्। यथाकेवलसुखत्व गोत्वाद्यवच्छिन्नतात्पर्येण स्वर्गधेन्वादिपदं प्रयुज्यते । यथावातत्रैव 'दर्भाग्राभमतिस्तव। उन्मीलल्लीलनीलोत्पलेत्यादौ। अत्राभलीलेतिपदेऽधिके। कथितपदंचापितत्रैव—'आसन्ननायक विषण्ण

मुखानुमेयभैमीविरक्त चरितानुमयातुजह्नुः। अत्रभैमीविरक्तच रितेनतुजह्नुरेवेत्यदुष्टम् ॥

विसन्धिः सन्धिर्विग्रहः । सचद्विविध ऐच्छिकः प्रगृह्यत्वादिनि- वन्धनश्च । ऐच्छिकः सकृदपिदोषः । द्वितीयस्त्वसकृत । तथैव कविसमयात् । ऐच्छिकस्ययथामम 'झञ्झा निलेन अमुनावहुवृक्षा निपातिताः । झञ्झा निलेन सवृष्टिकवातेन अमुना अनेनेत्यर्थः "अदसस्तु विप्रकृष्टे, इतिवृद्धोक्तेरदः शब्दस्यपरोक्ष ज्ञानविषय तावच्छेदकधर्मावच्छिन्ने शक्तिः । तथापि 'अमुंपुरः पश्यसि "अमुंकलत्वं पृथिवीमवातर" इत्यादिप्रामाणिकप्रयोगदर्शनमदः शब्दस्य प्रत्यक्षविषयेपिश क्त नियामकमितिवोध्यम् । ऐच्छिक- त्वेनाशक्तिमूलक तया सहृदयोद्वेजकत्वमत्रदूषकतावीजम् । नचा- स्यासाधुत्व मेवेतिवाच्यम् । वाक्येसन्धीच्छाविकल्पस्य व्याकरणा- नुशिष्टत्वात् । प्रगृह्यत्वादिनिवन्धनस्य यथादर्पणे—

'दलिते उत्पले एते अक्षिणी अमलाङ्गिते ।

अत्र-ईदूदे द्विवचनंप्रगृह्यमितिपाणिनिसूत्रेण द्विव चनस्य प्रगृह्यत्वं, तस्यच "प्लुतप्रगृह्या अचिनित्यमिति पाणिनिसूत्रेण प्रकृतिवद्भावविधाना दसकृदेवदोषः । वन्धशैथिल्यं दूषकता- वीजम् । व्याकीर्णं व्यवहितान्वयं यथानैषधे—

'निःशङ्कमंकुरितितांरतिवल्लभस्य देवःस्वचन्द्रकिरणामृत- सेचनेन । तत्रावलोक्यसुदृशां हृदयेषुरुद्र इत्यादौ । रतिवल्लभस्य कामस्य, अंकुरिततामुत्पत्तिं, स्पष्टमन्यत् । अत्र 'देवःस्वचन्द्रकिर- णामृतसेचनेन निःशङ्क मंकुरिततांरतिवल्लभस्य । तत्रावलोक्य सुदृशां हृदयेषुरुद्र" इत्येवंपठितुंयुक्तम् । यथावातत्रैव—

'वदत्यचिह्निचिह्नेन त्वयाकेनैषनैषधः।
शंकेशक्रः स्वयंकृत्वामायामायातवानियम् ॥

अत्रेयंवदतीत्यन्वयोऽप्यवहितः। 'इयंवदतिचिह्नेन त्वया-केनैषनैषधः। ज्ञातः शंके स्वयंशक्रो मयया ऽयातवानयम् ॥ एवं कृतेतुनैषदोषः। प्रतीतिविलम्बोनिजेष्टवोधविलम्बाद्रसभङ्गोवादूष-कतावीजम्। समाप्तपुनरात्तं-समाप्तंसत्पुनरुपात्तं, यथानैषधे—'जग्रन्थ सेयं मदनुग्रहेण वचःस्रजः स्पष्टयितुं चतस्रः। द्वे तेनलं-लक्षयितुं क्षमेते ममैवमोहोऽयमहोमहीयान्॥ अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरुक्तः। निराकांक्षात्वंदूषकतावीजम्। भग्न-क्रमंयथानैषधे—'निजास्य चन्द्रस्य सुधाभिरुक्तिभिः।

अत्र निजास्यचन्द्रौ क्रमेणोपक्रम्य तदुभयोचितयो रुक्ति-सुधयोः पौर्वापर्यमुचितम्। यथासंख्यमनुदेशःसमानामिति-न्यायात। तदन्यथाकरणं दूषकतावीजम्। 'निजास्यचन्द्रस्य सुभाषितामृतैरितिपाठयम्। भग्नयतिर्यथानैषधे—'सविधमधुना-ऽलंकुर्वन्ति ध्रुवं रविरश्मयः। अत्रषष्ठेवर्णेपरपदसंधानकृताय-तिरश्रव्यतामावहति। यत्या पद्येषुमधुरता जायते। "मधुरता-निमित्तंयतिरिष्यते' इति कविकल्पलताकारोक्तेः। यतिश्चस्थान-विशेषेविच्छेदः। "यतिर्विच्छेद इति षष्ठाध्याये भगवत्पिङ्ग-लाचार्यसूत्रणात्। यतिर्विच्छेदसंज्ञक इतिवृत्त रत्नाकराच्च। भग्नच्छन्दोयथाकुमार-संभवे-'ततःपरमोमित्युक्त्वा प्रतस्थेमुनि-मण्डलम्, ओमित्युक्त्वा स्वीकृत्य, प्रतस्थे जगाम, तिष्ठतिरत्रगति-वाचीधातूनामनेकार्थत्वात्। प्रशब्दस्तुतदर्थगत्यादि त्वस्यद्योतकः।

उपसर्गाणांद्योतकत्वस्यगतिर्गताविति सूत्रभाष्ये उक्तत्वात्। निपातानां तूभयमेवो भयत्र प्रामाण्या दित्यग्रे विवेचयिष्यते। अत्र प्रथमपादे पञ्चमवर्णस्यलघोः स्थाने गुरोःकरणाच्छन्दोभङ्गः। 'श्लोकेषष्ठंगुरुज्ञेयंसर्वत्रलघुपंचममिति छन्दः शास्त्रविरुद्धत्वात्। एषुचाश्रव्यता सहृदयोद्वेजिनीदुष्टता बीजम्। वाक्यान्तरे वाक्यान्तरानुप्रवेशो वाक्यगर्भम्। यथानैषधे–'छेत्तुमिन्दौभवद्वक्त्रबिम्बविभ्रमविभ्रमम्। शङ्केशशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः॥ अत्राहंशङ्के इतिवाक्यान्तरं प्रथमवाक्यस्यमध्येप्रविष्टम्। 'शङ्केशशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः। छेतुमिन्दौभवद्वक्त्रबिम्बविभ्रमविभ्रमम्॥ इत्येवंपाठेतुनैषदोषः। यथावातत्रैव– 'तस्यार्थें गरुड़ामरेन्द्रसमरः स्थाने सजानेऽजनि। अत्राहंजाने इतिवाक्यमजनीतिवाक्यमध्येप्रविष्टम्। पदानामनासत्तिदूषकता बीजम्। यांरीतिमुपक्रम्यप्रवृत्तंतद्भंगवद्रीतिमत्। यथानैषधे–

'अवश्यभव्येष्वनवग्रहग्रहायया दिशाधावतिवेधसः स्पृहा।
जनस्यचित्तेनतयानुगम्यते तृणेनवात्येवभृशावशात्मना॥

अवश्यभव्येष्वर्थेषु, भव्यगेय इत्यादिनाकर्तरियत्। 'लुम्पेदवश्य मः कृत्ये' इत्यवश्यमोमकारलोपः। अनवग्रहग्रहा- निरंकुशा, वात्यावातसमूहइवपाशादिभ्योयः। स्पष्टमन्यत्। अत्र धावती ति कर्तृवाचकतिङ उपक्रमेऽनुगम्यत इतिकर्मकारकवाचकस्योपादानादरीतिमत्त्वम्। 'जनस्यचित्तंहि तयानुगच्छति तृणं च वात्यामिवतांभृशावशम्। इत्यदुष्टम्। अविमृष्टविधेयांशः प्राधान्यानिर्दिष्ट विधेयकंयथानैषधे—'किमसुभिर्ग्लपितैर्जडमन्यसे

मयि निमज्जतुभीमसुतामनः । असुभिः प्राणैर्ग्लपितैर्निष्कामितै-
भीमसुतामनोमयिचन्द्रे निमज्जतु निमज्जतां संभावनायांलोट् ।
इतिमन्यसेत्वमित्यर्थः । अत्र "मनश्चन्द्रे निलीयते, इतिश्रुतेः सर्वं
सामान्यानांमनसांचन्द्रमसिलय विधानाद्वृत्तौतस्यनिर्देशः । इत्य-
विमृष्टविधेयांशोदोषः । 'भीमभुवोमन इतिपाठ्यम् । यथावातत्रैव—

'साभङ्गिरस्याः खलुवाचिकापियद्भारतीमूर्तिमतीयमेव ।
अत्रेयंमूर्तिमतीसाभारत्येवेतिभारतीत्वंविधेयम् ॥

नेयार्थंशक्यसंबन्धमात्रेण शक्यार्थोपस्थापनंयथानैषधे--
'अवधृत्यदिवोऽपियौवतैर्नसहाधीतवतीमिमामहम्' । दिवोऽपि-
स्वर्गस्यापियौवतैर्युवतीसमूहैर्भिक्षादित्वादण् । नपुंवदितिकाशि-
कातुनसम्यकभाष्यविरुद्धत्वात् । नसहाधीतवती मसदृशीततोऽप्य-
धिकसुन्दरीमित्यर्थः । इदमेवलक्ष्यम् । यथावातत्रैव—'अनूपया-
माससभीमजाश्रुती । अनूपयामास=परिपूर्णेचकारेतिलक्ष्यम् । लक्ष-
णाचोभयत्रनसंभवति । "लक्षणासानकर्तव्या कष्टेनार्थागमोयतः ।
नयत्रशक्यसंबन्धोनरूढिनप्रयोजनम् ॥ तदन्यतरज्ञानस्यलक्षणायां
कारणत्वेनप्रकृतेतदभावादर्थानुपस्थितिदूषकतावीजम् । द्व्यर्थम-
प्रसिद्धेऽर्थेप्रयुक्तं निहतार्थं यथानैषधे—'निजस्यतेजः शिखिनः' 'नृपः
पतंगं समधत्तपाणिना । 'लेखानुजीविपुरुषाः' 'भैमीङ्गितानिशि-
विकामघरे हवन्ते । 'कार्येनिदानाद्धिगुणानधीते । जिनोक्तिषु
श्राद्धतयेवसैन्धवाः । एषुपद्यांशेषुस्थिताः शिखिपतङ्गलेखाधराध्ययन
श्राद्धशब्दा मयूरशलभलेखाधरोष्ठाध्ययनपितृकर्मसुप्रसिद्धा अग्नि-
हंसदेवाधोभागप्राप्तिश्रद्धावर्थेषुनिहताः । प्रसिद्धस्यैवद्रागुपस्थित्या-

विवक्षितस्य विलम्ब्योपस्थितिदूषकताबीजम् । 'दत्वा कन्यां सुपात्राय विद्यामिव सुखीभवेत् । सुपात्राय सद्वराय=ओंप्रकाश-प्रभृतये, कन्यां सुशीलादिकां. पक्षेसुपात्राय=सच्छिष्याय वामदेवादये, विद्यां दत्वा सुखीभवेदित्यर्थः । अस्मिन्मदीयार्धप-द्येतुनायं दोषः । सुपात्रशब्दस्य द्वयोरर्थयोः प्रसिद्धेः । विमतंविरु-द्धमतिकृद्यथ नैषधे'नतुलाविषयेतवाकृतिः । हेहस, तवाकृतिःस्वरूपं तुलना विषये न, नैवेत्यर्थः । अत्रसादृश्यार्थकतयाप्रयुक्तः तुला-शब्दो झटितिपरिमाण बोधक तुलायाः प्रतीतिकरत्वाद्विमति-मुत्पादयति । यथावातत्रैव 'नतन्मुखस्यप्रतिमाचराचरे । अत्र "नतस्यप्रतिमालोके" इतिश्रुतौ प्रतिमाशब्द उपमावाचकत्वेन-प्रयुक्तोऽपिझटितिमूर्तिप्रतीतिकारित्वाद्विरुद्धांबुद्धिप्रसूते । येत्वनया-श्रुत्या देव मूर्तिपूजांखण्डयन्ति ते देवानांप्रियाः । तदुक्तेः "सर्व-गतस्यापिब्रह्मणःस्थानविशेषेनविरुध्यतेशालग्रामइवविष्णोरित्या-दिनावेदान्तसूत्रशारीरकभाष्योक्तिविरुद्धत्वात् । प्रकृतार्थधीप्रति-बन्धकीभूताप्रकृतार्थधीजनकत्वं चात्रदूषकताबीजम् । अप्रसिद्धं प्रसिद्धिहतम् । यथानैषधे-'कूजितं सुरतकूजितंतयोः' यथा-वालंकारकौस्तुभेविश्वेश्वरस्य 'नेदं कूजितमस्तिकामुकक्रतम् । अत्र "मंजीरादिषुरणितप्रायं पक्षिषुचकूजितप्रभृति । स्तनितमणि तादिसुरते मेघादिषुगर्जितप्रमुखम् ॥ इतिकाव्यप्रकाशकारोद्धृता कविसमयप्रसिद्धिस्तद्विरुद्धम् ॥

ग्राम्यादयश्चार्थदोषाः रसाद्युक्तिः स्वशब्दतः ।
पौनःपुन्येनदीप्त्याद्यारसेदोषाः प्रकीर्तिताः ॥

ग्राम्यादीत्यादिना—व्याहताश्लीलनिर्हेतुदुष्क्रमानवीकृतपुनरुक्तहीनाधिकोपमानांसंग्रहः। तत्रग्राम्योयथानैषधे—'विलोमतद्व्यञ्जनमर्प्यते त्वया वरं किमस्मैन नितान्तमर्थिने"॥ विलोम=रोमरहितं, वरं व्यञ्जनं बरांगं, नितान्तमर्थिनेऽस्मैयूनेत्वयाकिमितिनार्प्यते। अयमर्थोग्राम्यः। वैदग्ध्याभावाद्विभावादिरूपोऽर्थो न रसाय पर्याप्यते। सहृदयहृदयवैमुख्यं चाश्लीलवद्दूषकताबीजम्। अत्रार्थस्यैव दोषो न शब्दस्य परिवृत्तिसहत्वात्। 'द्विजराजमुखीमृगराजकटिः जराजविराजितमन्दगतिः। यदिसावनिताहृदयेरमिताक्क जपः क्क तपः क्कसमाधिरतिः॥ इत्यत्रतुकटिपदंग्राम्यंनत्वर्थइतिपददोषत्वमेव। व्याहतमुपात्तविरुद्धम्। यथानैषधे—

'ज्ञताणिरामः परिभूयरामात्तत्राद्यथाभज्यतसद्विजेन्द्रः।
तथैवपद्मानभिभूयसर्वान् त्वद्वक्त्रपद्मात्परिभूतिमेति ॥

पूर्वं स्वतः पद्मपराजयः, पश्चात्पद्मादेवस्वस्यपराजयश्चात्रव्याहतौ। यथावातत्रैव—'इन्दुं मुखाद्बहुतृणंतवयद्गृणन्ति। हिमांशुविम्बलक्ष्मी—विडम्बिमुखि" अत्र पूर्वं मुखापेक्षयाचन्द्रस्यतृणवत्त्वकथनं, पश्चात्तद्बिम्बशोभानुकारिमुखीतिकथनं व्याहन्यते।

उत्कृष्टयापकर्षवर्णनंदूषकताबीजम्। "उत्कर्षोवापकर्षोवा प्राग्यस्यविनिगद्यते। तस्यैवाथतदन्यश्चेद् व्याहतोऽर्थस्तदाभवेत्॥ इतिप्रदीपकारोक्तेः। अश्लीलमश्रीमत्, कपिलादित्वाद्रेफस्यलत्वम्। यथानैषधे—

'वह्नमानिर्विधिनापितावकं नाभिमूरुयुगमन्तराङ्गकम्।
सव्यघादधिकवर्णकैरिदं काञ्चनैर्यदितितां पुराहसः॥

हे भैमि, नाभिमूरुयुगमन्तराङ्ककं, मदनाख्यं तावकं वराङ्गं न केवलं मयैव ब्रह्मणापि बहुमाननितरामादृतम् । यत्सगौरवर्णैः काञ्चनैरिदं व्यधात् । अत्र यद्यपि मैथुने वराङ्गदर्शनं नदुष्यति । तथापि नाटकादिषु मरणादिवर्णनमिव काव्येषु वराङ्गवर्णनंमहते दोषायेतिकाव्यविदोवदन्ति । अतावश्लीलार्थोदृश्यतेयथा—'यस्या मुशन्तः प्रहराम शेपं त्रिःस्म माह्नः श्नथयो वैतसेनेत्यादौ । त्रिःस्म इत्युर्वश्याःपुरूरवसंप्रत्युक्तिः । अह्नः त्रिःस्म त्रिस्त्रिवारमित्यर्थः। संख्याशब्दस्यवृत्तिविषयेवीप्सार्थकत्वमितिभाष्योक्तेः । अधिकं मदीयनिरुक्तटीकायाम् । निर्हेतुर्हेतुत्वाभाववान् । यथानैषधे— 'आसतेशतमधिक्षिति भूपाः तोयराशिरसितेखलुकूपाः । अत्रभूपतित्वमुभयत्रतुल्यम् । नले गंभीराशयत्वमन्येषुतदभावत्वंहेतुर्नोक्तः। उद्देश्यप्रतीतिविरहोदूषकतावीजम् । दुष्क्रमोऽपि यथानैषधे— 'मुखपाणिपदाक्षिदृग्णिपङ्कजैः । अत्र—"मुखनेत्रबाहुपादेत्यादिकामशास्त्रानुसारं मुखाग्रेऽक्ष्णिनिर्देशउचितः । यथावातत्रैव—'क्षिति गर्भधराम्बरालयैस्तलमध्योपरिपूरिणांपृथक् । अत्र "भूर्भुवः स्वरितिमहाव्याहृत्यनुसारंप्रथमंधरानिर्देशोयुज्यते । यथावा 'भागीरथी हरद्वारे कुरुक्षेत्रे सरस्वती । अतिपुण्यतमाः स्नाता इन्द्रप्रस्थे यमस्वसा ॥ स्नाताः पीताश्च अतिपुण्यतमाःपुण्यजनका मुक्तिकारिकाइतियावत् । अस्मन्मित्रेण सनातनधर्म विजयकारेणाखिलानंदेनाप्युक्तम्-' आसुभाग्य वशाद्येनलभ्यते विनिमज्जनम् । नतस्यमज्जनंमन्येभवसागरवारिषु ॥ अत्रोदाहरणे यमुनायाः प्राङ् निर्देशउचितस्तस्याज्येष्ठत्वात् । ध्वनित श्चायमर्थो गङ्गा यमुनामुपतिष्ठते, इत्युदा-

मुखानन्तरम् इत्यर्थः

हरताकौमुदीकारेण। एतेन–यमुनैवप्राचीना गङ्गा तु तयापश्चान्मिलितेतितद्व्याख्यातारः। अनवीकृतोयथानैषधे–'दत्वात्मजीवंत्वयिजीवदेऽपिशुध्यामि जीवाधिकृदे तु केन। अत्र जीवशब्दस्यानेकवारमुक्तिः कवेरशक्तिं प्रदर्शयति। अस्य वाक्यभेदान्नकथितपदेऽन्तर्भावः तस्यैकवाक्यनिष्ठत्वात्। पिष्टपेषणन्यायेन सहृदयहृदयोद्वेजकत्वमत्र दूषकताबीजम्। पुनरुक्तं यथानैषधे—'रक्षःस्वरक्षणमवेत्य निर्जनिवृत्तः, विद्याधरेष्ववरतांवपुषैवभैम्याः। गन्धर्वसंसदिनगन्धमपिस्वरस्य तस्या विमृश्य विमुखोऽजनियानवर्गः॥ अत्र "तस्या विमृश्य बिमुखोऽजनि' इतिपुनरुक्तम्। "उक्तार्थानामप्रयोगः" इतिभाष्यादुक्तार्थस्यपुनर्वचनंदूषकताबीजम्। हीनोपमोयथानैषधे—'अमुष्यविद्यारसनाग्रनर्तकी त्रयीवर्नाताङ्गगुणेन विस्तरम्। अमुष्यनलस्य, त्रयी विद्या-वेदलक्षणा, रसनाग्रे जिह्वाग्रे, नर्तकीवनर्तकोतिनारायणः। अत्राति पवित्राया वेदविद्याया नीचजातीयनर्तक्यासहोपमाऽतीवहीनेतिसूक्ष्मदृशावसातव्यम्। "अमुष्यविद्यारसनाग्रवर्तिनी त्रयी सुनीताङ्गगुणेनविस्तरम्। इतिपाठ्यम्। अधिकोपमोयथानषधे—'गुप्तंघटप्रतिभटस्तनि। अत्र घटस्यप्रतिभटौस्पर्धिनौ स्तनौयस्याः सातत्संबुद्धौ, हेघटादप्यधिक विस्तृतस्तन इत्यर्थः। स्तनयोर्घटादप्यधिकमहत्परिमाण कथनमसत्यतया लोकाद्विरुध्यते। अत्रयद्यप्युपमेयानां प्रकर्षस्तथापिरसहानेःस न प्रतीयते। एवमेवोपमायां लिंगभेदवचनभेद कालभेदोऽपि दोषोद्रष्टव्यः।

कविसमयविरुद्धतया चमत्कारापकर्षकत्वात्। तत्रलिङ्गभे-

दोयथानैषधे—'तृणानीवघृणावादानिति। अत्र यादृश निःसारत्व-वन्ति तृणानि तादृश निःसारत्ववन्तोघृणावादा इतिबोधः। वचन भेदोयथातत्रैव—"हनूमदाद्यैर्यशसामयापुनर्द्विषां हसैर्दूतपथः सितीकृतः। हनूमान्—रामदूतत्वेन प्रसिद्धस्तदाद्यैर्मयानलेन, स्पष्ट-मन्यत्। वेदेऽपिवचनभेदोदृश्यते 'अग्निर्नयेभ्राजसोरुक्मवक्षसइति। अग्निरिवयेभ्राजस्वन्तोरुक्मवक्षसइतिनिरुक्तकारः। कालभेदो यथानैषधे—'तस्यराम समश्रियः। अत्रभाविना श्रीरामेणसह भूतकालिकस्यनलस्योपमानचमत्काराय। यत्रैकोदोषस्तत्रदोषान्त-राण्यपिसन्ति। । यथापूर्वोदाहृतेहनूमदाद्यैरितिपद्येऽयमपिदाषः। एवमन्यत्राप्यूह्यम्। यत्रतुरसापकर्षद्वारानैषां सहृदयहृदयोद्वेगजन-कत्वंतत्रनदोषः। यथा—'सन्तापशान्तिकारित्वाद्वदनंचन्द्रमाइव। प्राणा इव प्रियोऽयंमे विद्याधनमिवार्जिता॥ इत्यादौ।

रसादीत्यादिनास्थायिसंचारिणोर्ग्रहणम्। कोऽपिरसोरसश-ब्देनश्रृङ्गारादिशब्देन रतिव्रीडादिशब्देनवा वक्तुंनयुक्तोऽनास्वा-द्यतापत्तेः। तदास्वादश्च व्यञ्जनामात्रनिष्पाद्य इतिसर्वालङ्कारिका नुमतः पन्थाः। क्रमेणोदाहरणानि यथानैषधे—'शुचेस्तदासीत्सर सीरसस्यसा। श्रृङ्गारमालिङ्गदधीश्वरश्रीः। शुद्धान्तसम्भोगनितान्त-तृप्ते। तयोः क्षणंचेतसि विप्रलम्भः। 'ससंभ्रमालुप्तरतिः। 'व्रीडाजडे किमपि सूचय। 'मृणालतन्तुच्छिदुरासतीस्थितिर्लवादपित्रुट्यति चापलात्किलेति। एषुपद्यांशेषुरसश्रृङ्गार संभोग विप्रलम्भरतिव्रीडा-चापलशब्द सत्वाद्रसापकर्षोभवति।

विभावादिद्वाराभिव्यक्तावेवचमत्कारास्वादयोरुत्कर्षादन्यथा-

दोषात् । दीप्त्यादीत्यादिपदेनाकाण्डे प्रथनच्छेदयो रङ्गभूत-वस्तुनोऽतिविस्तारस्याङ्गिनो ऽननुसन्धानस्था नौचित्यस्य च परिग्रहः । पौनःपुन्येनदीप्तिर्यथानैषधे विप्रलम्भशृङ्गारस्य । कुमार-संभवे रतिविलापस्य । एकस्यकस्यचित्पुनः पुनरास्वादः परस्य वैरस्यजनकः । यथाह काव्यपुरुषावतारः श्रीध्वनिकारः 'परिपाकंग तस्यापि पौनःपुन्येन दीपनम् । परस्यस्याद् विरोधायेति । अकांडे प्रथनच्छेदावपिनैषधे दृश्येते । तथाह काव्यसंसारेऽद्वितीयंकाव्य-मिदं महाभारतीयकथामनुरुध्यनि वध्यतेस्म । महाभारते द्वित्रैः श्लोकै रुपक्षिप्यमाणं सम्भोगशृङ्गारमयंपञ्चभिःसर्गैर्वर्णयातस्मेत्य-काण्ड प्रथनम् । व्यर्थविस्तरेणप्रतिभाक्षये जाते दमयन्तीस्वयम्बर पर्यन्तएववृत्तान्तः प्रस्तोतुं पारितोऽनेन न तदनन्तर इत्यकाण्ड कथा विच्छेदः। एवमनवरतप्रवहत्प्रवन्धरसप्रवाहेऽत्यन्तमन्तरायः संजातइतिकेषां न विदितमक्षरजुषाम् । यत्तु काव्यमिद मग्रेऽपिक-विना प्रणीतंस्या दिति केचिदभ्यूहन्ति तद्रभसात् । ग्रन्थस्यान्ते-श्रूयमाणया 'श्रीरस्तुनस्तुष्टये' इत्येवं मङ्गलाशंसयाकाव्यस्यैताव-न्मात्रेस्वस्यैवज्ञापनात् । अङ्गभूतवस्तुनोवहुवर्णनमपिनैषधेयदयं-महाकविरप्रधानानपिवहुविषया नाश्रित्यसुदूरमारोहति । येनते-विषयाविस्तरेणवर्ण्यमानाः काव्यरसस्यास्वादेपरिपन्थिनोभवंति । यथावा माघकिरातयोः सुराङ्गना-विलास रेवतकवर्णनयोः। अङ्गि-नोऽनुसंधानमपिनैषधे श्रीहर्षोनविदधेयथा नलस्य सौन्दर्यस्थैर्य-माधुर्यप्रभृतिगुणान्भूयोभूयोवर्णयन्नपि स तस्यराजगुणानुदारता महानुभावतादीनधिकृत्यमौनमानशे । किञ्च भीमः स्वयंवरानन्तरं

सुतया सहान्तःपुरं प्रविश्य नलंवृतवत्या स्तस्या उचितकारितां स्वभार्यायैकथयति। परन्तु हर्षचरिते वाणेनेव राज्याः काश्चिदपि प्रवृत्तयोनवर्णिताः श्रीहर्षेण। अनौचित्यन्तुसर्वथारसंवृथाकरोति यथाहमहिमा—"अनौचित्यनिवन्धनंहि परंरसभङ्ग कारणं वदन्ति कवय इति। तदपिनैषधेयथास्वयंवरसभायां त्रैलोक्य वासिना-मागमनं, वासुकि प्रभृतीनांफणागणस्तेषांचदमयन्त्यांसात्विक-विकारस्याविभावः। ईदृशैरथैंरसत्यताप्रतिभासेन विनेयोन्मुखी-काराभावः। यावतात्वनौचित्येनाश्लील श्रृङ्गारादिविषयोपस्था-पनादिना, अनुमेयानांवाच्यवृत्त्या विशङ्क मुद्घाटयवर्णनादिना-वा रसस्य परिपुष्टिस्तावत्त् नवार्यते रसप्रतिकूलस्पैव तस्यनिषेध्य-त्वात्। यथानैषधएव—

'वेश्मपत्युरविशन्नसाध्वसाद्वेशितापिशयनंनसाभजत्।
भाजितापिसविधे नसास्वपत् स्वापितापिनचसंमुखाऽभवत्।
'चुम्बितंनमुखमाचकर्षयत् पत्युरन्तरमृतंववर्षतत्।
सानुनोद न भुजं तदर्पितं तेन तस्यकिमभून्नतर्पितम्॥

कविनासर्वात्मनारसपरतन्त्रेणभवितव्यमित्यस्य प्रघट्टकस-तात्पर्यम्। इदानींपूर्वोक्तदोषाणामदोषत्वंनिगमयन्ति—

पदवाक्यतदर्थेषुयेदोषाः पूर्वमीरिताः।
तेषां क्वचिददोषत्वमिष्यते काव्यकोविदैः॥६॥

क्वचिदिति। यत्ररसोत्कर्षापकर्षकाटित्वाभावस्तत्रेत्यर्थः। अनुप्रासेषुनोकष्टम्। यथानैषधे—'आचष्टविस्पष्टमभाषमाणाम्

'तत्याजतोषं परपुष्टघुष्टे । इत्यादौ । परपुष्टघुष्टे कोकिलकूजिते, स्पष्टमन्यत् । अत्र टकारणकारादिवर्णाः कर्णविदूषका अपि अनुप्रासमहिम्ना नाम्नातादूषकतया ।

श्लेषादौनाप्रयुक्तता ।

आदिनानुप्रासादिसंग्रहः ।

यथानैषधे — 'तत्कण्ठमालिङ्गयरसस्यतृप्ताम् ।

तस्यनलस्य,कंण्ठंग्रीवामालिङ्गयान्यत्र मुखमालिङ्गयपरिचुम्ब्य, रसस्य रागस्य तृप्तां सन्तुष्टां, पक्षे-रसस्य शृङ्गारादेः तृप्तांपरिपुष्टामित्यर्थः । अत्र शृङ्गारादिरसपक्षेरसशब्दः कविभिर्नप्रयुज्यते विभावादिद्वारैवतस्याभिव्यक्तिस्वीकारादितिप्रागपि निवेदित मस्माभिः परमत्रतत्प्रयोगोनदुष्यति श्लिष्टत्वात् । यथावा मम दुर्गाभ्युदये- 'देवीस्तोतुर्जगद्वश्यंसर्वेनश्यन्त्युपद्रवाः ।

मानं धनञ्च सत्पुत्रं कलत्रं भवति ध्रुवम् ॥

अत्र "नपुंसकोऽपिपुंलिङ्गोमानशब्दोनदुष्यतीतिभाष्यान्मानशब्दः क्लीबोऽपिकविभिः पुंस्येवप्रयुज्यते, परमत्रानुप्रासवशान्नदोषाय । एवं "प्रतिष्ठासौकरीविष्ठागौरवंघोररौरवम् । अभिमानंसुरापानंत्रयंत्यक्त्वासुखीभवेत् ॥ इत्यादावपिबोध्यम् ।

मिथःस्तुतौ न संदिग्धम् ।

यथानैषधे—'चेतोनलं कामयते मदीयम् । अत्र "नलंकामयते" इत्यादीनिपदानिप्रथमार्थकानि आहोस्विद् द्वितीयार्थकानीतिसन्देहात्सन्दिग्धानि । तथापियोग्यतयोभयपक्षनुकूलार्थनिर्णयाद्व्याज-

स्तुतिनिर्वाहकतया गुणतां लभन्ते न दोषताम्। व्याजस्तुतेरलंकारस्यभावोत्कर्षकत्वेनगुणत्वात्।

न व्यर्थं यमकादिषु ॥७॥

आदिपदादनुप्राससंग्रहः। यमकस्य यथा नलोदये—

'पिकोपिकोपिकोपिको वियोगिनीरभर्त्सयत्।

कोपिकश्चन, कोप्येवकोपवानेव कोपिकः स्वार्थेकप्रत्ययः। पिकः कोकिलोपि, वियोगिनीः स्त्रीः 'ऋन्नेभ्योङीप्। अभर्त्सयत् अपकृतवान्। भर्त्सनंत्वपकारगी रिति कोषात्। अनुप्रासस्ययथाऽस्मन्मित्रभट्टमथुरानाथस्य साहित्यवैभवे—

'राजतिनीलपटान्तरितमेतन्मुखमवधेहि।
ध्रुवंकलानिधिरुल्लसति कालिन्दीसलिलेहि॥

अवधेहि=सावधानमवलोकय, कलानिधिश्चन्द्रः। कालिन्दीसलिले जले, स्पष्टमन्यत्। अत्रकह्योर्नव्यर्थत्वम्॥७॥

नाश्लीलंभगवत्पादौ।

विवक्षितार्थस्य-प्रसिद्धत्वादश्लीलार्थानुपस्थितेः। उक्तंच-

"भगिनीभगवत्पादशिवलिङ्ग गुह्यादिषु।
अभिप्रेत कुमार्यादावश्लीलं नैवदुष्यति॥

अत्राश्लीलचतुष्टयम्। संवीतादिकमप्यश्लीलंनदुष्यति। यदाहुः

"ग्राम्यंघृणावदश्लीलामङ्गलार्थं यदीरितम्।
तत्संवीतेषुगुप्तेषुलक्षितेषु न दुष्यति॥

तत्र "योषित्सु या वीर्य निषेक भूमिरित्यादिसंवीतम्। अनादिपरम्परया सर्वजनव्यवहार्यत्वंसंवीतम्। असभ्यार्थेऽप्रसिद्धं गुप्तम्।

यथा-संवाधादिपदम् । लक्षणया स्त्रीचिह्नबोधकंलक्षितंयथा-'जन्म-भूमिः । एवंशान्तवीभत्सादिरसेऽव्यंग्येऽप्यश्लीलंनदुष्यति । शान्त-रसेयथा-'उत्तानोच्छून मण्डूकपाटितोदरसंनिभे । क्लेदिनिस्त्रीव्रणेशक्तिरकृमेः कस्य जायते ॥ अत्रस्त्रीव्रणादिपदानिनदुष्यन्ति । वीभत्सेयथा मालतीमाधवे—'प्रेतरङ्कः करङ्कादित्यादौ ।'

र्द्वयोर्नाप्रतीतकम् ॥

वक्तुःश्रोतुश्चद्वयोरपिज्ञत्वेसतीत्यर्थः । यथाकुमारसंभवेब्रह्मा-णंप्रतिदेवानामुक्तौ—

'त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शनमुदासीनं त्वामेव पुरुषं विदुः ॥

त्वांब्रह्माणं, प्रकृतिं मायां, मायांतुप्रकृतिंविद्यादितिश्रुतेः । आमनन्तिकथयन्ति, तद्दर्शनंप्रकृतेर्द्रष्टारं त्वामेवोदासीनम् । "असङ्गोह्ययंपुरुषइतिश्रुतेः । गुणकर्तृत्वेऽपितथा कर्तेव भवत्यु-दासीन इतिसांख्यस्मृतेश्च, पुरुषं पुरुषपदवाच्यमीश्वरं विदुर्विदंति, विदोलटोवेतिभेर्जुस् । तत्त्वमस्यादि (छा०) श्रुतिवाक्यैरैक्य-श्रवणादितिभावः । अत्रप्रकृतिपदंप्रधान परं पुरुषपदंचपरमात्म-वाचकम् । "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वर इति-योगसूत्रात् । तौ च सांख्ययोगयोः प्रसिद्धौतदभिज्ञसर्वज्ञ-ब्रह्मणिनदोषः ।

नानुप्रासे हतं नापिलक्षणादाववाचकम् ॥ ८ ॥

हतं निहतार्थ मनुप्रासे न दुष्टम् । यथामाघे—'पततपतङ्ग प्रति-मस्तपोनिधिः । अत्र पतङ्गशब्दः शलभेप्रसिद्धोऽपि अनुप्रास-

महिम्ना सूर्यार्थेऽपि न दुष्यति । लक्षणादावत्राचकदोषो न लक्षणादे-रशक्य एव वृत्तित्वादित्यलंकारशेखरकारः । यथा—'गङ्गावासी समागतइत्यादौ । गङ्गातटवासीतितदर्थः । गङ्गापदस्यतटोर्थस्तुन-भवति । 'अनन्यलभ्यः शब्दार्थ इतिन्यायेन लक्षणयैवप्रतिपत्त-संभवादितिप्रागप्यवोचाम, गङ्गात्वेन प्रवाहे निवासबाधबुद्धेः गङ्गात्वप्रकारकप्रवाहविशेष्यक निवासान्वयबुद्धित्वमेवप्रतिबध्य-तावच्छेदकम् । नतु गङ्गात्वप्रकारक तटविशेष्यक बुद्धित्वमिति।

प्रतीत्यबाधान्नन्यूनम् ।

यथास्तुतिकुसुमाञ्जलौ—'किमविनाशि विना शिव सेवनम्। अत्र—" अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीतिभाष्योक्तेः । अस्तीतिक्रियापदस्यझटिति प्रतीतेर्नदोषः । यथावामम-'अनेकेभ्रातरोलोके गेहेगेहे तथापिनो ।

अग्रजो मूलचन्द्राभो नेकीराम समोऽनुजः ॥

अत्रास्तामित्यादिक्रियापदस्य झटितिप्रतीतिः ।

पादभेदेविसन्धिन ।

दूषणापेक्षयाक्लीवत्वमेवमग्रस्तात्पुरस्ताच्च । यथा—

'यदिगर्जति गोमायुः सिंहस्याग्रेतथापिन ।

कोपमाप्नोतिपञ्चास्य असदृक्षेषुकिंबलम् ॥

गोमायुःशृगालः । पंचं विस्तृतमास्यमस्येति पञ्चास्यः सिंहः असदृक्षेषु असमानबलेष्वित्यर्थः । किंबलंकुत्सितमेव "अनुहुंकु-ते घनध्वनिं नहि गोमायुरुतानि केशरीति भारविकव्युक्तेः

अत्राभिन्नपादतया सन्ध्यभावो न दुष्यति ... पिबोध्यम्

समस्तेयतिभङ्गो न ।

यथानैषधे—'विललासजलाशयोदरे ।

ख्यातेऽर्थेन विहेतुता ॥ ६ ॥

यथामम—'पुष्पेषुमल्लीनगरीषुदिल्ली । सर्वश्रेष्ठेतिशेषः । यतश्चनिर्धारणमितिसप्तमी । निर्धारणविषये एकवचनंत्वसाध्वितिकारकेइतिसूत्रभाष्येस्पष्टम् । अत्रभारतराजधानीत्वादिहेतुः ख्यातएवेति निर्हेतुतानदोषः ।

नान्यवाक्ये समासत्वम् ।

वाक्यभेदेसमासपुनरात्तंनदोषः । यथारघौ—'नकिलानुययुस्तस्यराजानोरक्षितुर्यशः । व्यावृत्तायत्परस्वेभ्यः श्रुतौतस्करता स्थिता ॥ परस्वेभ्यः परद्रव्येभ्यः, श्रुतौशब्दएवनस्वरूपे—"अत्यन्तासत्यपिह्यर्थे ज्ञानंशब्दः करोतिहि । इतिखाद्यखण्डनोक्तेः ।

ग्राम्यत्वंनहसोक्तिषु ।

यथानैषधे 'स्थितेऽपिकूरे मुहुरेवयाचते ।
अत्रकूर शब्दो ग्राम्योपि हास्योक्तौ नदुष्टः ।

अनुकारेतुसर्वेषांदोषाणांनैवदोषता ॥ १० ॥

यथमम --'प्रन्न तेऽयंदुराचारोभारोमां खलु वाधति । अत्रवाधतीतिक्रियापदस्यपरस्मैपदित्वं न दुष्यति । दूषकतावीजस्यश्रोतृवैमुख्यादेरत्राभावात् । इति तृतीयोविन्दुः ।

रीतयश्चगुणाः प्रोक्ताः काव्यशोभाकरायतः ।
ततस्तासां च तेषांच क्रियते लक्षणंमया ॥ १ ॥

काव्यशब्देन स्वशरीरभूतौशब्दार्थौं स्वात्मभूतारसादयश्चबोध्या। तथाचद्वयोरपीदंलक्षणंपर्यवस्यति-परम्परया रसाद्युत्कर्षजनकत्वे सति शोभाजनकत्वं रीतित्वम्। नच व्यवधानेनकार्यजनकेजनकत्व व्यवहाराभाव इतिवाच्यम्। व्यवधानेनाप्यनुमित्यादिजनकेव्याप्त्यादिज्ञाने जनकत्वव्यवहारदर्शनात्। साक्षाद्रसोत्कर्षजनकत्वेसति शोभाजनकत्वं गुणत्वम्। लक्षणस्यचोपयोगः प्राचीनैरेवाभिहितः "लक्षणप्रमाणाभ्यांहि वस्तुसिद्धिर्भवति नान्यथेति। तत्रलक्षणम-साधारणधर्म उच्यते। लक्ष्यतावच्छेदक समनियतत्व मसाधारणत्वम्। समानासमानजातीयव्यवच्छेदकंवालक्षणम्। प्रमितिकरणतावच्छेदकंचप्रमाणमित्यलमनल्पजल्पनेन ॥ १ ॥

तत्तद्रसोपकारिण्यः तत्तद्देशसमुद्भवाः ।
ष्वेषुरीतयोगौड़ीवैदर्भीलाटिकास्तथा ॥ २ ॥

तत्तदिति, वीरशृङ्गाराद्भुतादीत्यर्थः। सर्वादिमेकाव्यालंकारप्रबन्धेभामहेन—"गौड़ीयमिदमेतत्तु वैदर्भमिति किंपृथक्। इत्यादिनारीतिर्मनाक्स्पृष्टा। उद्भटदण्डिरुद्रटैः।

स्वस्वप्रबन्धेषुयथाशक्यंपरीक्षिताः। गौड़विदर्भलाटदेशोद्भवैः कविभिः सम्मतत्वाद्यथायथंसंज्ञात्रयम्। वामनालंकारेऽप्युक्तं "गौड़ विदर्भादिषुदृष्टत्वात्तत्तत्समाख्या इति। नपुनर्देशैः किंचिदुपक्रियतेकाव्यानामिति। गौड़देशः कुरुक्षेत्रप्रान्तं, गौड़ानांतस्यैवादिजन्मभूमित्वा दित्यैतिहासिकाः। भगवद्गौड़पादादिनिबन्धेषु तथैवोक्तेः। नागपुरादिर्विदर्भदेशः। मालवात्पश्चिमेनलाटदेशः ॥२

गौड़ीदीर्घसमासास्यादनुप्रासान्वितातथा ।
अल्पवृत्तिस्तुवैदर्भी लाटिका मृदुभिः पदैः ॥३॥

तत्रगौड़ी—गाढतरव्युत्पत्ति—सहृदयतानिपुणीकृतान्तः करणैरेव कविभिर्निर्मिताभव्यतामाधत्ते नेतरैः। यथाममदुर्गाभ्युदये 'यत्पूजनीयकमनीयपदारविन्द प्रस्यन्दमानमकरन्दजुषांनराणाम्। किंकार्यमार्यकरणीयमसाध्यमास्तेनोसाध्यते खलुयदत्रपरत्रलोके ॥ यत्तु हर्षचरितेवाणेन गौड़ेष्वक्षरडम्बरइत्युक्तं तत्रयद्यक्षरडम्बरस्तत्वशून्योविवक्षितस्तेषांतदापक्षपातित्वंतस्यशब्दतत्वज्ञानांगौड़महाकवीनांतत्वशून्यतायाः पामरेणापिसंभावयितुमशक्यत्वात्। सतत्वश्चेन्महागुणः। वैदर्भीनैषधकारेणश्रीहर्षमिश्रेण—"धन्यासिवैदर्भिगुणैरुदारैर्ययासमाकृष्यतनैषधोऽपीत्यादिनाव्यञ्जनयाबहुप्रशंसिता। तत्र—वैदर्भीदमयन्तीरीतिश्च। नैषधोनलः, पक्षे नैषधमस्यास्तीत्यर्श आद्यचिलक्षणयावानैषधकारः। उदाहरणंयथातस्यैव—'चलन्नलंकृत्यमहारयंहयं स वाहवाहोचितवेशपेशल इति। यथा वाममदुर्गाभ्युदये—'अपारसंसारसमुद्रमध्ये निमज्जतां या शरणागतानाम्। विनाश्यदुःखान्यखिलानिकामं दत्ते निकामंभुविभावुकानाम् ॥ याभगवतीदुर्गा, काममभिलाषं, निकामंयथेच्छं, स्पष्टमन्यत्। लाटिका तु लक्षणेनैवकृतबहुप्रशंसेतिकृतमस्याः प्रशंसया। उदाहरणंनैषधे—'नलिनंमलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे। तदीक्षणेदमयन्तीलो चने नलिनंकमलंमलिनं कुर्वाणे, पृषतींमृगीमस्पृशती, असमानत्वादूरतएवपरिहरन्तीत्यर्थः। यथावाममसुलतानचरितकाव्ये-'निस्तन्द्र चन्द्रवदनाःसदनानिहित्वा

सद्यः समीयुरखिला महिलाः क्षणेन। क्षणेन हर्षेण कालेन···
अपवर्गे तृतीया, अपवर्गः फलप्राप्तिरिति कौमुदीकारः। समा···
रीतिवार्तागुणाननुवर्तामहे। भोजः गुणान्प्रकृत्याह—"रीतिगु···
मपिश्रव्यं न काव्यं गुणवर्जितम्॥ अपर आह—"शब्दार्थ···
र्निबन्धैः किं गुणो यदि नविद्यते। विक्रीयन्तेनतनुभिर्गावः···
विवर्जिताः॥ तान्विभज्याह—

गुणामाधुर्यमोजोऽथ प्रसाद इति ते त्रिधा।
चित्तद्रवीभावमयोह्लादोमाधुर्यमुच्यते॥ ४॥

सहृदयहृदयद्रवीभावरूप आनन्दविशेषोमाधुर्यम्। यत्···
काव्यप्रकाशकृत आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणमि···
शृङ्गारादिष्वनुभवसिद्धमेवाह्लादजनकत्वं तदेव माधुर्यमि···
तात्पर्यम्। दर्पणकार-विश्वनाथमते—आह्लादजनकत्वापेक्षया···
आह्लादत्वस्यैवमाधुर्यपदशक्यतावच्छेदकत्वमुचितम्। वामन···
'पृथक्पदत्वंमाधुर्यमित्याह। माधुर्यमक्षरव्यक्तिरितिभगवान्पा···
ध्वनिकृताप्युक्तम्—"शृङ्गारएवमधुरः परः प्रह्लादनोरसः। त···
यंकाव्यमाश्रित्यमाधुर्यं प्रतितिष्ठति॥ भामहस्तु-श्रव्यत्वंमाधु···
लक्षणमाह तन्न। ओजः प्रसादयोरपितत्सत्त्वेनातिव्याप्तेः।···
भास्करस्तु-श्रव्यत्वंमाधुर्यस्यलक्षणमाहेति प्रदीपकारोक्तंपरा···
भास्करस्यकस्यापिसाहित्यग्रन्थस्यानुपलम्भात्। भामह-ग्रन्थे···
लक्षणोपलम्भाच्च।

सम्भोगे करुणे विप्रलम्भेशान्तेऽधिकं क्रमात्।

हास्यादेरपगमेनात्यन्तद्रुतिहेतुत्वादितिभावः। संभो···

शब्दा उपलक्षणानि, तेनसंभोगाभासादिष्वपि माधुर्यस्यस्थिति र्नविरुध्यते । संभोगादीनां पूर्वपूर्वमपेक्ष्ययथोत्तरमुत्कर्षातिशय-जनकत्वं सहृदयहृदयावर्जनात्। ओजोलक्षयति—

ओजश्चित्तस्य विस्तार रूपंदीप्तत्व मुच्यते ॥५॥

दीप्तत्वमोजः। तच्च चित्तस्यविस्ताररूपम्। चित्तविस्तारोवीरादि रसास्वादेन जायमानश्चमत्कारोबोधः। काव्यप्रकाशकारो मम्मटस्तु -'चित्तविस्तार रूप दीप्तत्वजनकमोज इत्याह।तदसत्।

वीरादिरसेभ्यो जायमानदीप्तत्वस्यैवोजः स्वीकारेणोपपत्तौ तज्जनकत्व रूप धर्मान्तर कल्पने गौरवात् ॥५॥

वीर वीभत्स रौद्रेषु क्रमेणाधिक्यमस्यतु।

अस्येत्योजसः। वीरे जिगीषैव, वैरिवशीकरणमात्रस्योद्देश्यत्वात्। वीभत्से जुगुप्सितविषयेतितिक्षा। रौद्रे त्वपकारिणि जिघांसेति सुतरां क्रमशोदीप्तेराधिक्यम्। पूर्ववद्वीरादिशब्दानां वीराभासाद्युपलक्षणत्वमवधेयम्॥ प्रसादं लक्षयति—

शुष्केन्धनाग्निवत्स्वच्छ जलवत्सहसैवयः ॥६॥

व्याप्नोत्यन्यत्प्रसादोऽसौसर्वत्रविहितस्थितिः ॥

असावितिसइत्यर्थः। इदमेतददःशब्दाः कचित्तच्छब्द समानार्था इतिवृद्धोक्तेः। अग्निर्यथा शुष्केन्धनं, यथाचविमलंजलंसितां तद्वद्यश्चित्तंव्याप्नोति, स प्रसादः। सर्वत्ररसेषुरचनासु च कृतस्थितिरित्यर्थः। रचनापक्षेसर्वनाम्नोवृत्तिमात्रे पुंवद्भाव इतिभाष्यात्पुंवद्भावः। वीररौद्रादिषु शुष्केन्धनाग्निवत्, शृङ्गारकरुणादिषु स्वच्छजलवदिति। स्थितिश्चास्य-रसेष्वाधेयतया रचनासु च व्यंग्यतयेतिविवेकः॥६॥

गुणवृत्यापुनस्तेषां वृत्तिः शब्दार्थयोर्मता ॥७॥

तेषां माधुर्यादिगुणानां शब्दार्थवृत्तित्वं=मधुरःशब्दोमधुरोऽर्थ इतिव्यवहारो गुणवृत्योपचारादेव, आत्मगुणानां शौर्यादीनां शरीरवृत्ति त्व मिव. आत्मनिष्ठस्यसुखादेर्ममदेहः सुखीत्येवंशरीरनिष्ठत्वेनोपलंभइवशरीरस्यसुखाद्यधिकरणतावच्छेदकत्वात् । अर्थात्—माधुर्यादिगुणानांरसैकनिष्ठत्वेऽपि परम्परासम्बन्धेन रसाभिव्यञ्जकशब्दार्थ निष्ठत्वम् । यत्तु रसगङ्गाधरकारेण—"शब्दार्थयोरपिमाधुर्यादेःसत्वादुपचारोनैवकल्प्यइत्युक्त', तदसत् । क्वचिन्नीरसे शब्दार्थयोःसत्वेऽपिमाधुर्यादेरनुपलम्भात् । रसान्वयव्यतिरेकानुविधायित्वेन रसधर्मत्वकल्पनस्यैवोचित्यात् । यच्चतेनदृष्टान्तभूतस्य आत्मनोनिर्गुणत्वात्तत्रगुणानांस्थितिरनुचितैवेतिप्रलपितं, तदपिनविचारसहम् । वेदान्तनयेऽपिव्यावहारिकस्यात्मनः सगुणत्वात् । अतएव न्याये वैशेषिकेचात्मनोगुणाः स्वीक्रियन्ते । प्रतिपादितं चैतदस्माभिर्न्यायसूत्रवृत्तौविस्तरेण । अयमत्रविवेकः "गुणाःशौर्यादिवद्रीतिरङ्गसंस्था विशेषवत् । हारादिवदलङ्कारा दोषावधिरतादिवत् ॥७॥ ननुवामनादयः—"श्लेषःप्रसादः समता माधुर्यंसुकुमारता । अर्थव्यक्तिरुदारत्व मोजः कान्तिसमाधयः ॥ इतिदशशब्दगुणान्दशैवचैतन्नामकान् भिन्नलक्षणांश्चार्थगुणानामनन्तिकथंभवता त्रयएवमताइत्याशंक्याह—

केचिदन्तर्भवन्त्येषुदोषत्यागात्परेश्रिताः ।
अन्येभजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥८॥

अयमर्थः—वामनोक्ता दशगुणा । अथा व्यवतिष्ठन्ते तथापि श्ले-

षोदारताप्रसाद समाधीना मोजोव्यञ्जकघटनायामन्तर्भावः । चतुर्णामप्येषांगाढबन्धतया दीप्ति हेतुत्वात् । माधुर्यन्तु तेषामस्मदभ्युपगतमाधुर्यव्यञ्जकमेव । समतातु—सर्वत्रैकरूपानुचितैवप्रतिपाद्योद्भटत्वानुद्भटत्वाभ्यामेकस्मिन्नेव पद्ये मार्गभेदस्येष्टत्वात् । अन्यथावक्तृवाच्याद्यौचित्येनरचनाद्यौचित्यं भज्येत । ग्राम्यत्वकष्टत्वदोषयो स्त्यागात्कान्ति सौकुमार्य योर्गतार्थता । कान्तिसुकुमारतेलक्षितेभोजेन—"यदुज्ज्वलत्वं बन्धस्य काव्ये साकान्तिरुच्यते । अनिष्ठुराक्षरप्रायं सुकुमारमितिस्मृतम् ॥ प्रसादगुणेनचार्थव्यक्तेः प्रसादस्यतद्व्यंग्यत्वादिति । एवमर्थगुणानांमध्येश्लेष ओजोभेदाश्चवैचित्र्यमात्ररूपा अनन्यसाधारणरसोपकारित्वातिशयविरहात् । अन्यथाप्रतिश्लोकमर्थवैचित्र्याद्गुणभेदापत्तेः । प्रसाद माधुर्य सौकुमार्योदारतासमता साभिप्रायत्वात्मकौजः प्रकारार्थव्यक्तिकान्तयश्चानवीकृतत्वामङ्गलरूपाश्लील ग्राम्य भग्नप्रक्रमापुष्टार्थरूपाणांदोषाणांत्यागेन, स्वभावोक्त्यलङ्कारस्यरसध्वनिरसवदलंकारयोश्चस्वीकारेणगतार्थाः । समाधिस्तु—कविगतः काव्य शरीरकारणंनतुगुणः प्रतिभाया अपि काव्यगुणत्वापत्तेरितिरसगङ्गाधरकारः । काव्यालंकारे भामहेनापि—"माधुर्यमभिवाञ्छन्तः प्रसादंचसुमेधसः समासवन्तिभूयांसि नपदानि प्रयुञ्जते ॥ केचिदोजोऽभिधित्सन्तःसमस्यन्तिबहून्यपि । इत्येवंत्रयएवगुणाउपादीयन्ते । उद्भट रुद्रटाभ्यान्तुनैवमपिगुणागुण्यन्ते आक्षेपाद्गण्यन्त इत्यन्यदेतत् । सम्प्रति माधुर्यादिगुणव्यञ्जकाः समासादयोदर्श्यन्ते—

अवृत्तिरल्पवृत्तिर्वा माधुर्येरचनामता ।

असमासामध्यमसमासावारचनामाधुर्येभवति । यथानैषधे 'निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते नवुधाःसुधामपि । नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसांमहोज्ज्वलः ॥ यथावाप्रसन्नराघवे—

'चन्द्रे च रामचन्द्रे च नारीणां दृगञ्चले ।
नीलोत्पलसुहृत्कान्तौ कस्यनामोदतेमनः ॥

यत्त्वत्ररसगङ्गाधरकारेण—"लोलालकेति ।" मुदामुदारामुल्ल सयन्त्वित्यादिचपद्यद्वयमुदाहृतं तन्नमधुरम् । लोलेति, मुल्ल, इतिच पद्यांशद्वयस्यव्रीडाजुगुप्साव्यञ्जकत्वेनसन्धावश्लीलदोषदुष्टत्वात् । यदपिच तेन तत्तद्गुण रचना परिचयार्थं किमपिवर्जनीयत्वमुक्तं तदपिव्यर्थमेव स्वकपोलकल्पितनियन्त्रणस्य कव्यसम्मतत्वात् ।

समासस्यचबाहुल्यं गुम्फ उद्धत ओजसि ॥ ९ ॥

ओजोगुणेसमासस्यप्राचुर्यमुद्धटरचना च । यथानैषधे— 'त्तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं निर्वाणारिप्रतापानलजमिवसृजत्येष राजा रजोभिः । यथावा—

'उद्वृत्तमत्तदैत्यन्द्र हत्याविक्तनखोद्भटः ।
दंष्ट्राकटकटात्कार क्रूरवक्त्रोऽवताद्विभुः ॥

उद्वृत्तमत्तदैत्येन्द्रस्य=हिरण्यकशिपोर्हत्यायां विक्तानिपुणानि नखास्तैरुद्भटः द्रंष्ट्रायाः कटकटात्कारेण, दंशोर्दाम्न्नीतिष्ट्रन् । अजादित्वाट्टाबितिशेखरकारः । अजादिराकृतिगणस्तेन नमुनइतिसूत्रे टामादेशइति भाष्यप्रयोगः सङ्गच्छते । भयंकरं वक्त्रं यस्यतादृशोविभुर्भगवान्नृसिंहावतारः। भगवतान्नृसिंहस्यनखानांवज्रोपमत्वंद्रंष्ट्रायास्तीक्ष्णत्वं वेदेप्युक्तम्—"वज्रनखाय विद्महे तीक्ष्णद्रंष्ट्रायधीमहि

नरसिंहः प्रचोदयात्। इतितैत्तिरीयश्रुतेः। अवताद्रक्षतुप्रार्थनेलोट्॥ ९॥

प्रसादेघटनाज्ञेयाश्रुतमात्रार्थबोधिका।

शब्दश्रवणानन्तर म विलम्बेनार्थ वोधयित्री रचनाप्रसादस्य। दण्डीत्वेनमेवं प्रशंसति। "अयंसर्वरसव्यापी काव्यजीवातुरिष्यते। अनेन नविनासत्यं स्वदतेकाव्यपद्धतिः॥ रसगङ्गाधरकारेण प्रसादस्य 'वाचानिर्मलया सुधामधुरया यां नाथ शिक्षामदा इतिपद्यमुदाहृतं तत्र 'शिक्षामदा' इत्यादिपदानां भ्रमजनकत्वान्नप्रसादकत्वम्। यतोऽत्रत्वं शिक्षाम् अदा इतिछेदंविना श्रुति-मात्रतोऽर्थवोधोनजायते प्रत्युत शिक्षायामदाः शिक्षामदा इत्यर्थो झटितिप्रतीतोभवतीति मूढमदृशावसातव्यं प्रसादगुणगुम्फन चातुरीधुरीणैः।

अयन्तुमदीयः श्लोकः तत्प्रशंसात्मक उदाहरणमहतिभवितुम। 'पण्डितेन्द्रोजगन्नाथशर्मानिर्माणकौशलात्। रसगङ्गाधरंकृत्वा रसगङ्गाप्रवाहयत्॥ प्रवाहयत्=देशदेशान्तरस्थविद्वत्सु प्रापयत्। देशांतरप्रापणंवहेरर्थ इतिभाष्योक्तेः। अकर्मका अपि वै सोपसर्गाण्यन्ताश्चसकर्मका भवन्तीति भाष्यकैयटयोः स्पष्टम्। यथावानैषधे —'तदहंविदधे तथा तथा दमयन्त्याः सविधे तव स्तवम्। हृदयेनिहितस्तदाभवानपिनेन्द्रेणयथापनीयते॥

रचनावृत्तिवर्णाना मन्यथात्वमपीष्यते॥ १०॥

रचनादीनां गुणव्यञ्जकत्व नियमऔत्सर्गिकोवक्तृवाच्यप्रबन्धौचित्येनक्वचिदन्यथाभवनस्यापीष्टत्वात्तथाहि—कथायां रौद्ररसेऽपिनात्यन्तमुद्धतारचना, वर्णनीयस्यसुखप्रतिपत्त्युद्देश्यत्वात्।

नाटकादौ वीरादिरसेऽपिनदीर्घसमासोनाटकादेःसर्वसाधारणार्थं-
क्रियमाणत्वात्। उत्तरचरित प्रसन्नराघवा नर्घराघवादिषुत्वेष-
दोषः प्रचुरो वरिवर्त्ति। आख्यायिकायां शृङ्गाररसेऽपिनकोमल-
वर्णाः तस्यांहि गद्यस्य प्राधान्याद् गद्ये च विकटवर्णत्वस्यैवाभ्यर्हित-
त्वात्। सर्वमेतदनुसन्धायैवनिवद्धव्य मितितात्पर्यम्। अनुसन्धान
शून्यस्यभूषणंदूषणायते' इति काव्यमीमांसायां राजशेखरोक्तेः।
स्थानेनिवेशितं सर्वं तनुते रमणीयताम्। अस्थानेतु न तद्भाति
मेखलेव गलेकृता॥ इति कवि-कण्ठाभरणे क्षेमेन्द्रोक्तेश्च।
यत्त्वत्ररसगङ्गाधरकारेण रचनादीनांगुणा भिव्यञ्जकत्वमेवनरसा-
भिव्यञ्जकत्व मित्युक्तंतदयुक्तम्। "गुणानाश्रित्य तिष्ठन्ती माधुर्या-
दीन्व्यनक्तिसा। रसांस्तन्नियमेहेतुरौचित्यंवक्तृवाच्ययोः॥ इति-
ध्वनिकारोक्तिविरोधात्। नह्यत्रध्वनिकारविरुद्धा वाच आद्रियन्ते
वाचस्पतेरपि। इति साहित्यविन्दौ चतुर्थोविन्दुः॥

अथ पञ्चमोबिन्दुः।

काव्यशोभाकराः प्रोक्ता अलंकारामनीषिभिः।
ते मयापि प्रदर्श्यन्ते शब्दस्यार्थस्यभेदतः॥१॥

काव्यशोभा काव्योत्कर्षः। काव्यशब्देन काव्यशरीर भूतौ-
शब्दार्थौ काव्यात्मभूतोरसश्चवोध्यस्तैर्विनाकाव्यस्य महाकाव्य-
त्वालाभात्। श्रीकण्ठचरितेमंखेनाप्युक्तम्—"तैस्तैरलंकृतिशतैर-
वतंसितोऽपि रूढोमहत्यपिपदेधृतसौष्ठवोऽपि। नूनंविनाघनरस-
प्रसराभिषेकंकाव्याधिराजपदमर्हतिनप्रवन्धः॥ भेदतोभेदेन,आद्या-
दित्वात्तसिः। तत्रगुणाः साक्षात्संवन्धेनरसमुत्कर्षयन्ति। अलंकारास्तु-

परम्परासंवन्धेनेतिभेदः। गुणापेक्षयालंकारावहूत्कर्षयन्तिकाव्यमि-तिचन्द्रालोककारोक्तिस्तु-सर्वानुभवविरुद्धत्वाद् राग्रहग्रस्तैवेतिवोध्यम् अलंक्रियतेऽनेनेतिकरणव्युत्पत्यालंकारशब्दः शब्दार्थालंकारवोधकः। शब्दार्थगततत्वनिर्णयस्त्वन्वयव्यतिरेकाभ्यामेव। रसगङ्गाधरे-हृद्यत्वेसत्युपस्कारकत्वमलंकार सामान्यलक्षणमुक्तम्। तत्रोपस्कारकत्वोक्तिर्व्यर्था । हृद्यत्वमात्रस्यैवालंकारलक्षणत्वोपपत्तेः। शब्दाधिक्यादर्थाधिक्यस्य लक्षणकारैरुपहसितत्वाच्च। हृद्यत्वंच चमत्कारजनकत्वं चमत्कार आनन्द विशेषः सहृदयहृदय प्रमाणकः। अतएव साहित्यसारेऽलंकारसामान्यलक्षणमिदमुक्तम्।

"रसादिभिन्नत्वे शब्दविशेषश्रवणोत्तरम्।
चमत्कारकरत्वंयदलङ्कारत्वमत्रतत्॥

तार्किकाइदमेवलक्षणमेवमाकलयन्ति-रसादिभिन्नव्यंग्यभिन्नत्वेसति शब्दार्थान्यतर निष्ठा या विषयितासम्वन्धावच्छिन्नाचमत्कृतिजनकतावच्छेदकतातदवच्छेदकत्वमलंकारत्वमिति । तत्र-प्रथमंसहृदहृदयाह्लादकरान्शब्दालंकारान्विभजते—

चित्रवक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः।
प्रश्नोतरंचयमकमष्टशब्दगताश्चते ॥२॥

शब्दगताः शब्दनिष्ठाः, चेन दर्पणोक्तभाषासमस्य संग्रहः। तदाऽलंकाराणांपरामर्शः । बुद्धिस्थविषयतावच्छेदकत्वोपलक्षित धर्मावच्छिन्नेतदादिशक्तेः। अधिकमन्यत्रप्रपञ्चितम्॥ तत्र—

खड्गाद्याकृति हेतुत्वंवर्णानांचित्रमुच्यते।

यत्ररचनाविशेषेण वर्णाः खड्गाद्याकारं प्रकाशयन्तितच्चित्र

मलंकारः। नचशृङ्गाराद्यनुपकारकस्यास्य कथमलंकारत्वमितिशंकनीयम्। कविप्रतिभाप्रकाशनेन चमत्काराभासजनकत्वात्। अद्भुतरसोपकारकत्वाद्वालंकारत्वोपपत्तेरितिसकलमकलङ्कम्।

अस्यवहुभेदारुद्रटालंकारेद्रष्टव्याः। खड्गवन्धस्तत एवोदाह्रियते—'मारारिशक्ररामेभमुखैरासाररंहसा।

सारारब्धस्तवानित्यंतदार्तिहरणक्षमा॥

मातानतानां संघट्टः श्रियांवाधितसंभ्रमा।

मान्याथसीमारामाणांशंमेदिश्यादुमादिमा॥

आदिमाऽद्यशक्तिर्भगवत्युमा, मे मम श सुखं दिश्याद्दद्यात्। मारारिःशिवः। शक्रइन्द्रः। रामोरामचन्द्रादिः। इभमुखोगणेशस्तैरासाररंहसावृष्टिवन्नित्यमारब्धस्तवा, तेषामार्तिहरणेक्षमाच साराश्रेष्ठा, प्रणतानांजननीवरद्रिका। श्रियांसंघट्टः सर्वश्री,र्वाधितसंभ्रमानिरुद्वेगा। रामाणांस्त्रीणांसीमापराकाष्ठा। मान्या=सर्वेषांमाननीयाच। कष्टंकाव्यमेतदितिदिङ्मात्रमेवोदाहृतम्।

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम्॥ ३॥

श्लेषेणकाक्वावाऽन्यार्थप्रकल्पनंवक्रोक्तिरलंकारः। श्लेषवक्रोक्तिर्यथाकाव्यप्रकाशे—

'अहोकेनेदृशीवुद्धिर्दारुणातवनिर्मिता।

त्रिगुणाश्रूयतेवुद्धिर्नतुदारुमयीक्वचित्॥

"लोहितशुक्लकृष्णामितिश्रुतेः—प्रकृतिजन्यवुद्धेरपि त्रिगुणत्वात्त्रिगुणेति। सत्वरजस्तमोगुणयुक्तेत्यर्थः। अत्र दारुणेतिक्रूरार्थकत्वेनवक्तुरभिप्रेतं काष्ठेनेत्यन्यथान्योयोजितवान्। अन्यथायोजनंचात्रव्यञ्जनयेतिप्रदीपकारः। काकुवक्रोक्तिर्यथालंकारसर्वस्वे—

'गुरूणांपारतन्त्र्येणदूरंगन्तुंसमुद्यतः।
काले कोलिलवाचाले सखि, नैष्यति किं प्रियः ॥

अत्र कोकिलवाचाले काले वसन्ते, किं प्रियोनैष्यतीतिनिषेधाभिप्रायेणकयाचित्पृष्टं सख्या तु तदुत्तरयन्त्या एष्यत्येवेतिकाक्वायोजितम्। पारतन्त्र्यंनसार्वदिकमितिभावः। वक्रोक्तिर्भामहेन सर्वालंकारवीजत्वेनभणिता।

वक्रोक्तिकारस्त्वेनांकाव्यजीवितमेवमेने।

शब्दसाम्यमनुप्रासोलाट स्तात्पर्य भेदतः।
छेकोव्यञ्जनसंघस्य सकृत्साम्यं प्रकीर्तितः ॥४॥

शब्दसाम्यमनुप्रासालंकारः। स्वरसादृश्यन्तुनात्रप्रयोजकं कुलकलत्रमित्यादावपिसत्त्वात्। नचशब्दसाम्यंयमकेऽप्यस्तीतिवाच्यम्। यमकेसमानानुपूर्वीकत्वनियमात्। सचद्विविधः लाटानुप्रासः छेकानुप्रासश्च। शब्दानांतात्पर्यमात्रभेदेसति सादृश्ये पूर्वः। व्यञ्जनसंघस्यसकृत्सादृश्येद्वितीयः। व्यंजनमत्रहल्वर्णः। व्यंजनंचार्धमात्रकमितिभाष्योक्तेः। द्विविधोऽप्ययमलंकारः काव्यस्य परमरमणीयतामावहति। यथाहुः "यथाज्योत्स्नाशरच्चन्द्रं यथालावण्यमङ्गनाम्। अनुप्रासः तथाकाव्यमलङ्कर्तुमिहक्षमः॥ लाटानुप्रासोयथावाग्भटालंकारे—

'त्वंप्रियाचेत्कुरङ्गाक्षि, स्वर्गलोकसुखेनकिम्।
त्वंप्रियायदिनस्यामे स्वर्गलोकसुखेनकिम् ॥

स्वर्गलोकसुखंसांख्यतत्त्वकौमुद्यांवर्णितंमिश्रैः—"यन्नदुःखेनसंभिन्नंनचग्रस्तमनन्तरम्। अभिलाषोपनीतंचतत्सुखंस्वर्गं वासि-

नाम् ॥ अस्यव्याख्यानमस्मिन्मित्र—शिवनारायणशास्त्रिकृत तत्त्व
कौमुदीटीकायांद्रष्टव्यम् । अत्रप्रियाविमुखस्य स्वर्गलोकसुखमपि
निष्फलं,तत्संमुखस्यतुविनापितस्मात्तत्फलमस्तीति तात्पर्यमिद्यते
छेकानुप्रासोयथाभर्तृहरिपादानाम्—

'संसारतवनिस्तारपदवीनदवीयसी ।
अन्तरादुस्तरानस्युर्यदिरेमदिरेक्षणाः ॥

हे संसार, तव निस्तारपदवी न दवीयसी नातिकठिना, यदि
अन्तरा मध्ये, अन्तरेतिनिपातोमध्यार्थे । अन्तरान्तरेणयुक्त इति
सूत्रभाष्येऽनयोर्निपातत्वोक्तेः । दुस्तरामदिरेक्षणानस्युर्नभवेयुः
अत्र दकारवकारयोः तकाररकारयोर्दकाररकारयोः सकृत्साम्यम्
यथावा मम दुर्गाभ्युदये—

'नमस्ते शरण्ये त्रिलोकीवरेण्ये महाधन्यधन्येमहेशादिमान्ये,
नमस्तेकराले महामुण्डमाले कृपालेशतः पातुनोभीतिकाले॥
अत्ररकारणकारयोर्भकारनकारयोः सकृत्साम्यम् । यथावा
रजतजयन्त्यवसरेऽस्मिन्मित्रमहाकव्यखिलानन्देनप्रेषितपद्ययोः—

'दार्शनिकीयत्प्रतिभाप्रतिभासंपन्नचेतसांपुंसाम् ।
रमयतिमानसमाराच्छज्जूरामः स विश्रुतः शास्त्री ॥
यन्मुखपद्मविनिः सृतकाव्यकलापः प्रतिक्षणंलोके ।
काव्यकलारसिकानां मनांसिसद्यः प्रमोदयति ॥

क्रियागुप्तादिकंगूढम्,

क्रियागुप्तादिगूढालंकारः । यथा—'ब्राह्मणस्यमहत्पापंसन्ध्या
वन्दनकर्मभिरित्पादौ । ब्राह्मणेतिसम्बोधनम् । जातित्वादेक

नम्। ब्राह्मणत्वस्यजातित्वात्। "तेनतुल्यं क्रियाचेद्वतिरिति सूत्र-भाष्ये-ब्राह्मण्यंनिब्रुवाणोभाष्यकृदाह—

"तपःश्रुतंच योनिश्च एतद्ब्राह्मणकारणम्।
तपःश्रुताभ्यांयोहीनोजातिब्राह्मणएवसः॥"

तत्र तपः पूर्णिमैकादश्याद्युपवासः "तपोनानशनात्परमिति-श्रुतेः। ब्रह्मज्ञानंवातपः—"यस्यज्ञानमयंतपइतिश्रुतेः। श्रुतंसाङ्ग-वेदाध्ययनम्। "ब्राह्मणेननिष्कारणोधर्मः षडङ्गोवेदोध्येयोज्ञेय-श्चेतिश्रुतेः। योनिर्ब्राह्मणाद्ब्राह्मण्यांजन्म। त्रिष्वपिब्राह्मण्येजाति-रेवप्रधानम्। तपःश्रुताभ्यांहीनेजातिलक्षणैकदेशाश्रयोब्राह्मणशब्द-प्रयोगइतिकैयटोक्तेः। विश्वामित्रप्रभृतिषुतपःश्रुतसत्वेऽपि गौण-ब्राह्मणत्वमेव 'ब्राह्मणोब्रह्मयोनिजइतिसामश्रुतेः—ब्राह्मणाद्ब्राह्मण्यां-जन्मलक्षणायायोनेरभावात्। 'ब्राह्मोऽजाता' विति पाणिनिसूत्राद-जातौब्राह्मणशब्दस्यैवासिद्धेश्च। अत्रस्येतिक्रियापदंगुप्तम्। यथावा

'ललाट तिलकोपेतः कृष्णः कमललोचनः। अत्र ललाटेति-क्रियापदंगुप्तम। अस्यवहुप्रकाराः सुभाषितरत्नभाण्डागारेद्रष्टव्याः।

श्लेषः श्लिष्टपदैः पुनः। अर्थद्वयस्य कथनम्।

श्लिष्टपदैरर्थद्वयस्यकथनंश्लेषालङ्कारः। शक्यभेदेन शब्दभेदे-शब्दश्लेषः। यत्रैकोर्थः शक्योऽपरोनिरूढलक्षणयाप्रतिपाद्यस्त-त्रार्थश्लेषः। निरूढलक्षणाचासतिप्रयोजनेशक्यसंवन्धोयथा'त्वचा-ज्ञातमित्यादौत्वचस्त्वगिन्द्रिये। यथावा'नीलोघट इत्यादौ नीलादि-पदानांनीलगुणविशिष्टद्रव्यादौ। शब्दश्लेषोयथा—

'सर्वदोमाधवः पातु योऽगङ्गांसमदीधरत्। सर्वप्रदोमाधवः श्रीपतिः, पक्षे उमाधवः "उमासहायं परमंमहेश्वरमितिश्रुतेर्महे-

श्वरः सर्वदापातु। योऽगंगोवर्धनं, कृष्णावतारेण 'व्रजंचविष्णु-शश्विवानपोर्णु ते गोवर्धनधारणोइतिऋक्श्रुतेः। "यःसप्तहायन-शिशुर्गोवर्धनमधारयत् इतिस्मृतेश्च, । गांपृथ्वीं, वराहावतारेण "वराहेणपृथिवीसंविदानेतिशतपथश्रुतेः। पद्ये—गङ्गामितिश्लिष्ट-शब्दाइमे। श्लिष्टकाव्यंकष्टसाध्यं—"पदमेकमपि श्लिष्टंवक्तुंभूया-न्परिश्रमइतिराघवपाण्डवीयेकविराजोक्तेः। "सकृदुच्चरितः सकृ-दर्थंगमयतीति न्यायस्तुश्लेषेतरविषयः। जतुकाष्ठन्यायेनशब्दयो-रेवश्लिष्टत्वात्शब्दश्लेषः। शब्दाभेदादेकवृन्तगतफलद्वयन्यायेनार्थ-श्लेषइतिसाहित्यविद्वदनुभवः। तत्र पदभङ्गश्लेषः शब्दालंकारः। अभङ्गश्लेषोऽर्थालंकारइत्यलंकार—सर्वस्वकारः। उभयमपिशब्दा-लंकारइतिवाग्देवतावतारः। अयमेवनोमनोरथः। अयंचाष्ट-विधोऽन्यत्रप्रदर्शितः। ग्रन्थगौरवभियातुनेहप्रतानितः। पिष्टपेषण न्यायेन वानालेखि प्रकारप्रपञ्चः।

सकृत्प्रश्नः प्रहेलिका ॥५॥

सकृत्प्रश्नः प्रहेलिकाऽलंकारः। सच च्युताक्षरो दत्ताक्षरादिश्च। उपयोगमस्यादण्डीप्राह—

"क्रीडागोष्ठीविनोदेषुतज्ज्ञैराकीर्णमन्त्रणे।
परव्यामोहनेचापिसोपयोगाप्रहेलिका॥

यथालंकारशेखरे' 'विदग्धःसरलोरागीनितम्बोपरिसंस्थितः।
तन्वंग्यालिङ्गितः कण्ठेकलंकूजतिकोविटः॥

अत्रविटइत्यत्रविकारस्थानेघकारदानद्वाद्वितीयोऽर्थोघटोभवति। एवमन्यदपिलक्ष्याक्षदयम्। यद्वत्रदर्पणकारः—"रसस्यपरिपन्थि-

त्वान्नालंकारः प्रहेलिका। उक्तिवैचित्र्यमात्रंसेत्याह । तदसत् । वैचित्र्यनिवन्धनोह्यलंकारस्भावउपमादीनाम्। वैचित्र्यमेवालंकार-इतिसकलाऽलंकारिकसिद्धान्तात् । अतएवालंकारिकशिरोमणि-महाकविदण्डयादिभिरस्याअलंकारत्वमुक्तमितियुक्तमुत्पश्यामः।

प्रश्नोत्तरंचविविधंवहिरन्तः प्रभेदतः ।

भंग्याप्रश्नस्योत्तरदानमेवास्यालंकारत्वप्रयोजकम् ।

तत्रवहिः प्रश्नोत्तरंयथाविदग्धमुखमण्डने-'प्रायः कार्येनियुज्यन्ते नराः सर्वत्रकीदृशाः। घानेत्ययंभवेच्छब्दोनौवाचीवदकीदृशः॥ सावधानाइति । अन्तः प्रश्नोत्तरंयथा-'काकालीकामधुराकाशीतल वाहिनीगङ्गा । कंसंजघानकृष्णः, कंवलवन्तं नवाघतेशीतः । अत्रकालीकेतिप्रश्नेकाकानामालीत्युत्तरम्। एवं मधुराकेतिप्रश्ने-कामधुराकामधेनुः। शीतलवाहिनी गङ्गाकेतिप्रश्नेकाशी=शिव-पुरीतत्रवाहिनीगङ्गा। काशीविषये तत्र पाठयतोमम मुखादेकदा। निसर्गान्निःसृतम्—पदे पदे मन्दिराणि, पाठशालाः पदेपदे। पदेपदेच विद्वांसः, काश्यामेवेदमद्भुतम्॥

एवं कृष्णः कंसंजघानेतिप्रश्ने, कंसं स्वमातुलम्। कमेः सः कंसः, नतुकंसे रितिभाष्यम्। शीतः कंवलवन्तं वलशालिनं न वाघते ? कंवलवस्त्रधारिणं, कम्बलः (शीते) कमनीयोभवतीतिनिरुक्तकारः। अत्र सर्वत्र किंशब्दो जिज्ञासायाम्। क्वचित्कुत्सार्थोयथाकिराते—"हितान्न यः संशृणुते स किं प्रभुः"। अव्ययकिन्तु वितर्के सचप्र-योक्तुः संभावनात्मकंज्ञानंयथा—"किमिन्दुः किंपद्ममित्यादौ।

यमकं चार्थभिन्नानामर्थेसति पुनःश्रुतिः ॥६॥

अर्थेसति, भिन्नार्थस्य वर्णसंघस्यानुपूर्व्येणावृत्तिर्यमकमलंकारः। अर्थभिन्नानांवर्णानामितिशेषः। वाहिताग्न्यादिष्वितिपरनिपातः। यमकालंकारोहि पदपादार्धश्लोकावृत्तिभेदेन बहुविधोदिङ्मात्र मुदाह्रियते-पदावृत्तिर्यथामम सुलतानचरिते—'महिमा नहिमागमेऽभवत्तरुणीनां तरुणस्य कस्य वा। कमलेः कमलेषुयत्र न सहसा स्वीयवियोगशङ्किनः॥ यथावाऽम्बिकादत्तव्यासस्य शिवराजविजये—'घनपटली बहुवर्षति तोयम्।

घनपटलीन मुखः पथिकोऽयम्॥

यथावापृथ्वीराजविजयेजयानकस्य—'तनयश्चन्द्र राजस्य चन्द्रराजइवाभवत्। संग्रहं यः सुवृत्तानां सुवृत्तानामिव व्यधात्॥ चन्द्रराजस्य-चन्द्रवरदायीतिप्रसिद्धस्य, संग्रहं पृथ्वीराजरासोनामकं स्पष्टमन्यत्। पादावृत्तिर्यथामाघे—'आपदिव्यापृतनयारुषा युयुधिरे नृपाः। आप दिव्या पृतनयाविस्मयं जनता तया॥ आपदिआपत्तिकाले, नयोनीतिः, दिव्याजनतादेवसमूहः। ग्रामजनबन्धुभ्यस्तल्। तया पृतनया सेनया विस्मयमापइत्यर्थः॥ अर्धावृत्तिर्यथाभट्टिकाव्ये।

'समिद्धशरणादीप्ता देहेलङ्कामतेश्वरा।
समिद्धशरणादीप्ता देहेऽलङ्कामतेश्वरा॥

देहेऽभ्यन्तरभागे, समिद्धशरणा ज्वलद्गृहा, दीप्ताप्रकाशमाना, मतेश्वराज्ञातशिवालङ्कानाम्नीराक्षसराजधानी देहे दग्धेत्यर्थः। कीदृशी सा, समिद्धशरणैराक्षसैर्दीप्ताऽलङ्कामतेश्वराच। श्लोकावृत्तिर्यथाकाव्यादर्शे—

'विनायकेन भवता वृत्तोपचितवाहुना ।
स्वमित्रोद्धारिणा ऽभीतापृथ्वीयमतुलाश्रिता ॥
विनायकेनभवता वृत्तोपचितवाहुना ।
स्वमित्रोद्धारिणा ऽभीता पृथ्वी यमतुलाश्रिता ॥

कस्यचिद्राज्ञःस्तुतिरियम् । हे राजन्, भवतेयंपृथ्वी अभीता=दुष्टेभ्योभयरहिता जाता । कीदृशेन भवता विनायकेन दुष्टेभ्यो दण्डदात्रा, विनयतेण्वु ल् । पुनः कीदृशेन वर्तुलपीवरभुजेन, स्वमित्रोद्धारिणेतिस्पष्टम् । अतुलाश्रितानुपमेनेतिप्रथमश्लोकस्यार्थः । विनायकेनमृतस्वामिनाऽभीता युद्धाय त्वांप्रत्यागच्छताऽरिणा भवता विद्यमानेनेयंपृथ्वी यमस्यतुलामाश्रितामृतमितिभावः । कीदृशेनारिणा चितायांज्वलद्भुजेन, स्वमित्रोद्धा परिहृतघनबन्धुवर्गेण चेति द्वितीयश्लोकस्यार्थः । अत्रसमानानुपूर्वीपदघटिताष्टपादात्मकंश्लोकद्वयंसमानमधिक ः मधिकाव्यादर्शंदर्शनीयम् । भाषासमोयथावृन्दावनचम्पूकाव्येमहाकविकर्णपूरस्य—

'एह्येहिलाल, ललिताङ्गन मस्मदीयम् ।
तत्रैवखेलशिशुभिः क्रियदप्यशान ॥

हे लाल कृष्ण, ललइप्सायांघञि लालनीयेत्यर्थः । एह्येहीति वीप्सायांद्विरुक्तिः तयाच रागौत्कट्यं व्यज्यते । अस्मदीयमस्मत्संवधि वृद्धाच्छः । त्यदादीनिचेतिवृद्धसंज्ञा । संवन्धश्च स्वस्वामिभावादिः । षष्ठीस्थाने योगा इतिसूत्रे एकशतं षष्ठ्यर्थाइतिभाष्योक्तेः। शिशुभिरितिसहार्थेतृतीया । खेलेतिप्रार्थनेऽशानेतिच प्राप्तकालेलोट् । अत्र लालखेलेतिद्वयोरपि संस्कृतहिन्द्योः साम्यम् ।

अथार्थालङ्कारान्निरूपयामः। तत्रापि सकलालङ्कारजननीमुपमां तावल्लक्षयामः।

उपमाचारु सादृश्य मुपमानोपमेययोः।

उपमीयतेऽनयेत्युपमा। उपपूर्वान्माङ आतश्चोपसर्गइत्यनेनाङ्। चमत्कारप्रयोजकं सादृश्यवर्णनमुपमालंकारः।

सादृश्यंतु— साधारणधर्मसंबन्धप्रयोज्यंसदृशादिपदशक्यतावच्छेदकतयासिद्धमतिरिक्तपदार्थः। नचातिरिक्तपदार्थत्वे गोतमकणादोक्तपदार्थ संख्याविरोधइतिवाच्यम्। प्रमेयपदार्थे गोतमोक्तेऽन्तर्भावादित्यन्यत्रविस्तरः। उपमानोपमेययो रिति नतुकार्यकारणादिकयोः। तत्सादृश्यस्य कविप्रतिभाकल्पितांशाभावेनाऽनलंकारत्वात्। "पितेव पुत्रः सगुणः स आसीत्" इत्यादौतु कार्यकारणयोर्द्वयोरुपमानो पमेयत्वकल्पनान्नातिप्रसङ्गः। नचकल्पितं सादृश्यं कथंकारं चमत्कारं जनयेदितिवाच्यम्। उपमानोपमेययोः सत्यत्वस्य लक्षणेऽविवक्षणात्। 'गोसदृशोगवयः' इत्यत्रसादृश्य चमत्कारिता विरहान्नोपमालंकारः। एवमेव-सर्वोप्यलंकारः कविसमय प्रसिद्ध्यनुरोधेन चमत्कारित्वएवालंकारतांभजते। अतः गौर्वाहीकइतिन रूपकम्। स्थाणुर्वापुरुषोवा इति न सन्देहः। इदं रजतमिति न भ्रान्तिमान्। नायंसर्पइतिनापह्नुतिः। सदेवदत्तइति न स्मरणम्। तस्थस्थमिपांतान्तन्ताम इतिन यथासंख्यम्। पुत्रेण सहागतःपिता इति न सहोक्तिः। तेन विना गतइतिनविनोक्तिरित्यादिस्वयमूह्यम्। यत्त्वत्र बहून्युपमालक्षणानिखण्डयित्वा रसगंगाधरकृतोपमालक्षणं कृतं तदसत्। तत्रवाक्यार्थोपस्कारकत्व-

विशेषणस्यव्यर्थत्वात्। तद्विनैवसकलेष्टसिद्धेः। सतिलाघवेगौर-वंकेनाद्रियते' इतिवृद्धोक्तेः। उपमा तावद् द्विविधा पूर्णा लुप्ताच। तत्र—"उपमान मुपमेयधर्मौ वाचक मित्यदः चतुष्टयमुपात्तं चेत्-साहि· पूर्णोपमा मता॥ वर्ण्योपमानयोर्धर्मोपमावाचकयोरपि। एकद्वित्र्यनुपादानेभवेत्लुप्ताचतुर्विधा॥ इत्यलंकारमणिहारे द्वयो र्लक्षणम्। उपमानादिचतुष्टयंचवाच्यमपिभवतिप्रतीयमानमपि-चेतिसकलालंकारिकसमयः। ततश्च—साम्यंवाच्यमवैधर्म्यमिति-दर्पणकृतो वाच्यपदं लक्षणेदुष्टम्। पूर्णापिश्रौती आर्थीचेतिद्विविधा। लुप्ताचोपमानोपमेयधर्मवाचकलोपभेदाच्चतुर्विधा। संकलय्य संक्षेपेणषड्विधोपमा। तत्र—यथेववादिशब्द सद्भावे-'तत्रतस्येव' इत्यनेनेवार्थे विहितस्यवते रुपादानेचश्रौती। तुल्यादिशब्द सद्भावे, तेनतुल्यमित्यनेनतुल्यार्थे विहितस्यवतेरुपादानेचार्थी। उभयोरुदा-हरणंयथा—

'कुम्भाविवस्तनौ तस्यामुखसौरभमब्जवत्।
पुष्पतुल्यौमृदूपाणी सुधावन्मधुरा गिरः॥

अत्रपूर्वार्धेश्रौती। उत्तरार्धेऽर्थी। पूर्णोपमा ममदुर्गाभ्युदयेऽपि-'शुंभमुक्तानि शस्त्राणि देवीनयतिरिक्तताम्। पौरुषंपुरुषस्येवनियतिः प्रतिपद्धिणी॥ पौरुषंपुरुषार्थं, युवादित्वादण्। नियतिर्भाग्यं, स्पष्ट-मन्यत्। अत्रचतुर्णामुपादानात्पूर्णोपमा। अथलुप्तोपमा मम—'राघ-वेन्द्रमहीपालोरणेसुरपतीयति। शशीव वदनेनासौ शोभतेमृगलो-चनः॥ 'सुरपतीयती'त्यत्रोपमेयस्यात्मनोलोपः। उपमानस्यसुरपते-रात्मन उपमेयत्वात्। 'मृगलोचन'इत्यत्र लोचनेत्युपमानस्येवशब्दस्य विस्तृतत्वरूपसाधारणधर्मस्यचलोपः। गम्यमानानामप्रयोगएवलो-

पइतिकैयटः । 'सुषारथि रश्वानिवमनुष्यान्नेनीयतेऽभीषुभिर्वाजिन इवेत्यादौ वेदेप्युपमालंकारः । वैयाकरणमते–उपमावाचकानामिवादीनांद्योतकत्वमेव । यथोक्तंभूषणे–"प्रादयोद्योतकाः सर्वेनिपाताश्चादयस्तथा । उपास्येतेहरिहरौलकारोदृश्यतेयथा ॥ आलंकारिकमते-इवादीनां वाचकत्वमेवनद्योतकत्वम् । युक्तं चैतत्–अन्यथा सकलालंकारिकसम्मतस्येवशब्दप्रयोगे श्रौतीत्यस्यदत्तजलाञ्जलित्वापत्तेः । अतएव महावैयाकरण–नागोजिभट्टेनापिमंजूषायामुक्तं "क्वचिन्निपातानां वाचकत्वमपीत्यादिना । अधिकंतत्रैव द्रष्टव्यम् ।

मालोपमोपमानत्वएकस्यबहुधाबुधाः ॥ ७ ॥

एकस्योपमेयस्यबहूपमानत्वेमालोपमालंकारः ।

यथाजगद्धरस्य—'निशान्तनिद्रेव दशेवशैशवी, नवीनवध्वाश्चकितेवदृक्छटा । सुरस्रवन्तीव, कथेवशाम्भवो कबीन्द्रवाङ्निवृतिमातनोतु वः ॥ निशान्तनिद्रेव, रात्र्यन्तनिद्रेव, शैशवीदशेववाल्यावस्थेव, सुरस्रवन्तीगङ्गा, कवीन्द्रवाक् कविभारती, स्पष्टमन्यत् । अत्रकवीन्द्रवाचोवहून्युपमानानीत्युपमेयोपमालंकारः ।

उपमायानिषेधोयोऽनुपमासाप्रकीर्तिता ॥

उपमायाःसर्वथानिषेधोऽनुपमालङ्कारः । अयंचानन्वयेव्यंग्योऽपिदीपकादावुपमावत्पृथगेवालंकारः । एतेनायंनपृथगलंकारोऽनन्वयध्वनिनैवोपपत्तेरितिब्रुवन्नलङ्कारकौस्तुभकारः परास्तः । अलंकारान्तरेणालंकारान्तरध्वननस्यालंकारान्तरवादकत्वात् । उदाहरणम्– तृणानिशुष्कानिवनेचरित्वा पीत्वापि तोयान्यमृतंश्रवन्ति । यद्गोमयाद्याश्चपुनन्ति लोकान् गोभिर्नतुल्यंघनमस्ति-

किञ्चित् ॥ चरित्वाभ्रमित्वाभक्षयित्वाच। "चरगतिभक्षणयोरित्यनुशासनात्। अमृतंक्षीरं "गोक्षीरममृतंस्मृतम। इतिस्मरणात्। गोमयादीत्यादिनागोमूत्रपरिग्रहः। "संभाव्यंगोषुसंपन्नमितिवाल्मिकीयरामायणानुसारं गावोमहतीसंपत्तिः। साम्प्रतिकीं गोहिंसां दृष्ट्वाकस्यहृदयंनदुःखयति। नचगोहिंसामन्वादिषुलिखितेतिवाच्यम्। तस्यावैधत्वात्। भाष्योक्त—कूपखानकन्यायेनपापजनकतापेक्षया पुण्यजनकतायास्तत्रवाहुल्यात्। वस्तुतस्तु-श्रुतिस्मृतिर्लिखतोऽपि गवालम्भादिर्विहितोनभवतिफलत्वात्। "फलंनविधेयमितिसिद्धान्तेन तस्य प्रत्यवायजनकत्वात् गृह्यसूत्रमतेगोरा लम्भनमुत्सर्जनमेव। 'मागामनागामदितिवधिष्टेति श्रुतेः। अतएवगीतायांयज्ञे पुजपज्ञस्य श्रेष्ठत्वमुक्तम्। अत्रगवामुपमाकैरपिसहनभवतीतिनिषिद्धत्वादेषोऽनुपमालंकारः।

उपमानोपमेयत्वमेकस्यैवत्वनन्वयः ॥८॥

एकस्यैव वस्तुन उपमानोपमेयत्वकल्पनमनन्वयालंकारः।

उपमानंचोपमेयंचेतिद्वन्द्वः। उपमानत्वमुपमेयत्वंचेत्यर्थः।

उपमानतावच्छेदकधर्मएवयत्रोपमेयतावच्छेदकःसोऽनन्वय इतिफलितम्। एकस्येत्युपमालंकारव्यवच्छेदाय। उपमालंकारस्य भेदघटितत्वात्। उपमायां साम्यप्रतीत्या चमत्कार इहतूपमानान्तरव्यवच्छेदेनेतिफलवैजात्यादुभयोः पार्थक्यम्। यद्यप्युपमानोपमेययोरैक्यमस्त्यत्र तथापि काल्पनिकभेदाश्रयणंभवतीदृशेस्थले। तथाहिवाचस्पतिमिश्रैरुक्तं भामत्याम्— "तेनूतस्योपमेयत्वंरामरावणयुद्धवत्। अगत्यांभेदमारोप्य गतौसत्यांनयुज्यते ॥ उदाहरणंमम—

'शिक्षणेराजसिंहानां प्रजानांपरिरक्षणे ।
सतांमानेऽर्थिनां दाने विक्रमोविक्रमोपमः ॥

सतांविदुषांमानेसम्माने, अर्थिनांदानेऽर्थिभ्योदाने, चतुर्थ्यर्थेषष्ठी । यत्तु वैधदानाभावान्नचतुर्थीतितन्न । शिष्यायचपेटां ददातीतिभाष्यप्रयोगविरोधात् । अतएव, तदाचद्दवासुरेन्द्रायेत्यादिदुर्गापाठादिप्रयोगाः संगच्छन्ते । अत्रपरदुःखभञ्जनादि विविधगुणगणालंकृतस्यविक्रमादित्यस्याऽनन्यसदृशत्वाभिधानायोपमानोपमेयभावो विवक्षितः ॥ ८ ॥

सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ।

सदृशज्ञानजन्यास्मृतिः स्मरणालंकारः ।

सदृशज्ञानस्य चस्मृतिंप्रतिसंस्कारोद्बोधकत्वेनहेतुत्वम् । चिन्तादिजन्यास्मृतिस्तुनचमत्काराय । अलंकाररत्नाकरादौतथैवोक्तत्वात् । यथादर्पणे—'अरविन्दमिमंवीक्ष्यखेलत्खञ्जनमञ्जुलम् । स्मरामिवदनंतस्या चारु चंचललोचनम् ॥

तस्यानायिकायाः, तदादेवुद्धिस्थविषयतावच्छेदकवतिशक्त्या-अनुभवगोचरायाइत्यर्थः । वदनंमुखंस्मरामि । किंकृत्वा इमं—अरविन्दंकमलं वीक्ष्य, दर्पणकारस्यारविन्दमिदमिति पाठस्तुभाष्याज्ञानमूलकएव । कौमुद्यमरकारादयोऽप्यत्रभाष्य विरुद्धत्वादुपेक्षणीया भाष्येऽरविन्दशब्दस्यपुंस्त्वोक्तेः । अत्रमुखसदृशस्यारविन्दस्यदर्शनाज्जायमाना स्मृतिरलंकारत्वव्यपदेशेहेतुः । मुखनिरूपितचारुत्वादिसादृश्यवानरविन्दइतिबोधः । "प्रातःस्मरामिगणनाथमनाथबन्धु" मित्यादिप्रातःस्मृतेःचारुत्वाभावान्नालकारत्वम् । सादृश्यमूलकस्मृतेरेवालंकारिकाणांमते चारुत्वाभिधानात् ।

तद्रूपकमभेदोय उपमानोपमेययोः ॥ ९ ॥

उपमेयतावच्छेदकंपुरस्कृत्योपमानतावच्छेदकावच्छिन्नाभेदः। अर्थात्—अतिसाम्यादपह्नुतभेदयोरुपमानोपमेययोरभेद प्रत्ययोरूपकमलंकारः। रूपयतिद्वयोरभेदारोपणं करोतीतिरूपकमितिव्युत्पत्तेः। नच 'मुखंचन्द्र' इत्यादिरूपकस्थले लक्षणयासादृश्यप्रतीतौ 'चन्द्रवन्मुख' मित्याद्युपमालंकाराद्रूपकालंकारे किमपि आलंकारिकसिद्धान्तसिद्धंचमत्कारवैलक्षण्यंनदृश्यते, विषयवैलक्षण्यस्यैवचमत्कारवैलक्षण्यप्रयोजकत्वादितिवाच्यम्। रूपकेचन्द्राभिन्नंमुखमित्यभेदान्वयवोधएवविषय वैलक्षण्यस्यसर्वसम्मतत्वात्। उदाहरणंकाव्यादर्शे--

'तस्यावाहुलतापाणिपद्मंचरणपल्लवम्।
मुखेन्दुरक्षिभ्रमरौसर्वंसा पुष्पधन्वनः॥

सा=नायिका=पुष्पधन्वनः, कामस्य, सर्वं=सर्वस्वरूपा, सामान्ये नपुंसकम्। तस्यावाहुरेवलतेतिमयूरव्यंसकादिसमासो नतूपमितं व्याघ्रादिभिरितिसूत्रेण वाहुर्लतेवेत्युपमितसमासः। तदपेक्षयारूपकचमत्कारातिशयस्य सर्वानुभवसिद्धत्वात्। एवंपाणि पद्मादौ। अत्रवाह्वादिषुलतादीनामभेदारोपः। सचतात्स्थ्यादि चतुर्भिःप्रकारैर्भवतीतिपुंयोगादाख्यायामितिमूत्रेभाष्यकैयटयोः स्पष्टम्। सिंहोमाणवकः। लोष्ठः पाषाण इत्यादावभेदारोपेऽपि नालंकारत्वम्। प्रतिभानुत्थापितस्यतस्याचमत्कारित्वात्। सिंहोमाणवक इत्यादिर्लाक्षणिकः प्रयोगः। लक्षणाचशक्यतावच्छेदकारोपएव। प्रकृतोदाहरणे—समासकरणात्समस्तरूपकम्। असमस्तंतुपृथग्वि-

भक्त्या यथावाग्भटालंकारे—'संसार एषकूपः सलिलानिविपत्ति-जन्मदुःखानि। इहधर्मएवरज्जुः तस्मादुद्धरतिनिर्मग्नान्॥ यथावा 'विप्रोवृक्षस्तस्यमूलंहिसन्ध्यावेदाः शाखाधर्मकर्माणिपत्रमित्यादौ।

प्रतीपमुपमानस्य कैमर्थ्यंयदिमन्यते।

उपमेयस्यैवोपमानप्रयोजनसाधकत्वेनोपमानकैमर्थ्यम्। तिरस्कारफलकोपमानव्यर्थतोक्तिरितियावत्प्रतीपालंकारः। प्रतीपंनिम्नोन्नतस्थलं, तत्सादृश्यादलंकारेलक्षणा। यथास्तुतिकुसुमाञ्जलौ-'शान्तंमनोयदियमैर्नियमैः किमन्यैः वाणीयदि प्रियहिता स्तुतिचाटुभिः किम्। कारुण्यमस्तियदि किंव्रतहोमदानैः

भक्तिर्भवेयदि किमन्यसुखाभिलाषैः॥

स्वार्थमनपेक्ष्यपरदुःखप्रहाणेच्छाकारुण्यमितिप्रशस्तपादभाष्यम्। 'अनशनमेवव्रतमितिशतपथश्रुतेः व्रतंभोजननिवृत्तिः। व्रतमिति निवृत्तिकर्मेतिनिरुक्तकारः। वह्न्यधिकरणकपतनावच्छिन्नसमन्त्रकक्रियाहोमः। स्पष्टमन्यत्। अत्रशान्त्यादियुक्तमन आद्युपमेयसत्वेयमाद्युपमानानांव्यर्थताभिधानात्प्रतीपालंकारत्वम्।

संभावनास्यादुत्प्रेक्षास्वरूपफलहेतुभिः॥ १०॥

स्वरूपफलहेतुत्वेनसंभावनोत्प्रेक्षालंकारः। नचहेतुफलयोरपिस्वरूपत्वेनस्वरूपोत्प्रेक्षैवसर्वत्रवक्तुमुचितेतिवाच्यम्। तस्यां निर्दिष्टेतरस्य किंचिद् विचित्रत्वात्। संभावनाचोपमानकोटिकःशंसयः। उत्कटा प्रकृष्टोपमानस्येक्षायत्रेतिव्युत्पत्तेः। अतएवनात्रसन्देहालंकारः। सन्देहउपमानोपमेययोर्द्वयोस्तुल्यकोटिक संशयत्वात्। उपमायामुपमानोपमेयत्वं लोकसिद्धमिहचकविप्रतिभो-

स्थापितम्। यदाहचक्रवर्त्यपि—"यदायमुपमानांशोलोकतः सिद्धि-मृच्छति। तदोपमेव येनेवशब्दः साधर्म्यवाचकः॥ यदापुनरयं लोकादसिद्धः कविकल्पितः। तदोत्प्रेक्षैवयेनेवशब्दः संभावनापरः॥ संभावनाच— कविप्रतिभोत्थापितैवचमत्कारकारिणीतिनविस्मर्त-व्यम्। क्रमेणोदाहरणानि। तत्रस्वरूपोत्प्रेक्षायथाभर्तृहरिपादानाम्—

'गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता।
शनैश्चराभ्यांपादाभ्यां रेजे ग्रहमयीवसा॥

स्तनभारेणस्तनयोर्भारेण, 'स्तनादीनां द्वित्व विशिष्टा जाति-रिति वामनोक्तेः। भास्वतादेदीप्यमानेन, पक्षे—सूर्येण, स्पष्टम-न्यत्। अत्र काचिद्योपित् गुर्वादिग्रहमयीत्वस्वरूपेणोत्प्रेक्षिता। फलोत्प्रेक्षायथाहरविजयमहाकाव्ये—

'मन्दाकिनीसलिलनिर्भरपूर्यमाणगंभीरकुक्षिकुहरोद्गतदीर्घनादम्। अद्यापियस्यशिरसिश्रियमेत्यशान्तवेदध्वनीवपरमेष्ठिशिरःकपालम्, यस्यभगवतोहरस्य, स्पष्टमन्यत्। अत्र परमेष्ठिशिरः कपालं मन्दाकिनीसलिलगतागतनादावच्छिन्नमनारतवेदध्वनि—वत्त्वेन-फलेनोत्प्रेक्षितम्। हेतूत्प्रेक्षायथानैषधे—

'अनादिसर्गस्रजिवानुभूता चित्रेववाभीमसुतानलेन। जातैव-यद्वा जितशम्बरस्यसाशाम्बरीशिल्पमलक्षिदिक्षु॥साभीमसुतादम-यन्तीस्पष्टमन्यत्।अत्रालीकभैमीसाक्षात्कारो जन्मान्तरानुभवाद्वा। चित्रानुभवाद्वा केवलमदनमायाबलाद्वेति हेतूत्प्रेक्षा। अलं-कारसर्वस्वकारमते जाति गुण द्रव्य क्रियाभि रप्युत्प्रेक्षणंभवति। यथावाल्मिकीयेरामायणे—

'वाहुजानां समस्ताना मभावइवमूर्तिमान् ।
जयत्यतिवलोरामो जामदग्न्यः प्रतापवान् ॥

वाहुजानां=जातिविशेषावच्छिन्नेरूढ़ानां, क्षत्रियाणामित्यर्थः। "वाहुभ्यांराजन्यइतिश्रुतेः । मूर्तिमानभावःप्रध्वंसाभावइव, अभावभावोमुक्तावलीटीकायां विभावितोऽस्माभिर्विस्तरेणेत्यलं प्रसक्तानुप्रसक्त्या । रामः श्रीपरशुरामः । भगवतोऽस्यवर्णनंवेदेऽपि दृश्यते । "प्रोवाचरामोभार्गवेयो विश्वन्तरायेत्यैतरेयश्रुतौ । अत्र क्षत्रियत्व जात्यवच्छिन्नाभावोत्प्रेक्षा, शेषोत्प्रेक्षाः स्वयमुत्प्रेक्ष्याः। इवा दीना मभावे गम्योत्प्रेक्षा यथानैषधे—'परिखावलयच्छलेन या न परेषां ग्रहणस्यगोचरा । फणिभाषितभाष्य फक्किका विषमा कुण्डलनामवापिता ॥अत्रकुण्डिन पुर्याः कुण्डलिग्रन्थत्वेनोत्प्रेक्षा। साचव्यञ्जकाप्रयोगाद्गम्या । यथावातत्रैव—'अदृश्यमाना-क्वचिदीक्षिता क्वचिन्ममानुयोगेभवतः सरस्वतीत्यादौ । अत्रनल-वाचः सरस्वतीनदीजिगीषोत्प्रेक्षा- गम्या ॥ १० ॥

वहुभिर्वहुधोल्लेखा देकस्योलेख इष्यते ॥

एकस्यवस्तुनोवहुभिर्वहुप्रकारेणोल्लेखनं विषतीकरणमुल्लेखालंकारः बहुधोल्लेखने च रुच्यादिकं प्रयोजकम् । यदुक्तम्—

"यथारुचियथाथित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसंधानसाधितः ॥

यथामम—'योगज्ञो योगिभिर्भोजः शाब्दिकैरथशाब्दिकः।
वैद्यैर्वैद्यः सभामध्ये कविभिर्दृष्टोकविः ॥

योगिभिर्योगशास्त्रज्ञैः शाब्दिकैर्वैयाकरणैः स्पष्टमन्यत्।
योगज्ञत्वादिकंच वास्तविकमेवेतिनास्य भ्रांतिमत्त्वम्॥

अत्रयोगिप्रभृतिग्रहीतृभेदादेकस्यभोजस्य' योगज्ञत्वादिनोल्लेखश्चमत्कारजनकः। अभेदेभेदरूपातिशयोक्तितोनायंभिद्यत इतिसुधासागरकाराद्युक्तिस्तु तुच्छा। अलंकारतत्वज्ञानांप्राचीनानांशून्यहृदयताया अपामरेणसंभावयितुमशक्यत्वादितिसूक्ष्ममीक्षणीयम्।

साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान्प्रतिभोत्थितः ॥११॥

अतस्मिंस्तद्भिन्नवस्तुनि सादृश्यात्तद्वस्तुत्वप्रकारकंज्ञानं भ्रान्तिमानलंकारः। इदंरजतमितिरङ्ग विशेष्यक बोध वारणाय प्रतिभोत्थित इति विशेषणम्। कविप्रौढोक्तिसिद्धइतितदर्थः। यथा

'पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः।
सोऽपिजम्बूफलभ्रान्त्यातमलिंधतु मिच्छति॥

शुकतुण्डे=शुकमुखे, सोऽपिशुकोपिस्पष्टमन्यत्। अत्र परस्पर निवन्धना भ्रान्तिश्चमत्कारिणी।

"दामोदर कराघात विह्वलीकृत चेतसा।
दृष्टं चाणूरमल्लेनशतचन्द्रं नभस्तलम्॥

इत्यत्रतुनायमलंकारः। मर्मप्रहारकृतचित्तविक्षेपजन्य भ्रान्तेः सादृश्य प्रयोज्यत्वाभावात्॥ ११॥

सन्देहः प्रकृतेऽन्यस्यसंशयः प्रतिभोत्थितः।

उपमेयतावच्छेदके उपमानतावच्छेदकस्यप्रतिभोत्थितः चमत्कार जनक सादृश्यजन्यः संसयः सन्देहालंकारः। अयमलंकारसर्वस्व काव्यप्रकाशादिषु ससन्देहइति कथ्यते। यथामम—'किमयं

खलु मार्तण्डः कृशानुरथकिंयमः। विक्रमादित्यमालोक्य चरखो सन्दिदिहेशकैः ॥

विक्रमादित्यम्=शूद्रकविक्रमादित्यम्, अयमेवविक्रमादित्यः श्रीहर्षापरनामकः संवत्प्रवर्तकश्चासीत्। तथाहि—श्रीकृष्णचरिते शूद्रकमुद्दिश्यमहाराजसमुद्रगुप्तः स्पष्टमाह—"वत्सरं स्वंशकान जित्वा प्रावर्तयत वैक्रमम्" इत्यादिना। अवन्तीसुन्दरीकथासारानुसारमयंविक्रमादित्यीब्राह्मणजातीय इत्यपिनिर्विवादम्। अधिकं मदीयेसंस्कृतेतिहासे द्रष्टव्यम्। अत्रोपमेयभूतविक्रमादित्यराजनिदुर्निरीक्ष्य दुराधर्ष सकलहन्तृत्वसाम्यान्मार्तण्डकृशानुकृतान्ततत्वशंसयश्चमत्कारकारकः। यत्त्वत्र 'तीरेतरुण्यावदनंसहासमितिपद्यमुदाहृत्य अत्रपुरोवर्तिनिकमलमिदंवेतिशंसयोव्यंग्यइति रसगङ्गाधरकार उक्तवांस्तन्नशोभनम्। आलोक्यधावंत्युभयत्रमुग्धेतिमुग्धपदेनोभयत्र धावनसहकारेणसंशयस्य वाच्यत्वादित्यलंकाराचार्यैः विचार्यम्।

अपह्नुतिरपह्नुत्यकिंचिदन्यार्थसूचनम् ॥१२॥

किञ्चिदसत्यत्वेन प्रतिपाद्यान्यस्यसत्यतया स्थापनमपह्नुतिरलंकारः। यथानैषधे—'साक्षात्सुधांशुर्मुखमेवभैम्या दिवः पुनर्लाक्षणिकःशशाङ्कः' अत्र चन्द्रे सत्यसुधांशुत्वमपह्नुत्य भैमीमुखेसत्यसुधांशुत्वं स्थापितम्। 'नविषंविषमित्याहुर्ब्रह्मस्वं विषमुच्यते, इत्यत्रापीयमेव। ननु रसगङ्गाधरालंकारकौस्तुभकाराभ्यामुक्त दृढारोपरूपकं "नपञ्चेषुः स्मरस्तस्यसहस्रंपत्रिणांयतः। इत्यादिदण्डयादेरपह्नुतिउदाहरणविरोधात्। प्रतिभानुत्थापितस्यचमत्कारा-

जनकस्य "इमेजड़ानविद्वांस" इत्यादेर्नालंकारतम्। कविप्रतिभामात्रकल्पितानामर्थानामेवालंकारत्वात् ॥१२॥

अन्यन्निषिध्यप्रकृतस्थापनंनिश्चयःपुनः ।

अन्यदुपमानंनिषिध्यभिन्नत्वेनाख्याय प्रकृततावच्छेदकरूपेण ज्ञातस्योपमेयस्यस्थापनं निश्चवालंकारः । यथादर्पणे-'वदनमिदंनसरोजंनयनेनेन्दीवरेएते ।

इहसविधे मुग्धदृशो भ्रमर, मुदा किं परिभ्रमसि ॥

हेभ्रमर, वदनं मुखमिदं, नसरोजं कमलम्। नचयद्धर्मावच्छिन्नवाचकपदोत्तरं नञ्पदंप्रयुज्यते, तस्यैवाभावो नञावोध्यतं इतिनियमः तथा चेदन्तावच्छिन्नवदनत्वाभावो वक्तुंशक्यतेनसरोजत्वाभावइतिवाच्यम्। सति तात्पर्येऽन्याभाववोधनस्याप्यानुभविकत्वात्। विचारितंचैतदस्माभिरर्थवत्सूत्रप्रकाशेविस्तरेणतत्त्रैव द्रष्टव्यम्। अत्रोपमानभूतसरोजादीनांनिषेधेनोपमेयभूतवदनादीनां स्थापनान्निश्चयालंकारत्वम् । "सर्वंविनिश्चित्यवदामितुम्प" मित्यादिन्निश्चयस्यतु वैचित्र्याभावान्नालंकारत्वम् ॥ १२ ॥

कथ्यतेऽतिशयोक्तिः सा प्रस्तुतोत्कर्षगीर्यतः ॥१३॥

यत्रप्रस्तुतस्यप्रकृतस्योत्कर्षवर्णनंसातिशयोक्तिरलंकारः। अतिपूर्वकशीङ्धातोरुत्कर्षेवृत्तिः। उत्कर्षश्चाधिक्यफलकोन्यकारोनत्वाधिक्यमात्रं, तथासत्यकर्मकत्वापातात्। नचेष्टापत्तिः शुक्लमतिशेते शुक्लतर इत्यादिभाष्यविरोधात्। वर्णनीयार्थोत्कर्षवोधजनकत्वेन चमत्कारातिशय जनकत्वं तत्त्वम्। इयंचाभेदेभेदरूपाभेदेऽभेदरूपाचभवति। अभेदेभेदरूपायथामम—'अन्याविक्रमसंपतिरन्या

चातुर्यधोरणी । अन्यद्धैर्यंच गाम्भीर्यं विक्रमादित्यभूपतेः ॥ अत्र चन्द्रगुप्तविक्रमादित्यस्यलोकप्रसिद्धविक्रमादेरभेदेऽपिलोकोत्तरत्व-प्रतिपत्त्यर्थंभेदोवर्णितः । भेदेऽभेदरूपा यथा—'रूपंयन्मदनेद्युतिः शशिनि या गम्भीरतायाम्बुधौ यो मेरौगरिमास्ति या कमलिनी-कान्ते प्रतापोन्नतिः । योलक्ष्मीरमणेऽपिविक्रमगुणस्तत्सर्वमेकत्रचेद् द्रष्टुं वाञ्छसिदृश्यतांजनकजाजानोरघूणांमणिः ॥ अत्रमदनादि रूपादेर्भेदेऽपि सर्वगुणाभिरामेरामेऽभेदोवर्णितः । असंबंधे संब-न्धरूपापीयंभवति । यथा विह्लणस्य विक्रमाङ्कचरिते—'सहोदराः कुंकुमकेसराणांभवन्तिनूनं कविताविलासाः । अत्रकुंकुमकेसराणां कविताविलासानांच सहोदरत्वं तर्कितमेवनवस्तुसत् । एवमसंबन्धे-सबन्धरूपा यथामम—'गृहानगर्यां देहल्यां विहायस्तलचुम्बिनः । अत्रचुम्बनस्य वक्रसंयोगस्यगगनतलेबाधात्संयोगेलक्षणा । गृहाणा-मत्युच्चत्वबोधनंप्रयोजनम् । कार्यकारणपौर्वापर्यविपर्यासरूपाऽ-स्याश्चतुर्थः प्रकारः । सचद्विविधःकारणात्कार्यस्यपूर्वंनिबन्धनेद्वयोः समकालावच्छेदेन निबन्धनेच । प्रथमो यथामम—'चिरमुत्कण्ठितं चित्तं देवकी वसुदेवयोः । पूर्वमानन्दितंपश्चादभवत्कृष्णसंभवः ॥ अत्र कृष्णजन्मकारणं चित्तानन्दःकार्यम् । द्वितीयो यथास्मच्छिष्य वामदेवोपाध्यायस्य, जवाहर-प्रशस्तौ—'सममेव समाक्राम्यद्वीर-रत्नंजवाहरः । हिन्दुस्थानराजधानीं हिन्दुस्थानस्य दुर्हृदः ॥ हिन्दुस्थानराजधानींदेहलीं, दुर्हृदः शत्रून्यवनादीन्, समाक्रमणं वशीकरणंविजयश्च । स्पष्टमन्यत् अयमलंकारोवेदेऽपिदृश्यते'द्वासुपर्णा सयुजा सखायौ समानंवृक्षं परिषष्वजाते । तयोरन्यः पिप्पलंस्वा-द्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥ इयमभेदेऽपिभेदरूपातिशयो-

योक्तिः। सिद्धान्तश्रुतिषु जीवब्रह्मणोरभेदस्यववर्णनात्। कथमिति चेत्। जीवब्रह्मणोर्भेदेमानाभावात्। नच 'नाहमीश्वर' इत्यादिप्रत्यक्षंतत्रमानम्। 'अहंगौर' इत्यादिवद्भ्रान्तत्वात्। नापि- जीवो ब्रह्मणोभिन्नोऽसर्वज्ञत्वादित्याद्यनुमानं, व्यावहारिकभेदेन सिद्धसाधनतवात्। तत्त्वमस्यादिवाक्य विरोधेन विलक्षणभेदपरत्वायोगात्। उपाधिपरित्यागेन-"ब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः। "मायामात्रमिदं द्वैतमद्वैतंपरमार्थत इतिगौड़पादोक्तेश्च। प्रतिपद मुद्घोषितमस्माभिरेतत्स्वकीयवेदान्तसारटीकाया मधिकजिज्ञासुभिस्तत्रैवद्रष्टव्यम् नचतर्हीयं श्रुतिरप्रमाणेतिवाच्यम्। "भक्तयर्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम्। इतिमच्छिष्यवामदेवोपाध्याय सिद्धान्तेनद्वैतप्रतिपादनार्थमस्याः श्रुतेरावश्यकत्वात्॥ १३॥

प्रस्तुताप्रस्तुतानां वा धर्मैक्यं तुल्ययोगिता।

प्रकृताप्रकृतानामेव वागुणक्रियारूपैकधर्मान्वयः तुल्य योगितालंकारः। तुल्यायोगितान्वयोयत्रेतिव्युत्पत्तेरन्वर्थसंज्ञेयम्। यथादर्पणे-'दानंवित्तादृतंवाचः कीर्तिधर्मौ तथायुषः। परोपकरणं कायादसारात्सारमाहरेत्॥ अत्रप्रकृतानांदानादीनांकर्मभूतानांसारतारूपैकगुणसंवन्ध एकाहरणरूप क्रियासम्बन्धः। यथावा 'नचाकारिकामारिपूजाऽनुरक्त्या नचाराधिराधाधवश्चापिभतया। नचस्वेष्टमाचेष्टितं चैवकिञ्चित् मयान्तेकृतान्ते किमावेदनीयम्॥

कामारिः शिवः। तस्यपूजाराधनम्। अनुरक्तिरुत्कटा भक्तिरनन्यप्रीतिश्च राधाधवः श्रीकृष्णः। नाराधि—नाराधितः। आङ्-पूर्वकाद्राधतेः कर्मणि लुङ्। तस्यचातीतकालोऽर्थः। वर्तमानध्वंस

प्रतियोगित्वंतत्त्वम्, वर्तमानध्वंसएववस्तुतोलङ्‌ लुङाद्यर्थइति-व्युत्पत्तिवादोक्तेः। भक्तिश्चाराध्यत्वेनज्ञान मितिप्रागप्यवोचाम। परानुरक्तिरीश्वरेभक्तिरितिशाण्डिल्यसूत्रम्। स्वेष्टं स्वकर्तव्यंना-चेष्टितं नविचारितम्, चेष्टाचेप्सितं जिज्ञासितंयार्थमधिकृत्यविचा-रइतिन्यायभाष्यकारः। अन्तेऽन्तसमये कृतान्तेयसंप्रतिमया किमावेदनीयं किंकथनीयमित्यपिनज्ञातं तथाच प्रेत्याहंकिंभविता-स्मीतिचिन्तापि मां वहुसन्तापयतीतिभावः। अत्राप्रकृतानामेवा-वेदनक्रियारूपः साधारणो धर्मःसकृदुपात्तइतितुल्ययोगितालंकारः।

प्रस्तुताप्रस्तुतानांच धर्मैक्यंदीपकंमतम् ॥ १४ ॥

प्रकृतानामप्रकृतानांचैकधर्मान्वयोदीपकालंकारः। दीपइवदीप-कम्। संज्ञायांचेतिपाणिनिसूत्रेण संज्ञायामिवार्थेकन् प्रत्ययः। प्रकृतैकनिष्ठं साधर्म्यं अप्रकृतेऽप्युपकरोति, प्रासादार्थरचितोदीपो-रथ्यायामिवेतिदीपकसाम्यम्। यत्तु रसगङ्गाधरकारेणोक्तं, तुल्य-योगितादीपकयोर्नकश्चनभेदइति तन्नसम्यक्। प्रकृताप्रकृतयो धर्मैक्येदीपकं, प्रकृतानामेव, अप्रकृतानामेववाधर्मैक्येतुल्ययोगि-तेतिद्वयोर्भेदात्। उदाहरणंममैव—

'जनार्दनस्य जाह्नव्या जनन्या जन्मभूमितः।
प्रियायाः स्वस्यजातेश्चदर्शनात्कोनतुष्यति ॥

अत्र प्रियत्व विशेषणोक्तेर्जातेः प्रस्तुत्वमितरेषामप्रस्तुतत्वं-मेकधर्मः क्रियारूपस्तोषः। यथावा 'दधि मधुरं मधु मधुरं द्राक्षा-मधुरा सितापिमधुरैव। तस्यतुतदेवमधुरं यस्यमनोयत्रसंलग्नम्॥ अत्रमनोनीतमधुरस्यप्रस्तुतत्व मितरेषामप्रस्तुत त्वमेकधर्मोमधुर-

रूपोमाधुर्यम्। नचास्य विषये व्यंग्योपमयैवास्तुनिर्वाहइतिवाच्यम्। काव्यस्यदीपकमुखेनैव चमत्कारकारकत्वात् ॥ १४ ॥

वाक्ययोरेकसामान्येप्रतिवस्तूपमोच्यते।

उपमानेवाक्ये उपमेयवाक्ये चैकस्यसाधारणधर्मस्य शब्दभेदेनोपादाने प्रतिवस्तूपमालंकारः। प्रतिवस्तु=प्रतिवाक्यार्थमुपमेतिव्युत्पत्तेः। वाक्ययोरिति वाक्यानामप्युपलक्षणम्। तथा चैकस्य विभिन्न शब्दोपात्तत्वं प्रतिवस्तूपमेति फलति। एकेति दृष्टान्तव्युदासाय। यथा साहित्यकौमुद्यां—'सत्सङ्गतिरसाभिज्ञोनमोक्षमभिकांक्षति। प्रसूनमपरंभृङ्गोनेच्छत्यम्बुजलम्पटः॥ मोक्षं=मोक्षकालिकब्रह्मानन्दमपि, शब्दसामर्थ्यगम्यमानत्वादपेरप्रयोगः। मोक्षश्चस्वस्वरूपानन्दावाप्तिरितिवेदान्तिनः। अत्रवाक्यद्वयेस्पृहारूपएकोधर्मः शब्दभेदेनोपात्तः। अभिकांक्षेच्छयोरनर्थान्तरत्वात्।

उपमानाद्यदन्यस्य व्यतिरेकः स एवसः ॥१५॥

उपमानापेक्षयोपमेयस्यव्यतिरेको गुणविशेषकृतोत्कर्षोव्यतिरेकालंकारः। यथाममं—'कलङ्कक्षयशून्योऽसिविभर्षिसकलाःकलाः। सदासम्पूर्णकृष्ण, त्वं चन्द्रोमूर्खेणभण्यसे॥

अत्रोपमानभूतचन्द्रापेक्षयोपमेयभूतश्रीकृष्णस्योत्कर्षोवर्णितः। यथावाममैव—'गृहेगृहे कलत्राणि मातरश्च गृहेगृहे। मामकीसदृशीमाता, पत्नीभक्त्या न सदृशी॥ नचस्त्रीवाचकस्य कलत्र शब्दस्य कथं नपुंसकत्वमितिवाच्यम्। एकार्थेशब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमपीतिभाष्योक्तेः। यथा पुष्यः तारा नक्षत्र मित्यादिकमितिकैयटः। अत्रान्यमातृपत्नीनामपेक्षया, स्वमातृपत्न्योः पुत्रवात्स-

ल्यपतिभक्तिरूपगुणोत्कर्षः कविनावर्णितः। अलंकारसर्वस्वकार स्तूपमानापेक्षयोपमेयस्य न्यूनत्वेऽपिव्यतिरेकमाह। यथामम— 'श्रीकृष्णाननिःसृतांभगवद्गीतां निपीतवताम्। मोदायकल्पते-नो वेदान्तानां विचारोऽपि ॥ अत्रभगवन्मुखनिःसृतायागीताया उपमानस्योत्कृष्टत्वं वेदान्तानामुपमेयत्वेनविवक्षिताना मपकृष्टत्वं वर्णितम् ॥ १५ ॥

सहोक्तिः सहभावस्य बलादेकं द्विवाचकम् ।

यत्रसहार्थबलादेकं क्रियापदं द्वयोरर्थयोर्वाचकं ससहोक्तिरलं-कारः। भावेनसहवर्ततइतिसहभावः तेनसहेति तुल्ययोगेबहुव्रीहिः। 'वोपर्जनस्येति विकल्पात्सहशब्दस्यसभावोन। नचैकादौ प्रातिपदि-केनैकत्वाद्यर्थस्योक्तत्वा त्प्रथमादिविभक्तीनां वैयर्थ्य मितिवाच्यम्। लिङ्गसंख्याप्रतिपत्यर्थंतासामावश्यकत्वात्। 'अपदं न प्रयुंजीतेति भाष्योक्तेः। केवलप्रातिपदिकस्यप्रयोगासाधुत्वाच्च। यथारसगङ्गा-धरे—'पद्मपत्रैर्नृणांनेत्रैः सहलोकत्रयत्विषा। उन्मीलन्तोनिमी-लन्तो जयन्ति सवितुः कराः ॥

सवितुः सकलार्थदातुर्भगवतः सूर्यस्य, कराः किरणाः जयन्ति— सर्वानभिभूयवर्तन्ते। जयोऽभिभवः सचन्यूनीकरणमिति कौमुदी-कारः। अत्रवियतिप्रसरण संकुचनरूपयोरुन्मीलननिमीलन योरा-श्रयभेदेनभिन्नयोरप्येक क्रियाभिसंबन्धः। हेमचन्द्रस्त्वलंकार चूडामणौ—'सहभावस्योक्तिः सहोक्तिरित्यन्वर्थसंज्ञालक्षणमाह। सहशब्दार्थोऽत्रसाहित्यम्। तच्चैकजातीयैककालिक क्रियाद्यन्व यित्वसमनियतम्। यथामच्छिष्य दुर्गादत्तकवेः—'शब्देन्यायेच

साहित्येकवित्वेदर्शनेषुच । समंलीलायतेवाणीछज्जूरामस्यमद्गुरोः॥ सहैवदशभिः पुत्रैर्भारंवहति गर्दभोत्यादौतु नायमलंकारः। अतिशयोक्तिमूलकस्यैव सहार्थस्य चमत्कारजनकत्वे नात्रतथात्वाभावात्। सहशब्दोऽत्रपद्ये विद्यमानतावाची। दशानांपुत्राणां विद्यमानत्वेऽपीत्यर्थः। भारंवहतीति तस्यादौर्भाग्यमित्यन्योक्तिः।

विनोक्तिश्चेद्विना किंचित्प्रस्तुतंहीनमुच्यते ॥ १६ ॥

यत्रकिमपिवस्तुकेनापिविनाहीनंभवतिसविनोक्तिरलंकारः । विनाभावस्योक्तिर्विनोक्तिरित्यन्वर्थसंज्ञेयम् । साचार्थनिवन्धनैव तेनर्तेनानादियोगेपीयंवोध्या। क्रमेणोदाहरणानि—

'संपदासंपरिष्वक्तो विद्ययाचानवद्यया।
नरोनरोचतेलोके विनाविनयसंपदम्॥

अनवद्यया=निष्पापया, वदेर्नञ्चि उपपदेऽवद्यपण्यवर्येतिसूत्रेण यत्प्रत्ययः। अवद्यं पापमिति कौमुदीकारः। संपरिष्वक्त इत्युभयान्वयीकाकाक्षिगोलकन्यायात्। नरोचतेनृभ्यइतिशेषः। नरास्तस्मैन स्पृहयन्तीतिभावः। यथावा 'क्वकर्मप्रध्वस्तं फलतिपुरुषाराधनमृते। अत्रर्तेयोगे 'ऋते द्वितीया चेतिचान्द्रसूत्राद् द्वितीया। "केन जनेन घनेविपिने वहुकालवतीव तपश्चरितं, यस्य ऋते सुमुखी विकला सकलार्थवतीपरिरोदिति हा। इतिकाशीस्थदुःखभंजनकविपद्ये तु ऋतेयोगेषष्ठीनिरंकुशैवेतिवोध्यम्। यथावा—'नानानारीं-निष्फला लोकयात्रा। दम्पत्योः सहाधिकारादिति कौमुदी कारोक्ते र्नारीं विनायज्ञादिकर्मकरणानधिकारात्। एषूदाहरणेषुसंपद्यादि

युक्तस्यापि विनयंविना, प्रध्वस्तकर्मणः शिवाराधनंविना, लोकयात्रायानारींविना, हीनत्वमुक्तम् । यथावा 'यथाहि शीलेनविनाकुलाङ्गना यथाविवेकेनविनामनस्विता । तथैव शोच्याहरिणाङ्कशेखर स्तवोपयोगेन विना सरस्वतीं ॥ इति स्तुतिकुसुमाञ्जलिपद्येऽपीयमेव, शोच्याशब्देनहीनत्वोक्तेः । यथावा—'शैत्यंविनानचन्द्रश्रीर्नदीपः प्रभयाविना । नसौगन्ध्यं विनाभाति मालतीकुसुमोत्करः ॥ नभाति नशोभत इतिसर्वत्रानुषङ्गः । अकर्मकोऽयंभातिः । फलव्यापारयोरेक निष्ठतायामकर्मकः । इतिभूषणोक्तेः । फलव्यापारयोर्धातुरितिभूषणोक्तदिशातुधातुमात्रस्य फलविशिष्टव्यापारेशक्तिः । नचसर्वेषांधातूनां तर्हिफलवाचकत्वेन सकर्मकत्वापत्तिरितिवाच्यम् । फलव्यधिकरणव्यापारवाचकत्वंसकर्मकत्वं, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्व मितिस्वीकारेणादोषादितिदिक् ॥ १६ ॥

निदर्शनाऽभवन्वस्तुसंबन्ध उपमाकरः ।

वस्तुनः संबन्धोनघटमानः सन् उपमाकर उपमाकल्पकोनिदर्शनालंकारः । दृशेर्ण्यन्ताद्भावेयुच् । निदर्शनं दृष्टान्तकरणम् । नच निदर्शनाविषये व्यङ्ग्योपमयैवास्तुचमत्कारइतिवाच्यम् । कल्पितौपम्यमूलिकया निदर्शनयैवचमत्कारोदयात् । यथा—

'काहंदैन्यभराक्रान्तः क्वायंश्रीपतिरच्युतः ।
तृषार्तमुखलब्धोऽयंसङ्गमः सौरसैन्धवः ॥

यद्यपि निराशापोषकत्वाद्दैन्यमनार्यजुष्टोऽस्वर्ग्योऽकीर्तिकरश्चगुणः । अतएव महात्मभिः 'यंयंपश्यसि तस्यतस्यपुरोमाब्रूहिदीनं-

वचइत्याद्युक्तम्। वेदेष्वपि—"सुमनसः स्याम। ऋ ६।५।५।

'शतमदीनाः स्याम शरदः [यजुः ३६।२४]

'जीवेम शरदः शतम् सा०। पुष्येमशरदः शतम् अ० १६।५७।१-८

इत्यादि प्रार्थनाभिराशावादितैवोक्तासैवचसकलसमुन्नति-कारणं दृश्यते। तथापिभगवदग्रेदैन्यंनदुष्यति। स्वशालीनता-परिहारार्थमेव भगवदग्रेदैन्यप्रदर्शनस्यशास्त्र सम्मतत्वात्। अत्रतृषार्तस्य गङ्गासङ्गमइव दीनस्यमेसुदाम्नः श्रीपतेः साक्षात्कार-इत्युपमा कल्प्यते। महोद्भटस्त्वाह—"अभवन्वस्तुसंबन्धोभवन्वा-यत्रकल्पयेत्। उपमानोपमेयत्वं कथ्यतेसानिदर्शना॥ उदाहृतंच-प्रतीहारेन्दुराजेनकाव्यालंकारसारलघुवृत्तौ—'विनोचितेन पत्याच रूपवत्यपिकासिनी। विधुबन्ध्यविभावर्याः प्रबिभर्तिविशोभताम्॥ अत्रकामिन्याविभावरीकर्तृकविशोभताधारणसंबन्धोऽनुपपद्यमानः कामिनीविभावर्योरुपमानोपमेयभावे पर्यवस्यति। यथावा ममदुर्गाभ्युदये।

'अर्धिसुततुमपिवश्मिकरावलम्बः
पाणौविधातुमिहकामय इन्दुमम्ब।
वांच्छामिलंघयितुमस्मिसुवर्णशैलम्
यत्त्वद्बलं गदितुमुद्यममद्यकुर्वे॥

सुततुमित्यत्रागमशास्त्रस्यानित्यत्वान्नेट्। वश्मि-इच्छामि, नचवशेःछान्दसत्वेनतत्रैषप्रयोगः, कथमितिवाच्यम्। "जयायसे-नान्य मुशन्तिदेवाः। 'वष्टिभागरिरल्लोपमित्यादि प्रचुरप्रयोगदर्श-नस्यवशेर्लौकिकत्वेमानात्। एतेन वष्टीत्यत्रवशेः छान्दसत्वेनेहप्रयो-

गश्चित्य इतिशेखरकारोक्तिश्चिन्त्या। कामये—इच्छामि, कमु-कान्तौ, कान्तिरिच्छेति कौमुदीकारोक्तेः। अम्वेतिसंबुद्धौ, सम्यग्वोधनं संबोधनमितिव्युत्पत्त्या—संवोधनमभिमुखीकृत्यज्ञापनम्। संवोध्यतावच्छेदकरूपेणसंवोध्यस्य सिद्धिंविना तदसंभवात्। अधिकमस्मदीयेसिद्धान्त-कौमुदीप्रकाशे द्रष्टव्यम्। अम्बार्थनद्योरितिह्रस्वः। नचाम्वेतिसिद्धावपिद्यचकस्यैवाम्बार्थस्यह्रस्वइतिभाष्योक्तेर्जगदम्वेत्यादिप्रयोगाः कथमितिवाच्यम्। तदन्तविधिनातत्सिद्धेः। अस्मीत्यहमर्थेऽव्ययम्। सुवर्णशैलं सुमेरुं स्पष्टमन्यत्। अत्रकराभ्यां सागर तरणादिसदृशं त्वद्गुणगणभाषणमित्युपमायांपर्यवसानम्। सर्वाणीमानिनिदर्शनोदाहरणानि अभवद्वस्तु संवन्धनिवन्धनानि। संभवद्वस्तुसंबन्ध निवन्धनन्तूदाहरणं यथा-काव्यप्रकाशे— 'उन्नतंपदमवाप्ययोलघुर्हेलयैवसपतेदितिब्रुवन्। शैलशेखरगतोदृषत्कणः चारुमारुतधुतः पतत्यधः॥

अत्रलाघवेसत्युन्नतपद प्राप्तित्वंकारणतावच्छेदकं, पतनत्वं कार्यतावच्छेदकमितिकार्यकारणभावः। तत्रदृष्टान्तत्वेनोत्तरार्धोपादानम्। यथावाभामहालंकारे— 'अयंमन्दद्युतिर्भास्वानस्तंप्रतियियासति। उदयः पतनायेतिश्रीमतोवोधयन्नरान्॥ अत्र "पतनान्ताः समुच्छ्रया इतिन्यायेन सर्वस्योदयः पतनावसान इतिवस्तुसंवन्धः संभवति।

दृष्टान्त उपमानादेर्धर्मस्य प्रतिविम्बनम् ॥१७॥

आदिपदेनोपमेयस्य ग्रहणम्। तथा चोपमेयस्योपमानेनसामान्यधर्मस्यसामान्यधर्मेणस्प्रति विम्वनं दृष्टान्तालंकारः। दृष्टं-

दर्शनंतस्यान्तोनिश्चयोयत्रेतिदृष्टान्त शब्दव्युत्पत्तिर्भाष्यकैयटयो-रुक्तासैवात्रापिबोध्या। दृष्टान्तश्चसाधर्म्यवैधर्म्याभ्यां द्विधाभवति। साधर्म्येणयथा—'हरिर्हरतिपापानि दुष्टचित्तैरपिस्मृतः। अनि-च्छयापिसंस्पृष्टोदहत्येवहि पावकः॥

हरिर्विष्णुः। दुष्टचित्तैरपीत्यपिशब्देन येतुशुद्धचित्ताभगवन्नाम स्मरन्तितेषांपापानिहरतीति तु किमुवक्तव्यमितिसूचितम्। पापानि-हरतिनाशयति। हरणंस्तेयंनाशनंचेतिकौमुदीकारः। वैकुण्ठनाम-ग्रहणमशेषाघहरंविदुरिति भागवतोक्तेः। पृथक्करोतीतिवापृथक्क-रणानुकूल हरणस्यापिहरतेरर्थात्। तत्रदृष्टान्तमाह—'अनिच्छ-यापीति। पावकोग्निः। अत्रहरिपावकयोः। पापशरीरयोर्हरण-दहनयोश्चबिम्ब प्रतिबिम्बभावः। वैधर्म्येणयथामम—

'त्वयिदृष्टे जगन्नाथ, स्रंसते संसृतिव्यथा।
दृष्टाकमलवृन्दस्यादृष्टेग्लानिरहस्करे॥

हे जगन्नाथ, त्वयिदृष्टे त्वद्दर्शनेकृतेसति, संसृतिव्यथा जन्ममरण दुःखं, स्रंसते नश्यतित्वत्प्राप्तेरेवमोक्षत्वादितिभावः। तत्रदृष्टान्तः अहस्करेसूर्येऽदृष्टेसतिकमलवृन्दस्यग्लानिर्दृष्टा। अत्रदृष्टेतु-सूर्येकमलवृन्दस्यग्लानिर्नदृष्टेत्येवंरूपेवैधर्म्ये विपर्ययेसाधर्म्यपर्य-वसानमितिदृष्टान्तालंकारत्वम् संसृतिव्यथास्रंसनग्लानिदर्शनयो-श्चबिम्ब प्रतिबिम्बभावः। प्रतिवस्तूपमायांधर्मः प्रतिबिम्बितोन भवतीहत्तुभवतीतिततोभेदः। नचात्रोपमायथेवादिशब्दाभावात्। नाप्यर्थान्तरन्यासः सामान्यविशेषभावाभावात्। "तृप्तियोगः परे-णापिमहिम्नानमहात्मनाम्। पूर्णश्चन्द्रोदयाकाङ्क्षीदृष्टान्तोऽत्र

महार्णवः ॥ इतिमाघपद्ये तुनायमलंकारः । बिम्बप्रतिबिम्बभावए-वतस्योत्थानात् । अत एव दृष्टान्तोदाहरणादिशब्दानप्रयोक्तव्याः पौनरुक्त्यापत्तेरितिदिक् ॥ १७ ॥

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्यचेत् ॥

प्रस्तुतादप्रस्तुतस्य प्रतीतिः समासोक्तिरलंकारः। समासेन संक्षेपेणार्थद्वयस्योक्तिः समासोक्तिरितिव्युत्पत्तेः। समासोक्तावप्रस्तुतव्यवहार समारोपएव चारुता हेतुरितिकुवलयानन्दकारः। यथाराजतरङ्गिण्यांकह्लणस्य—'असमाप्त जिगीषस्य स्त्रीचिन्ता कामनस्विनः। अनाक्रम्य जगत्सर्वंनोसन्ध्यां भजतेरविः ॥

मनस्विनोधीरस्य, प्रशंसायां विनिः। स्त्रीचिन्ता स्त्रीग्रहणेच्छा-कांकुत्सितैव, स्वकर्तव्यासमापनात्। यथा हर्षचरिते हर्षप्रतिज्ञा-"यावन्मम न सकला जिताभूमि स्तावन्मेब्रह्मचर्यमिति। असमापित विद्यस्येत्यपिक्वचित्पाठः। समाप्तविद्याव्रतस्यैवस्त्रीग्रहणाधिकारात्। अत्र प्रस्तुत रविसंध्ययोरप्रस्तुतनायकनायिका व्यवहारस्य स्फूर्तिर्व्यज्यमाना प्रस्तुतेऽभिन्नतया ऽरोप्यमाणा वाच्योत्कर्षमाधत्ते तमादायैवालंकारत्वव्यवहारः। यथावासाहित्यसारे ऽच्युतरायस्य—'पद्मिनींलालयन्प्रातः स्व वियोगान्मुनिन्नताम्। रागीकरपरामर्शैः स्मेरयन्भातिभास्करः ॥ अत्र प्रस्तुते सूर्योदयेवर्ण्यमाने श्लिष्टविशेषणसामर्थ्यादप्रस्तुतनायकनिष्ठनायिकापरितोषण व्यवहारः प्रतीयते ॥

अलंकारः परिकरः साभिप्राये विशेषणे ॥१८॥

साभिप्रायविशेषणत्वं परिकरालंकारः। परिकरः साभिप्राय-

शब्दः सोऽस्मिन्नस्तीतिमत्वर्थीयोऽच् । भूषणत्वाभावान्नसुट् ।
साभिप्रायत्वं=प्रकृतार्थोपपादकचमत्कारि व्यंग्यकत्वम् ।

यथानर्घराघवे—'मारीचमारीचतुरं सुबाहोरपवारणम् ।
न्यस्यतां लक्ष्मण—करे ताड़का–ताड़नं धनुः ॥

यथावा मम छज्जूरामायणे—'ससीतं लक्ष्मणोपेतं शत्रुघ्नभरत-स्तुतम् । कौशल्यागर्भसंभूत रामं दाशरथिं भजे ॥
राम इति यौगिकंनाम, रमन्तेयोगिनोऽस्मिन्नितिव्युत्पत्तेः । करणाधिकरणयोश्चेत्यधिकारेघापवादेनहलश्चेतिसूत्रेणघञ् । घञजपःपुंसीतिप्रायोवाद इतिशेखरे । 'रम्भारामेत्यादौ व्यभिचारादितिमदीयेप्रकाशे। सीतारामयोर्वेदेऽपिवर्णनमस्ति। यथा—"रामः सीतांविगृह्णातु तां पूषा नुयच्छतु। विगृह्णातुस्वीकरोतुपूषाजनकोऽनुयच्छतुददात्वित्यर्थः । अधिकमस्मन्मित्रमाधवाचार्यशास्त्रिसंकलिते पुराणदिग्दर्शनेद्रष्टव्यम् । पूर्वत्र –सर्वाणिधनुर्विशेषणानि, अत्र च रामविशेषणानि साभिप्रायाणि । लक्षणेविशेषणपदं विशेष्यस्याप्युपलक्षणं, तेन विशेष्येसाभिप्रायेऽपि परिकरएव । ततश्च कुवलयानन्दोक्तः पृथक् परिकरांकुरो व्युदस्तः । तदुदाहरणे 'चतुर्णां पुरुषार्थानांदातादेवश्चतुर्भुजः । इत्यादौ चतुर्भुजइतिविशेष्यं पुरुषार्थ चतुष्टय दानसामर्थ्याभिप्रायगर्भम् । यद्वाचतुर्भुजपदस्यहिदेव विशेष्यक भुजचतुष्टयवत्त्वप्रकारकवोधत्वंकार्यतावच्छेदकम् । तत्र-विशेषणीभूत भुजचतुष्टयवत्त्वांशस्यैवप्रकृतार्थोपपादकत्वात् ॥१८॥

अप्रस्तुतप्रशंसास्यात्सायत्र प्रस्तुताश्रया ।

अप्रस्तुतात्प्रस्तुतप्रतीतिरप्रस्तुतप्रशंसालंकारः । अप्रस्तुतपदेन

मुख्यतात्पर्यविषयीभूतार्थातिरिक्तोऽर्थोग्रहीतुमुचितः । तेनच "किंभृङ्गसत्यांमालत्यां केतक्याकण्टकेद्धया" इत्यत्र प्रियतमेन सहोद्यानेविहरन्ती काचिद्भृङ्गंप्रत्येवमाहेतिप्रस्तुतेन प्रस्तुतान्तरद्योतने प्रस्तुतांकुर इति कुवलयानन्दोक्तंपरास्तमस्या एवात्रसंभवात्। किञ्चिदुक्तिवैचित्र्येण तत्कल्पनेऽलंकाराणामानन्त्यप्रसङ्गाच्च। उदाहरणं यथा माघे—'पादाहतं समुत्थाय मूर्धानमधिरोहति।

स्वस्थादेवापमानेऽपिदेहिनस्तद्वरंरजः ॥

अत्राप्रस्तुतस्यरजसः प्रशंसया, प्रस्तुतस्यापमानसहिष्णोः पुरुषस्य निन्दाप्रतीयते । यथावानैषधे—

किंनद्रुमा जगतिजाग्रतिलक्षसंख्याः
तुल्योपनीत पिककाकफलोपभोग्याः ।
स्तुत्यस्तुकल्पविटपीफलसंप्रदानं
कुर्वन्सएव विबुधानमृतैकवृत्तीन् ॥

कि न जाग्रति सन्ति अपितुजाग्रत्येव, तत्तुल्याराजानोनवर्णनार्हाः । कल्पविटपी-कल्पवृक्षः, तत्तुल्यः काशीश्वरस्तुस्तुत्यो विशेषज्ञत्वात् । विबुधान्-देवान्, अमृ-तैकवृत्तीनमृतभोजिनः । पक्षे-विबुधान्विदुषः, अमृतैकवृत्तीनयाचितग्राहिणः । अत्राप्रस्तुतकल्पवृक्ष प्रशंसयाप्रस्तुस्यकाशिराजस्य प्रशंसाप्रतीयते ।

उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ॥१६॥

यत्रस्तुतिपर्यवसायिनी निन्दा, निन्दापर्यवसायिनीस्तुतिश्चतत्र व्याजस्तुतिरलंकारः । व्याजरूपास्तुतिर्व्याजस्तुतिरितिव्युत्पत्तेः ।

निन्दयास्तुतिर्यथा मम—

'त्वत्पादपद्मं भजतांलाभोदूरेऽस्तुशङ्कर।
प्राक्तनस्यापिदेहस्य हानिस्तवकृपेदृशी ॥

भजतां=भजनंकुर्वताम्, गौरवप्रयुक्तप्रीत्यवच्छिन्नक्रियाभजनमाराधनमुपासनंपूजाच। लाभोऽपूर्ववस्तु प्राप्तिस्तु दूरापास्तः। प्राक्तनस्यवर्तमानस्य, देहस्यापिहानिरत्यन्तविमोक्षः। "तदत्यन्तविमोक्षोऽपवर्गइतिन्यायसूत्रात्। "अभावंवादरिराहेति—वेदान्तसूत्रे-तस्मादभावः शरीरेन्द्रियाणां मोक्ष इति शारीरक भाष्याच्च। अत्र निन्दया शिवसेवको लिङ्गशरीरपर्यन्तं मायामलं निर्धूय शिवसायुज्यंलभत इति स्तुति र्व्यज्यते। शिवसायुज्ये सति न पुनरावृत्तिः संसारवर्त्मसु "न स पुनरावर्तते इति छान्दोग्यश्रुतेः।

स्तुत्यानिन्दापियथाममैव—

'नैव करव प्रशस्य स्त्वं मौनव्रतिशिरोमणिः।
सुख-धाम हरेर्नाम नोच्चारयसि कर्हिचित् ॥

उच्चारणं कीर्तनम्। तच्च मत्प्रियंयथा-"हरे राम हरे राम राम राम हरे हरे। हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ इत्यादि। अत्र मौनव्रतित्वस्तुत्या त्वमतिपामरो भगवद्वैमुख्यान्नरकंयास्यसीतिनिन्दाव्यज्यते। यथावा प्रतापरुद्रीये विद्यानाथस्य, 'प्रतापरुद्रनृपते रहो साहसिका द्विषः। यद्विशन्त्युदधीन्शैलानारोहन्ति समन्ततः॥ अत्र शत्रूणां साहस प्रशंसया निन्दैव व्यज्यमाना चमत्करोति ॥१६॥

यथा वा नवसाहसाङ्कचरितेपद्मगुप्तस्य-'आहारंन करोति नाम्बुनिवतिस्त्रैणंनसंसेवते शेतेयत्सिकतासुमुक्तविषयश्चण्डातपंसेवते। त्वत्पादाब्जरजः प्रसाद कणिका लाभोन्मुखस्तन्मरौ मन्ये मालव-

सिंह, गुर्जरपतिस्तीव्रं तपस्तप्यते ॥ मालवसिंहः सिन्धुलवक्रमः अत्रतपश्चरणस्तुत्या मालवेन्द्रत्रासेनतपश्चरतीतिनिन्दा व्यज्यते।

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः।

सामान्यं विशेषेण, विशेषः सामान्येन यत्समर्थ्यते सद्विविधोऽर्थान्तरन्यासालंकारः। सामान्यं विशेषेण यथा नैषधे—

'पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहहतेन तदा तम्।
पर्यभूत्खलुकरैर्द्विजराजः कर्मकः स्वकृतमत्र न भुङ्क्ते ॥

द्विजराजं चन्द्रं ब्राह्मणोत्तमंच। पर्यभूत्तिरश्चकार। करैरंशुभिर्हस्तैश्च। तदा नारदागमनकाले। अत्र कर्मक इत्यादिसामान्यं पर्यभूद्दिनमणीत्यादिविशेषेण समर्थितम्। विशेषः सामान्येन यथानैषधएव—'तवसम्मतिमेवकेवलामधिगन्तुं धिगिदंनिवेदितम्। ब्रुवतेहि फलेनसाधवो नतु कण्ठेन निजोपयोगिताम् ॥

'बबन्ध सेतुं रामोऽब्धेरतरोत्तंचमारुतिः। र
पपौतमेवचागस्त्यो दुष्करं किंमहात्मनाम् ॥

बबन्धेति—परोक्षेलिट्। अन्तर्भावितण्यर्थोऽत्रबन्धिः। बन्धयामासेत्यर्थः। क्वचित्परोक्षत्वसत्वेऽपितदविवक्षयानलिट्। यथा—"अध्यास्तसर्वर्तुसुखामयोध्यामित्यादौ। परोक्षत्वंचवक्तुः साक्षात्काराविषयत्वमित्यधिकंव्युत्पत्तिवादे। तमब्धिम्। लक्षणयाब्धिजलं, पपौ पिबतिस्म। गलबिलाधःसंयोगानुकूल व्यापारश्च पिबतेरर्थः। स्पष्टमन्यत्। अत्रोपर्युक्ते मदीये समस्यापूर्त्तिपद्ये दुष्करं किमित्यादि सामान्यं बबन्धेत्यादि विशेषेण समर्थितम्।

उपकारमेव तनुते विपद्गतः सद्गुणोनितराम्।
मूर्छांगतो मृतो वा निदर्शनं पारदोऽत्ररसः ॥

इत्यत्रपद्येऽप्ययमेवालंकारो निदर्शनपदस्य समर्थकपरत्वात्। एतेनोदाहरणालंकारोऽत्रपृथगिति रसगङ्गाधरकारोक्तमपास्तम्। अयमलंकारोवेदेऽपि दृश्यते— 'नार्यमणंपुष्यतिनो सखायं केवलाघो भवति केवलादीत्यादौ। दृष्टान्तप्रतिवस्तूपमयोर्विशेषेण विशेषस्य समर्थनं, काव्यलिङ्गे तु न सामान्य विशेषभाव इति तेभ्योभेदोऽस्येति साहित्यविपश्चिदपश्चिमै र्वोध्यम्।

आभासत्वेविरोधस्य विरोधाभास इष्यते ॥२०॥

आभासत इत्याभासो विरोधश्चासावाभासश्चेतिकर्मधारयः। विरोधबुद्धिश्च निवर्तमानापि चमत्कार—कारणमित्यलंकारत्वव्यपदेशोहेतुः। यथारघुवंशे—

'अजस्य गृह्णतोजन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेदकस्तव ॥

अजस्य-नित्यत्वाज्जन्मरहितस्यापि, मत्स्यकूर्मादिरूपेणजन्मधारिणः, निरीहस्यकार्यरहितस्यापि हतसर्वशत्रोः, जागरूकस्य चैतन्यरूपतया सर्वदाप्रबुद्धस्यापि प्रलयकालेस्वपतस्तवेश्वरस्यकोनाम जनो याथार्थ्यंस्वरूपंवेद जानाति नकश्चिदपीत्यर्थः। नेतिनेतीत्यादिश्रुतेः। ईश्वरस्वरूपापरिज्ञानादेव जीवस्यवन्धःतत्स्वरूपपरिज्ञानात्तु मोक्ष इति शारीरकभाष्ये। अत्राजत्वादि गुणस्य जन्मग्रहणादि क्रियया विरोधः। "द्वे वावब्रह्मणोरूपे मूर्तंचामूर्तंचेति शतपथश्रुत्योभय स्वरूप ज्ञानात्तु स निवर्तते। यथावाममम—

'सती त्वमसती चैव लक्ष्मीस्त्व महरिप्रिया। सरस्वत्यमपुत्रीत्वं प्रियेभक्तीत्वमद्भुता ॥ अत्र भक्तेदेयाद्भुतनीत्वाम्

भावेऽपिसतीत्वाद्युक्त्याविरोधाभासः पुरः स्फुरन्निवभासते ।

अन्ये वरोधाभ साः काव्यप्रकाशादिषु द्रष्टव्याः । अयमलंकारोवेदेऽपिदृश्यते—"एक एव रुद्रोनद्वितीयोऽवतस्थेऽसंख्याताः सहस्राणियेरुद्राअधिभूम्यामित्यादौ,अत्रैकानेकत्वविरोधः कर्मभेदादेकस्यापि स्वप्रभावेणानेकरूपस्वीकाराच्चसनिवर्तते ॥२०॥

आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।

स्वयमुक्तस्य विचारदशायां प्रतिषेध आक्षेपालंकारः । यथाममच्छायापद्ये—'रे मूढ़, तव दौरात्म्यं वक्ष्यामि विदुषांपुरः ।

कृतं वा कृतया पापिन् कथया हतयापि ते ॥

दौरात्म्यं दुष्टताम् । गुणवचनत्वात्ष्यञ् । तव हतया कथयापिकृतया कृतमलं, 'कथापि खलु पापानामलमश्रेयसे यत इतिमाघोक्तेरितिभावः । अत्र मूढ़ दौरात्म्यातिशयो वक्ष्यमाणः किमपि विचार्यनिषिद्धः । कश्चित्तु निषेधमात्रमाक्षेपइत्याह । चमत्कारजनकत्वमलंकार सामान्य लक्षणं प्राप्तमेवेति तदाशयः । यथानागानन्दे—'न खलु न खलुमुग्धेसाहसंकार्यमीदृक्' इत्यादौ ।

गुम्फः कारणमाला स्यात् यथाप्राक् प्रान्तकारणैः ॥२१॥

पूर्वं पूर्वं कारणं परंपरंकार्यम् । पूर्वंपूर्वंकार्यपरंपरंकारण मितिद्विधाकारणमालालंकारः । द्वयोरुदाहरणम्—

'पुण्येन श्रीः श्रिया दानं दानेन विपुलं यशः ।

जायते नरकः पापात्पापंदुःसङ्गसंभवम् ॥

पुण्येनेतिहेतौतृतीया । फलमत्रहेतुः । तस्यापिस्वज्ञानद्वाराजनकत्वात् । पुण्यस्यफलेनसहाभेदः संसर्गः । पुण्यनिष्ठोपकारकता-

निरूपितोपकार्यंताश्रयाश्रीरितिबोधः । उपकार्योपकारकत्वंचेह साध्यसाधनत्वम्। पूर्वत्र श्यादिकंपुण्यादे र्द्वितीयस्मिन्नरकादिकं प्रतिपापादेः कारणत्वम् । पूर्वभागे प्रथमं कारणस्य ततःकार्यस्य द्वितीयभागेप्राक् कार्यस्यततः कारणस्य निर्देशाद्द्विविधापिकारण-मालोदाहृता। अत्र यद्यपिकार्याणामपिमाला तथापिकारण गुण-वर्णने कविसंरंभात्तथोक्तिः।

सैकावलीपूर्वपरंस्थाप्यतेऽपोह्यतेयतः ॥२१॥

यत्र पूर्वं पूर्वं प्रति परं परस्य विधिर्वा निषेधो वा स द्विधा एकावल्यलंकारः। एकावलीहारभेदस्तत्सादृश्यादलंकारेलक्षणा। यथारंभाशुकसंवादे—

'गेहेगेहे जंगमाहेमवल्ली वल्यांवल्यांपार्वणं चन्द्रबिम्बम्।
बिम्बे बिम्बे दृश्यते मीनयुग्मं युग्मे युग्मे पञ्चबाणप्रचारः॥

हेमवल्यादिपदानां कामिनीत्वादिलक्ष्यतावच्छेदकं, तथाहि—जंगमाहेमवल्लीकामिनी, तत्रचन्द्रबिम्बंमुखं, तत्रमीनयुग्मं नयन-द्वयं, तत्रपचवाणस्य कामस्य प्रचारोजनमोहनरूपः कटाक्षविक्षेपः। स्पष्टमन्यत्। अत्रपूर्वपूर्वस्मिन्नुत्तरोत्तरस्य विशेषणत्वेन विधानम्। यथावाहितोपदेशे—

'नसा सभा यत्र न सन्ति वृद्धा वृद्धा नतेयेनवदन्तिधर्मम्।
धर्मः सनो यत्र न सत्यमस्ति सत्यंन तद्यच्छलमभ्युपैति॥

अत्रसभायांवृद्धानां तत्रधर्मस्येत्येवंरीत्याविशेषणतयानिषेधः। नचात्रवृद्धान्विना सभा न रमणीयेतिविनोक्तिध्वनिरेवायमितिवा-च्यम्। वाच्यार्थकृतस्यचमत्कारस्यात्रमुख्यत्वात्॥ २१॥

स्यान्नोकिस्तु शिखरादेः ... ॥२२॥

शिश्वादे रसाधारण—चेष्टावर्णनं स्वभावोक्तिरलंकारः।

यथाममज्येष्ठभ्रातुर्भूलापति श्री मूलचन्द्रस्य च्छायापद्ये—

'चरणाब्जंकराब्जेन मुखाब्जे विनिवेशयन।

वटपत्रपुटे तिष्ठन् वालकृष्णः प्रसीदतु॥

प्रसीदत्विति प्रार्थनायां लोट्। प्रार्थनाचेष्टसाधनत्वम्। 'सर्वेस्वभूत्यर्थप्रार्थयन्त इतिहेतुमतिचेतिसूत्रेभाष्योक्तेः। असाधारणचेष्टावर्णनमिदंभगवतः। साधारणचेष्टावर्णनस्यतु नालङ्कारत्वमालंकारिकैः स्वीक्रियते। यथा—ताम्बूलभृतगल्लोऽयंभल्लंजल्पतिवालकः। करोति खादनंपानं सदैवतु यथातथा॥

शिश्वादेरित्यादिपदेनपश्वादिपरिग्रहः। तदुदाहरणं दर्पणादौ।

छलोक्तिर्निह्नवोभूयः छलेनोक्तिमवस्तुनः।

गोप्यं वस्तुकेनापिहेतुना प्रतीतं तस्यछलेनपुनर्गोपनं छलोक्तिरलंकारः। छलेनोक्तिः छलोक्तिरितिव्युत्पत्तेः। यथा—

'अहो शैत्यस्य महिमा, हिमानल, तवेदृशः।

शक्यते नच निह्नोतुं कृतो येनाधरव्रणः॥

अहो आश्चर्यजनकः। असंभावितार्थकरणादाश्चर्यम्। अत्र कान्तासङ्गमहेतुकोऽधरव्रणोहिमानलशैत्यहेतुकत्वच्छद्मना गोप्यते नचासावपह्नुतिः प्रकृता प्रकृतयोः साम्येतत्स्वीकारादत्र च तदभावादितिविभावनीयंभावुकैः।

परिवृत्तिः क्रयोद्धाभ्यां द्वयोर्न्यूनातिरिक्तयोः॥२३॥

न्यूनाधिकयोर्द्वयोः द्वाभ्यां परस्परं क्रयः परिवृत्तिरलंकारः।

यथाममच्छायापद्ये—

'जटायुर्जर्जरं देहं दत्वाप विमलं यशः ।
सीतायै हृदयं स्वं च मृत्युं नक्तञ्चराधिपः ।।

जटायूरामायणे प्रसिद्धः । जर्जरं जराजीर्णं, नक्तंचराधिपो-रावणः । चरेष्टः । टित्वादादौतुनभवति । प्रत्ययः परश्चेत्यनेनवाधात् । दत्वेति सीताया इति च देहलीदीपक न्यायेनोभयत्र संवध्यते । अत्रपूर्वार्धे न्यूनेनाधिकस्योत्तरार्धेऽधिकेनन्यूनस्य परिवृत्तिः । क्वचित्तु ल्ययोरपि परिवृत्तिर्यथा—"अङ्गानिदत्वाहेमाङ्गि, प्राणान् क्रीणासित्वंनृणाम् । इत्यादौ । दानादानव्यवहारश्चात्रकविकल्पितएव न वास्तवः । तेन— 'क्रीणन्तियत्रमुक्ताभिर्वदराण्यपिवालिकाः । इत्यत्रनायमलंकारः चमत्कारजनकत्वाभावात् ।।२३।।

पर्यायोक्तन्तुगम्यस्य वचोभंग्यन्तराश्रयम् ।

यदेवगम्यं विवक्षितं तस्यैव पर्यायेण प्रकारान्तरेणाभिधानं पर्यायोक्तमलंकारः । नचैकस्यैवव्यापारद्वयेनावगमस्य व्यर्थत्वात्पौनरुक्त्यमितिवाच्यम् । प्रकारभेदेनतदभावात् ।

यथाश्रीकण्ठस्यहयग्रीववधनाटके—

'हयग्रीवं समालोक्य सहजापिस्थितिर्जहे ।
मदेनैरावणमुखे मानेन हृदये हरेः ।।

अत्रैरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यार्थएवहयग्रीवंसमालोक्येत्यादिनाशब्देनप्रकारभेदेनोक्तः । इहव्यङ्ग्यमगूढं वाच्यादचारुचेति न ध्वनित्वव्यवहारः पारमार्थिकः ।

विभावना विनापिस्या त्कारणं कार्यजन्मचेत् ।।२४।।

विनैव कारणं कार्योत्पत्तिः, कारणतावच्छेदकावच्छिन्नप्रति

योगिताकाभावेऽपिकार्योत्पत्तिरितियावद्विभावनालंकारः। विभाव्य ते विचार्यंते कारणमस्यामिति विभावना, विशिष्टाकारणनिरपेक्षा भावना कार्योत्पत्तिर्यत्रेतिवाविभावना बाहुलकादधिकरणेयुच्।

यथा मनुस्मृतौ—'योऽनधीत्य द्विजोवेदानन्यत्रकुरुतेश्रमम्।
स जीवन्नेव शूद्रत्व माशु गच्छति सान्वयः॥

द्वाभ्यांजन्म संस्काराभ्यां जायत इति द्विजोब्राह्मणादिः। वेदानिति वहुवचन मतन्त्रम्। "वेदानधीत्यवेदौवावेदंवापीत्युक्तेः। शूद्रत्वं शूद्रतुल्यत्वं, लदयतावच्छेदकमश्लाध्यजीवित्वम्, गच्छति प्राप्नोति क्वचित्तथैवपाठः। शूद्राश्च द्विविधाः। स्पृश्यानापितादयोऽस्पृश्याश्चर्मकारादयोऽधिकं शूद्राणामनिरवसितानामितिसूत्रे भाष्ये।

वेदाध्ययनविधि रार्थाववोधपर्यन्तः। निरर्थकस्याध्ययानानुपपत्तेः। मीमांसा—परिभाषायामप्युक्तम्, कृत्स्नस्याध्यायस्यफलवदर्थज्ञानत्वमेवनत्वदृष्टार्थम्। दृष्टेसम्भवत्यदृष्टकल्पनायोगादिति। श्रुतयश्चाहु-स्थाणुरयंभारहारः किलाभूदधीत्यवेदं न विजानातियोऽर्थम्। योऽर्थज्ञइत्सकलंभद्रमश्नुते नाकमेतिज्ञानविधूतपाप्मा॥ "अधेन्वाचरतिमाययैपवाचं शुश्रुवामफलामपुष्पाम्॥ अर्थं वाचः पुष्पफलमाहेतिभगवान्निरुक्तकारः। भाष्यकारोपि—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोऽध्येयो ज्ञेयश्चेत्याह। वेदश्चमन्त्रब्राह्मणात्मकः। न च ब्राह्मणानि न वेदोमन्त्रादौवेदानांचतुष्टयस्यैव प्रसिद्धेरितिवाच्यम्। आपस्तम्बबौधायनप्रभृतिमहर्षिभिरुभयस्यैवेदत्वेनस्वीकृतेः। अत्रशूद्राच्छूद्रायांजन्मरूपकारणाभावेऽपिशूद्रत्वोक्त्याविभावना चमत्कारः परिस्फुटः॥ २१॥

विशेषोक्तिरखण्डेषु कारणेषुफलावचः।

कारण कलापे सत्यपि कार्यानुत्पत्तिर्विशेषोक्तिरलंकारः । विशेषस्य नवीनप्रकारस्योक्तिर्यत्रेतिव्युत्पत्तेः । अत्रकलशब्दःकार्यपरः । 'हेतौसत्यपि कार्यानुत्पत्तिःस्याद् विशेषोक्तिरित्यलंकार कौस्तुभात् । यथादेवीभागवते—'प्राणस्य क्षुत्पिपासे द्वे मनसः शोकमोहने । जन्ममृत्यू चदेहस्यषड्भिरहितःशिवः॥ प्राणस्येति आर्षत्वादेकवचनं, उत्तररामचरितादौत्वप्रयुक्तत्वदोषः। अत्र प्राणादि कारणसद्भावेऽपिक्षुत्पिपासादिकार्यस्य शिवेऽनुक्ते विशेषोक्तिः । यथावानैषधे—'स भिन्नमर्मापितदर्तिकाकुभिःस्वदूतधर्मान्नविरन्तुमैहत॥ अत्र दूतत्वाद् विरामस्य तदर्तिकाकादिकारणसत्वेऽपि तदनुक्ते र्विशेषोक्तिः । नच —विभावना विशेषोक्त्योर्नकिंचित् पार्थक्यम् । तथाहि-यत्रकारणाभावेऽपिकार्योत्पत्ति रूपोच्यतेविभावना, तत्रकारणाभावरूपकारणसत्वे कार्याभाव रूपकार्यानुक्तेर्विशेषोक्तिरपि संभवति । एवंयत्रसत्यपिकारणे कार्यानुत्पत्तिर्वर्ण्यते तत्र कारणाभावेऽपि कार्याभाव रूपकार्योक्त्या विभावनाया अपि संभवः इतिवाच्यम् । एकत्र व्यतिरेक स्फुरण निबन्धनचमत्कारस्य परत्र चान्वय स्फुरण निबन्धनचमत्कारस्य भेदेनभेदादितिदिक् ।

विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगति ः ॥२५॥

कार्यकारणयोर्वैयधिकरणमसंगतिरलंकारः । अत्रैकदेशकयो भिन्नदेशकत्वमेवचमत्कारकारणम् । यथादर्पणे—'अहोखलभुजङ्गस्यविचित्रोऽयं बधक्रमः । अन्यस्यदशतिश्रोत्रमन्यः प्राणैर्वियुज्यते ॥

खल एव भुजङ्गइति मयूरव्यंसकादिसमासोरूपकंच । जनेऽर्इं प्रक्र

म्यगमेरपीतिभाष्योक्तेर्ड:। दशतीति, दंशनंच हिंसाहेतुकोदन्त-करणकः संयोगानुकूलोव्यापारः। "व्यापारोभावनासैवोत्पादना सैवच क्रियेतिहयुक्तेः। साहित्यशास्त्रे व्याकरणनय इव क्रिया-मुख्य विशेष्यक एव शाब्दबोधो भवति नतु न्याय नयइव कर्तृमुख्य विशेष्यकः साहित्यशास्त्रस्य व्याकरण परिशिष्टत्वात्। अत्रार्थ विशेषप्रतिपत्तये श्रोत्र दंशन प्राणवियोगयोः कार्यकारणयोर्भिन्न निष्ठत्वेनोपनिबन्धनादसंगतित्वम्॥ ८५॥

पर्यायो यदि पर्यायैरेकस्यानेक संश्रयः।

यद्येकंवस्तु क्रमेणानेकत्र भवति क्रियतेवा तदापर्यायालंकारः। यथापद्मगुप्तस्यनवसाहसाङ्कचरिते—'बिम्बोष्ठएवरागस्तेतन्विपूर्वम-दृश्यत। अधुनाहृदयेप्येषमृगशावाक्षि लक्ष्यते॥ अत्र रागस्याधार भेदाद्भेदेप्येकतयाध्यवसायादेकत्वम्। यत्त्वत्ररसगङ्गाधरकृद्भिर्नाय-मलंकारः। एकसंबन्ध नाशोत्तर मपरसंबन्धे सत्येव पर्यायपदस्य लोकेप्रसिद्धि रित्यभाणि, तन्न रमणीयता मावहति।

काव्यसरणौ—शब्दसादृश्यमात्रेणलौकिकार्थाविवक्षणात्। यथावानन्दवर्धनस्यविषमबाणलीलायाम्—

'तत्तेषां श्रीसहोदररत्नाभरणेहृदयमेकरसम्।
बिम्बाधरे प्रियाया निवेशितं कुसुमबाणेन॥

तेषामसुराणां श्रीसहोदररत्नं कौस्तुभमाभरणंयस्यतत्रविष्णौ-निविष्टं हृदयं कामेनमोहिनीबिम्बोष्ठेनिवेशितमित्यर्थः। अत्र हृदयस्यैवानेकत्रकरणवर्णनात्पर्यायालंकारत्वंनिर्विवादम्।

विषमोवर्ण्यतेयत्रघटनाननुरूपयोः॥ ८६॥

परस्परमानुरूप्यरहितयोर्यत्रघटनासंसर्गस्तत्र्विषमालंकारः । विषमशब्दोवाच्यलिङ्गोप्यलंकार विशेषणे पुंल्लिङ्गोऽपि "गुणवचनानामाश्रयतो लिङ्गवचनानीतिभाष्योक्तेः । काव्यप्रकाशेऽलंकारकौस्तुभेचपुंसैवनिर्देशः । यथाममदुर्गाभ्युदये—'प्रतिकूल विधिस्तवाधुना यदिदं जल्पसि मत्प्रभुं प्रति । क्स वैरणादुर्मदोभटः कचनत्वं नवपल्लवाकृतिः ॥ तवदेव्या मत्प्रभुं शुंभम्, सप्रसिद्ध इत्यर्थः। नचसर्वनाम्नां तत्र शक्तिरेवेतिवाच्यम् । तेषां बुद्धिस्थत्व प्रकारक बोधजनकत्वेऽपि प्रसिद्धत्व प्रकारक बोधजनकत्वे शक्त्यभावात् । यत्तदोर्नित्यसंबन्धेऽऽपि प्रक्रान्त प्रसिद्धानुभूतार्थ विषयस्तच्छब्दो यच्छब्दोपादानंनापेक्षत इति काव्यप्रकाशकारः । क्वचित्यच्छब्दोऽपितच्छब्दंनापेक्षते यथा साहसाङ्कमहाराजसमुद्रगुप्तस्यकृष्णचरिते—"मातृगुप्तो जयति यः कविराजो नकेवलम् । काश्मीरराजोऽप्यभवत्सरस्वत्याः प्रसादतः ॥ क्वचिद्द्वयोः शाब्दत्वंयथास्मन्मित्रमहाकव्य खिलानन्दस्यकृष्णचन्द्रचरिते — 'सावाणीहरिगुणगानतत्पराया तच्चित्तं भगवतियत्सदानुरक्तम् । क्वचिद्द्वयोरप्यार्थत्वमेवयथामम--"क्विकुर्मः क्वचगच्छामः सभ्यतांभारतस्यकः । रक्षिष्यतिवृथाशोकः सर्वरक्षक ईश्वरः ॥

अत्र ईश्वरः सर्वरक्षकः स एव हिन्दुसंस्कृति रक्षिष्यतीतिबुध्यते । प्रकृतोदाहरणे क्वशब्दद्वयं देवीशुंभयोरणेमहद्वैषम्यंसूचयतीति विषमालङ्कारः। यत्तु "क्व शुक्तयः क्व वामुक्ताः" इत्यादौनायमलंकारो वस्तुवृत्तस्य लोकसिद्धत्वेनालंकारत्वायोगादितिरसगङ्गाधरकारा आहुः । तन्नयुक्तम् । शुक्ति मुक्तयोः संबन्धानुपपत्तेर्लोकप्रसिद्धिशून्यत्वात् ॥ २६ ॥

समः स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः ।

परस्परमनुरूपयोः संबन्धस्य वर्णनं समालंकारः । अत्र वक्तव्यं विषमेऽवादिष्म । यथा मत्कनिष्ठभ्रातू रामकृष्णभट्टस्य—'यत्प्राप विदुषी भक्तिदेवी दैवेन संगतिम् । विदुषा चञ्चञ्जुरामेण तच्चन्द्रं प्राप चन्द्रिका ॥ विदुषी=पण्डिता, विदेः शतुर्वसुः उगितश्चेति ङीप् वसोःसम्प्रसारणम् । संगतिं पाणिग्रहणं, स्पष्टमन्यत् । नच नैकं पदं द्विः प्रयोज्यं प्रायेणे तिन्यायात्कथमिह प्राप्नोतेर्द्विः प्रयोग इति-वाच्यम् । उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तोविषय एक पद प्रयोग निषेधस्य तद्वति विषये तस्यैव प्रयोगं विनादोषात । शक्ततावच्छेद-कमहिम्ना भिन्नत्वेनेवप्रतीतेः । यथावा—'विसर्गव्ययचित्तोऽपि-विधियुक्त विधानकृत् । पिचुमर्दे फलेकाकः सहकारेकृतः पिकः ॥

विसर्गः सृष्टः । पिचुमर्दफले=निम्बफले, स्पष्टमन्यत् ।

पूर्वत्र समसंबन्धः स्तुतिपर्यवसायी, परत्रनिम्बवाकयोःसह-कारपिकयोश्चसम्बन्धो निन्दापर्यवसायीस्तुतिपर्यवसायीचेति भेदः।

स्याद्व्याघातोऽन्यथाकारी तथाकारी क्रियेतचेत् ॥९७॥

येनोपायेनयत्कार्यमेकेनकृतं तदन्येन तदुपायकमेव तत्कार्य विरुद्धकार्यसाधनं चेत्क्रियेत तदा स व्याघातालंकारः । प्रथमसाधि-तप्रस्तुतवस्तुव्याहतिहेतुत्वादितप्रदीपकारः । यथामम—

'खलानां वचनैः खिन्नं सज्जनं प्रीणयन्ति ये ।
वचनैरेव ते धीरा जयन्ति जगतीतले ॥

व्याहतेः संप्रसारणा[illegible] व्यापतेर्घातेर्घञि तभा-

च्यम् । धियंरान्तोतिधीरा धैर्यवन्तः स्पष्टमन्यत् । अत्रवचनैरेव-खेदनंप्रीणनंच । यद्यपिखलसज्जनवचनानांनैक्यं तथाप्येक जातीयत्वादेकत्वं विवक्षित्वेदमुक्तम् । ॥ २७ ॥

विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् ।

कविप्रसिद्धाधारपरिहारेणाधेयावस्थितिवर्णनं विशेषालंकारः। यथामम दुर्गाभ्युदये—

'इतिहासविदांनेदंहृदयादपयास्यति ।
संहृत्यदैत्यनिचयंयत्कृतंचरितंत्वया ॥ दी इति

त्वया देव्या । "अलिङ्गेयुष्मदस्मदीति "साम आकमितिसूत्रे भाष्योक्तेः । 'युस्मदस्मत्षट्संज्ञकाः त्रिषुसरूपाइतिकौमुदीकारोक्तेश्चलिङ्गभेदोनात्रदोषः । अत्रदेवीरूपमाधारंविनापि आधेयभूतस्यमहामायापवित्रचरित्रस्यावस्थितिवर्णनाद्विशेषालंकारत्वम् ।
उत्पत्यगगनंदेवो केशोष्वाकृष्यनिष्ठुरम् ।
समरंकुरुतेघोरं निराधारा सुरारिणा ॥
इत्यत्रदुर्गाभ्युदयपद्येतुनायमलंकारः । स्वशब्देननिवेदनात् ।
कविप्रसिद्धाधारपरिहारस्यैवालंकारत्वेनवर्णनात् ।

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥८॥

क्रमेणोक्तानां पदार्थानां तेनैवक्रमेणान्वयो यथासंख्य मलंकारः। संख्या मनतिक्रम्य यथासंख्य मितिव्युत्पत्तेः । संख्याया-अनति वृत्तिश्च प्रथमस्य प्रथमेन द्वितीयस्य द्वितीयेने त्यादिक्रमेण समन्वयेभवति । यत्त्वत्ररसगङ्गाधरकारेणोक्तम्, अत्र यथासंख्यता मात्रंनत्वलंकारत्वं चमत्कारा भावादिति । तदसत् । एकस्मिन्गद्येप-

द्येवालोकव्यवहारेऽपि बहूनां क्रमान्वयेचमत्कारानुभवादस्यालं-कारत्वोपपत्तेः। यथाऽलंकारशेखरे—

'परोद्वेगे परानन्दे खलसज्जनयोर्द्वयोः।
स्वभाव एव शरणं विषपीयूषयोरिव॥

शरणंकारणमस्तीत्यर्थः। कारणत्वं चेहजन्यजनकत्वरूपं, यथापरोद्वेगजनकत्वं विषस्य परानन्दजनकत्वं चामृतस्यस्वभाव-स्तथाखलसज्जनयो रित्युपमार्थः। अत्र यथाक्रमं चमत्कारजनका-न्वयाद्यथासंख्यत्वम्। खलाः सज्जनाश्च सहृदयानन्दकृतानिर्णीताः "धात्राखलानांचसतांच किंचिद्विवेचनार्थं क्रियतेनचिह्नम्। परस्य दोषेषु गुणेषु चामी प्रमोदलाभात्प्रकटीभवन्ति॥ २८॥

समाधिः कार्यं सौकर्यं कारणान्तरसंनिधेः।

आकस्मिककारणान्तर समवधानाद्यत्रारिप्सितकार्यस्यसौक-र्यंजायतेससमाधिरलंकारः। यथामम—

'उत्कण्ठां कश्चिदाचक्रे यावदात्म विनिश्चये।
तावदेवकुतोऽप्यासीद् विद्वज्जनसमागमः॥

यावत्तावच्छब्दावव्युत्पन्नावव्ययेपठितौ। भाष्येप्युक्तं यदव्युत्पन्नौ तयोरत्रग्रहणम्। आसीद्भूवे अर्थः। अस्तिभवति वर्तति विद्यत-यःसमानार्थाइतिशेखरोक्तेः। चार्वाकः "सवाएषपुरुषोऽन्नरसमय इत्यादिश्रुतेः स्थूलशरीरमात्मेतिवदति। अपरश्चार्वाकः—'तेह-प्राणाः प्रजापतिमेत्यब्रुवुरित्यादिश्रुते रिन्द्रियाण्यात्मेतिभणति। बौद्धस्तु—अन्योऽन्तरात्मा विज्ञानमय' इत्यादिश्रुतेरज्ञानमात्मेति-वदति। परन्तुएतैश्चार्वाकादिभिरुक्तेषुश्रुत्याभासेषु पूर्वपूर्वोक्तश्रुती-

नामुत्तरोत्तरश्रुतिभिरात्मत्ववाधदर्शनान्नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मपदार्थ इति वेदान्त-सारे निर्णयः । अधिकं मत्प्रणीतायांतट्टीकायांद्रष्टव्यम् । प्रकृतोदाहरणे कार्यमात्मतत्त्वनिश्चयः कारणांशाख्नदर्शनं कारणान्तरं— वेदान्तविद्वत्समागमः ॥ आत्मतत्त्वनिश्चयेमोक्षो निश्चितः "ज्ञात्वात्मानं जन्ममृत्युप्रहाणिरिति । "तमेवविदित्वातिमृत्युमेतिनान्यः पन्था विद्यतेऽयनायेतिच श्वेताश्वतरश्रुतेः ।

तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ॥ २६ ॥

स्वगुणत्यागादन्यदीयगुणग्रहणंतद्गुणालंकारः । यथा—

'पद्मरागायते नासामौक्तिकंतेऽधरत्विषा ।
नीलोत्पलानिदधते कटाक्षैरतिनीलताम् ॥

तेतवाधरत्विषा, नासा नासिका, तस्या मुक्तैवमौक्तिकं, विनयादित्वात्स्वार्थेठक्प्रत्ययः। पद्मरागायते=पद्मरागमणिरिवाचरति। नीलोत्पलानीन्यत्र विशेषणंविशेष्येणवहुल मितिसमासः। अभेदसंवन्धावच्छिन्ननीलत्वावच्छिन्न नीलनिष्ठविशेषणतानिरूपिविशेष्यतावान्वोधः । अभेदश्चसमासेसंसर्गमर्यादयाभासते व्यासेतुप्रकारत्वेन । यद्यप्यभेदोनसंसर्गस्तथापीतर संवन्धानवच्छिन्न विशेष्यविशेषणभावसंसर्गः तेनांववच्छितः। पूर्वत्रनासामौक्तिकस्य स्वगुणत्यागपूर्वकमप्रस्तुतपद्मगुणगणग्रहणात्तद्गुणत्वम् । परत्रपरसंनिधानेनस्वगुणोत्कर्षादपितद्गुण त्वमेव ॥ २६ ॥

संगतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।

स्वसंबद्धपदार्थ गुणाग्रहण मतद्गुणालंकारः। यथाममच्छायापद्ये—'गाङ्गयामुनयोर्मज्जन् जलयोः शुक्लकृष्णयोः। हंसत्वं,शुभ्र-

एवासिनचकश्चिद्विपर्ययः ।। मज्जन् सर्वावयवच्छेदेन स्नानंकुर्व-न्नपि, हेहंस, त्वंशुभ्रएवासिशुभ्रत्वधर्मातिरिक्तधर्मावच्छिन्ना-भाववान्वर्तसे । 'अस्त्यर्था अस्ति भवति वर्तति विद्यतयः कौमुद्या-मुक्ताःफलांशाभावादस्त्यादेरकर्मकत्वम् । सत्तादिरेवास्त्यादेरर्थः । फलांशस्यसूक्ष्मदृष्ट्याप्यप्रतीतेः । अत्र प्रकृतेनहंसेन गङ्गायमुनयोर-प्रकृतयोः शुक्लस्यकृष्णस्यचगुणस्याग्रहणादतद्गुणत्वम् । नचास्य-विशेषोक्तावन्तर्भावइतिवाच्यम् । परगुणाग्रहणरूपावच्छिन्नविशे-षजनकत्वेनपृथगलंकारत्वयोगात् । अन्यदीयगुणेनान्यत्रगुणाभा-वस्य,अन्यदोषेणान्यत्र दोषाभावस्यचवर्णनेप्ययमेव लंकारोनतुरस-गङ्गाधरकारोक्तः पृथगवज्ञालंकारइत्यालंकाराचार्या विचारयन्तु ।

परिसंख्यानिषिध्यैकमेकस्मिन्वस्तुयन्त्रणम् ।। ३०।।

एकंवस्तुप्रतिषिध्यापरस्मिन्वस्तुनो नियमनं परिसंख्यालंकारः । यत्रकविप्रतिभयेतरवस्तुव्यवच्छेदस्तत्रैवास्या अलंकारत्वम् । तेन-"पञ्च पञ्चनखा भक्ष्या' इतिमीमांसकोक्ता परिसंख्या नालंकारः । यत्तु परिसंख्याशब्दस्यलोकपरिगणनवाचकत्वादस्या अलंकारत्व-मन्वर्थमितितत्तुच्छम् । आलंकारिकपरिभाषितानांशब्दानांलोक-विसंवादस्याकिञ्चित्करत्वात् । यथा 'भक्तिर्भवेनविभवेचिन्तायश-सि नात्मनि । शास्त्रेऽभ्यासो न कामास्त्रे विदुषांपरिदृश्यते ।। विदुषांभक्तिर्भवत्यस्माज्जगदितिभव ईश्वरः तस्मिन् 'यतोवाइमानि-भूतानिजायन्तइत्यादिश्रुतेः । 'जन्माद्यस्ययतइतिस्मृतेश्च । भवतेश्चे-तिवक्तव्यमितिकाशिकाकारोक्तेर्भवतेरच्प्रत्ययः । परन्त्वेतद्वार्ति-कंभाष्येनदृश्यते । नन्वीश्वरसद्भावेकिंप्रमाणं ...

ह्यमाभ्यन्तरंवा?नाद्योऽरूपिद्रव्यत्वात्। "न चक्षुषागृह्यतइतिश्रुतेः। "अदृष्टविग्रहोदेवोभावग्राह्यइतियाज्ञवल्क्यस्मृतेश्च। नान्त्य आत्मसुखादिव्यतिरिक्तत्वात्। नानुमानंलिङ्गाभावात्। तदुक्तंप्रशस्तपादभाष्ये- अनुमेयेनसंबद्धं प्रसिद्धं चतदन्विते तदभावेतुनास्त्येवतल्लिङ्गमनुमापकम्॥ अस्यव्याख्यामदीयायांमुक्तावलीटीकायां द्रष्टव्या। नाप्यागमः। वेदानामीश्वरोक्तत्वेनेश्वराभावेवेदानामप्रमाणत्वात्तथा चवैशेषिकसूत्रम्-"तद्वचनादाम्नायस्यप्रामाण्यमितिचेत् शृणु। मनुष्यमात्रेणाशक्यरचनंसावयत्वेनकार्यं नर्बदेश्वरशिलादिकंस्वनिर्माणशक्त मिच्छामात्रेण कर्तारमीश्वरमाक्षिपति। सकलंसकर्तृकंकार्यत्वाद्घटवदित्यनुमानात्। "द्यावाभूमीजनयन्देवएकः' इत्यादेरागमाच्च। नात्मनि न शरीरे, अतएव—"आत्माआत्मानं जानातीत्यत्रान्तः करणावच्छिन्नःकर्ताशरीरावच्छिन्नं कर्मेतिकर्मवत्सूत्रभाष्यंसंगच्छते। शास्त्रे-वेदादिशास्त्रे, अभ्यासोरुचिः, कामास्त्रे-स्त्र्यादौ। अत्रभक्त्यादेरितराधिकरणकत्वंप्रतिषिद्धम्॥३०॥

तदुदात्तं भवेद्यत्रसमृद्धं वस्तु वर्ण्यते।

समृद्धिमद्वस्तुवर्णनमुदात्तालंकारः। यथामम—

'नूनमेव कुरुक्षेत्रं स्वर्गद्वारमुदीर्यते।
अद्यापि दुग्धदध्यादेर्नदोवहति यत्र वै॥

"धर्मक्षेत्रेकुरुक्षेत्रे' इत्यादिभगवद्गीतोक्तेर्नकेवलं धर्मक्षेत्रमिदं किन्तुभोगक्षेत्रमपीत्याह-स्वर्गद्वारमिति। तच्चास्य--'येवसन्ति कुरुक्षेत्रे तेवसन्ति त्रिविष्टपे' इतिमहाभारतोक्तेः। कथमित्यत आह अद्यापीति। भूतकालस्यतुकथंवक्तेत्यन्यते। वहतिस्यन्दत-

इत्यर्थः। "धातोरर्थान्तरेवृत्ते"रिति कौमुदीकारोक्तेर्वहिरत्राकर्मकः।
यथावाममैव—'भारतंनूनमेवात्र पृथिव्यां सर्वतोऽधिकम्।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥

भारतशब्देनभारतवर्षस्यभारतग्रन्थस्य च ग्रहणम्। सर्वतः सर्वदेशेभ्यः सर्वग्रन्थेभ्यश्च। द्वयोर्वैशिष्ट्यमेकेनाह—यदिहास्तीत्यादिना। द्वयोरप्युदाहरणयोः कुरुक्षेत्रदेशस्य भारतस्य च समृद्धिर्वर्णिता। कुरुक्षेत्रस्य भारतान्तर्गतत्वेन पश्चाद्वर्णनार्हत्वेऽपि 'त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते" इत्यार्षप्रामाण्येनाभ्यर्हितत्वात्तथोक्तिः। मम्मटमते—महतामुपलक्षणमपितल्लक्षणम्। उपलक्षणमङ्गत्वम्। यथामम—'स जयतु गणेशदत्तो गोस्वामी त्यागमूर्तिश्च। यन्नेतृत्वेऽद्यत्वे प्रचलति भूयान्सनातनो धर्मः। अत्रेदृशा अपि महापुरुषा यत्रसन्तीतिसनातनधर्मस्याधिक्यादङ्गित्वम्। त्यागमूर्त्यादिपदवा विराजितस्य गोस्वामिगणेशदत्तस्यअङ्गत्वमिति।

विकल्पस्तुल्यबलयोर्विरोधात्प्रतिभोत्थितात् ॥३१॥

यत्र कविप्रतिभोत्थितात्तुल्यबलयोर्विरोधाद्वैचित्र्यं तत्रविकल्पालंकारः। यथा कुवलयानन्दे—

'पतत्यविरतं वारि नृत्यन्ति च कलापिनः।
कृतान्तः सखि कान्तो वा दुःखस्यान्तं करिष्यति॥

वारि जलमविरतं निरन्तरं पतति। अधः संयोगावच्छिन्ना क्रिया पतेरर्थः। कलापोऽस्ति येषां तेकलापिनोमयूराः। अतइनिठना वितीनिप्रत्ययः। नृत्यन्ति धात्वर्थेनोपसंग्रहादकर्मकता। नर्तनंकुर्वन्तीत्यर्थः। कयारीत्यास्यां विरहदुःखस्यान्तः संभाव्यते

तत्राह-कृतान्त इत्यादिना। अत्र यदि प्रियसमागमो न भवेत्तदा मरणमाशंसनीयम्। प्रियसमागमे तु न तदित्याशंसायां विकल्पादलंकारता। "ते धन्यास्ते महात्मानस्तेषां लोके स्थिरं यशः। यैर्निवद्धानि काव्यानि ये वा काव्येषु वर्णिताः॥ इत्यादौ तु समुच्चयार्थो वाशब्दो न तु विकल्पार्थ इति नालंकारत्वमिति ध्येयम् ॥ ३१ ॥

निष्पादनार्हस्यार्थस्य काव्यलिङ्गं समर्थनम्।

निष्पादनार्हस्यार्थस्य निष्पादनं काव्य लिङ्ग मलंकारः। काव्याभिमतं लिङ्गं काव्यलिङ्गम्, तार्किकाभिमत लिङ्गत्व व्युदासाय काव्यग्रहणम्। लिङ्गमत्र हेतुः। तत्स्वरूपमग्निपुराणे भणितम्—"सिसाधयिषितार्थस्य हेतुर्भवति साधकः। कारको ज्ञापकश्चेति द्विधा सोप्युपदिश्यते॥

चमत्कृतिहेतुत्व मलंकारसामान्यलक्षणं प्राप्तमेव तेन 'दण्डेन घट' इत्यत्र चमत्काराभावान्नायमलंकारो भवितुमर्हति। पञ्चम्यादिशब्दप्रतिपादितहेतुकत्वस्य हेतोर्व्युदासाय लक्षणे समर्थनपदम्। गम्यमानहेतुकत्वस्यैव हेतोरालंकारिकैः काव्यलिङ्गत्वाङ्गीकारात्। यत्तु रसगङ्गाधरकारेणोक्तं काव्यलिङ्गं नालंकारः। हेतुहेतुमद्भावस्य लोकसिद्धत्वादिति तन्न समीचीनम्। लौकिकत्वेऽपि कविप्रतिभामात्रगम्यतया चमत्कारजनकत्वात्। एतदीयहेतुहेतुमद्भावस्य लोकसिद्धत्वाभावाच्चेति दिक्। यथा साहित्यकौमुद्याम्—

'सदागमसमुद्भूतपरमानन्दतुन्दिलाः।
कदाचिदपि नेच्छन्ति स्वर्गग्रामटिकां बुधाः॥

सदागमो वेदादिशास्त्रं, तदनुशीलनेन, सतामागमेन वा समुद्भूत

उत्पन्नइत्यर्थः। भवतेः सत्ताद्यर्थनिर्देशश्चोपलक्षणम्। 'यागात्स्वर्गोभवतीत्यादावुत्पद्यतइत्याद्यर्थात्। उपसर्गास्त्वर्थविशेषस्यद्योतका इतिकौमुदीकारः। अनेकार्था अपि धातवोभवन्तीतिभाष्यमत्रमानम्। परमानन्दोब्रह्मानन्दस्तेनतुन्दिलाः प्रवृद्धाः। तुन्दादिभ्यइलच्। बुधा विद्वांसः, कदाचित्स्वप्नेऽपि, स्वर्गएवग्रामटिकाल्पग्रामःताम्। ग्रामशब्दादल्पार्थेटिकच्प्रत्ययः। तद्धिताइतिसूत्रेवहुवचनमनुक्तानांसंग्रहार्थंतेनाल्पार्थेग्रामटिकादयः साधव इति मनोरमा—शब्दरत्नयोः। अत्र पूर्वार्धमुत्तरार्धेन निष्पाद्यते। यथावामदीयपितृव्यपण्डितशिरोमणि शिवदत्तपादानाम्—

'शंभुस्मरणसंभूतविज्ञानगतसंभ्रमः।
सांसारिकसुखं मन्ये तृणेनसदृशंलघु॥

शं-सुखंभावयत्युत्पादयतीतिशंभुः शिवः। अन्तर्भावितण्यर्थोऽत्रभवति रितिकौमुदीकारः। शंभवत्यस्मादितिशंभुरिति व्युत्पत्तिस्तु चिन्त्येतिमाधवः। तस्यस्मरण मुत्कण्ठापूर्वकमाध्यानं, ततः संभूतंयज् विज्ञानं सोऽहमित्यादिश्रुतेः शिवात्मैकत्वरूपंतेनगतोनष्टः संभ्रमोयस्यसः। स्पष्टमन्यत्। अत्रोत्तरार्धंपूर्वार्धेननिष्पाद्यत इतिभेदः। अयमलंकारोवेदेऽपिदृश्यते—

'अक्षैर्मादीव्यः कृषिमित्कृषस्वेत्यादिमन्त्रे।

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ॥३२॥

बलवच्छत्रुपक्षपातिनि कस्मिन्नपिपराक्रमकरणं प्रत्यनीकमलंकारः। अनीकात्प्रतीतिविग्रहेऽव्ययीभावसमासः। शत्रुनिष्ठ बलवत्वकथनेनात्मनिष्ठं दुर्वलत्वं गम्यते। लोकेशत्रुपराजयार्थमनीकंसैन्यं प्रयुज्यते। तत्पराजयाशक्तौतत्पक्षपातिनः पराभवः क्रियते।

सचानीकतुल्यतया प्रयुज्यमानत्वात्प्रत्यनीकमितिलाक्षणिकःशब्दः । यथानैषधे—

'जितस्तवास्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौममतौवधेकुतः ।
तवेतिकृत्वा यदि तज्जितं मया न मोघसंकल्पधराः किलामराः ॥

आस्येन मुखेन, आस्यमस्यतेरितिनिरुक्तकारः । विधुश्चन्द्रः । स्मर्यतएवनदृश्यतेऽनङ्ग त्वादितिस्मरः कामः, श्रियाकान्त्या । वधे-मारणे, सच कविकल्पितएवनवास्तवः । कुतः कस्माद्धेतोः । किंपद-स्यजिज्ञासितेशक्तिरितिशक्तिवादग्रन्थेद्रष्टव्यम । स्वयमुत्प्रेक्ष्याह-तवेतिकृत्वेत्यादि । किलेतिसंभावनायां,स्पष्टमन्यत् । त्वयाजितौचन्द्र-कामौ नलंजेतुमशक्तौ तत्प्रीतिनिधिभूतायाः तदीयकामिन्याः पीड़ना-त्प्रत्यनीकालंकारः । अत्रसंभावनायाविद्यमानत्वेऽपिनोत्प्रेक्षालंकार-त्वप्रसङ्गः । प्रत्यनीककृतवैचित्र्यस्यैव चमत्कारातिशयजनकतया तेनोत्प्रेक्षा वैचित्र्यस्य तिरोधानात् ॥३८॥

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ।

कैमुत्यन्यायेनार्थस्य संसिद्धिः काव्यार्थापत्तिरलंकारः । मीमांसकाभिमतार्थापत्तिलक्ष्यताव्युदासायकाव्यपदम् । यथामम—

'मनांस्यपि मुनीनां वै हरन्तिहरिणेक्षणाः ।
विषयासक्त चित्तानां प्राकृतानां कथैव का ॥

अपिभिन्नक्रमःहरन्तिमोहयन्ति, विसिन्वन्तिविषयिणमनुबध्नंती-तिविषयाःस्त्र्यादयः । अत्र हरिणीदृग्विलासे मानसेपदमर्पितवति-मननशीलाना मपि नास्तिकुशलंपामराणान्तु का कुशलचर्चेति कैमुत्यन्यायादर्थसाधनंकाव्यार्थापत्तिः । नचात्र कैमुत्यन्यायता-

मात्रं नत्वलंकारत्वमितिवाच्यम् । अनुभवसिद्धवैमुत्यन्यायचमत्कारित्वस्यनिरालम्बनत्वापत्तेः । केनचिदर्थेन तुल्यन्यायत्वादर्थान्तरस्यापादनमप्यर्थापत्तिः । यथाममदुर्गाभ्युदये दुर्गां प्रत्युक्तिः ।

'तव शरणं समुपागतो यदि ना कश्चन तापी ।
तर्हि सवितुरप्यग्रतोभवेत्तमः संस्थापि ॥

तापी तापत्रयवान् मत्वर्थेइनिः नतु तप्तुं शीलमस्येत्यर्थेणिनिः कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसीतिभाष्योक्तेः । ते च तापा आधिभौतिकाध्यात्मिकाधिदैविकसंज्ञकाः । तत्राधिभौतिकं–मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम् । आधिदैविकं–भूतप्रेतग्रहाद्यावेशनिबन्धनम् । आध्यात्मिकं–शारीरं मानसंच । शारीरं वातपित्तश्लेष्मणांवैषम्यनिमित्तम् । मानसंकामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनमितिसांख्यतत्त्वकौमुदीकारः । तमःसंस्था स्थितिः । नचकथं संस्था "घुमास्थेतीत्वप्राप्ते रितिवाच्यम् । स्थःकचेतिसूत्रभाष्ये संस्थेतिप्रयोगात् । भवेत्-भवितुं शक्नुयात् । "शक्लिङ् चेतिशक्यार्थेलिङ् । तदेतद्द्वयमप्यसंभवीतिभावः । अत्रैकेनार्थेनतुल्यकारणत्वादर्थान्तरं न्यायसाम्यादापद्यते । अयमलंकारोवेदेऽपिदृश्यते—'यस्तित्याज सखिविदं सखायं नतस्यवाच्यपिभागोऽस्ति । यदिंशृणोत्यलकं शृणोति नहि प्रवेदसुकृतस्यपन्थाम् ॥ यः पुमानध्ययनमकृत्वा वेदं परित्यजति तस्यवाच्यपिभाग्यंनास्ति, फलेभाग्यंनास्तीतिकिमुवक्तव्यम् । यद्यप्यसौकाव्यनाटकं शृणोति तथापिनिरर्थकमेवतच्छ्रवणम् । तेनसुकृतमार्गज्ञानाभावादितिसायणाचार्यः । अस्मत्प्रियशिष्यपण्डितवामदेवोपाध्यायस्त्वाह—

"श्रौतस्मार्तादिविद्या स्मृति सृति विषया कापिली कापिलीना, क्षीणा काणाद वाणी द्रहिणहरगिरः सौरभं नारभन्ते। क्षामा कौमारिलोक्तिर्जगतिगुरुमतंगौरवाद्दूरवान्तं, काशङ्का शंकरादेर्हृद-यमधिगते काव्यसाहित्यशास्त्रे ॥

उत्तरोत्तरमुत्कर्षः सारमित्यभिधीयते ॥ २३ ॥

यत्र पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षः चरमस्य सर्वोत्कृष्टत्वपर्य-वसायी तत्रसारालंकारः। सारमितिसामान्येनपुंसकंमृदुपचतो-तिवत्। अतएवोक्तंभाष्ये-'शक्यंचानेन श्वमांसादिभिरपिक्षुत्प्र-तिहन्तुमिति। यथावाग्भटालंकारे—

"संसारे मानुष्यं सारं मानुष्यके तु वैदुष्यम्।
वैदुष्ये धर्मित्वं धर्मित्वे चापि सदयत्वम् ॥

मानुष्यं-मनुष्यत्वम्, सारं श्रेष्ठं तस्यदुर्लभत्वात् 'गुह्यंब्रह्म तदि-दंब्रवीमि नहि मानुषात्श्रेष्ठतरंहि किंचित् इति भारतोक्तेः। शंकर पादैश्चोक्तं 'दुर्लभंत्रयमेवैतद्दैवानुग्रहहेतुकम्। मनुष्यत्वंमुमुक्षुत्वं महापुरुषसंश्रयः॥ तत्र वैदुष्यं ज्ञानं तच्चमोक्षसाधनमिहाभिप्रेतं तत्प्राप्तिहेतुविज्ञानं कर्म चोक्तं महामुने।' इतिकर्मणोऽपिमोक्षसा-धनत्वश्रवणात्। ज्ञानकर्मणोः समुच्चयइतिवाच्यम्। नित्यनैमित्तिकै-रेवकुर्वाणोदुरितक्षयमित्या दिना कर्मणोज्ञानसाधनत्वोक्तेः। धर्मि-त्वं-धर्मात्मत्वम्। सदयत्वं दयायुक्तत्वम्। दयाच सर्वभूता नुकम्पा। साक्षात्कृतधर्माणो भूतान्यनुकम्पन्त इतिन्याय भाष्य कार आह। अत्र सदयत्व उत्कर्षो विश्राम्यति, यथावामम—

'देशेषुभारतं सारं तत्र भारतमुत्तरम्।
तत्रापिच कुरुक्षेत्रं तत्रपाण्डवमण्डलम्॥

कुरुक्षेत्रंहि श्रुतिस्मृतिप्रसिद्धोदेशः। कुरुक्षेत्रं वैदेवानांदेवयजनमास (शत०) अविमुक्तं वै कुरुक्षेत्रम् [जावा०] इत्याद्याः श्रुतयः। धर्मक्षेत्रे कुरुक्षेत्रे [गी०] कुरुक्षेत्रंचपाञ्चाला इत्याद्याः स्मृतयः। भगवान्मनुरपिकुरुक्षेत्रमुद्दिश्याह 'एतद्देशप्रसूतस्येत्यादि। अत्रपण्डितमण्डल उत्कर्षोविश्राम्यति। अयमलंकारो वेदेऽपि दृश्यते यथा—

'महतःपरम व्यक्त मव्यक्तात्पुरुषः परः।
पुरुषान्नपरं किञ्चित्सा काष्ठा सापरागतिः॥

अत्र सांख्यशास्त्राभिमतपुरुष उत्कर्ष विश्राम भूमिः। अपकर्षेऽपीम मलंकारमाचक्षतेविचक्षणाः। यथा—

'तृणाल्लघुतरस्तूलः तूलादपि च याचकः।
वायुना किंन नीतोऽसौ मामयं याचये दिति॥

अर्थात्—याचकः सर्वोत्कर्षभूमिः। तत्रैवापकर्षविश्रामात्।

तिल तण्डुल संश्लेष न्यायात्संसृष्टिरुच्यते।

यत्रशब्दार्थालंकाराणांतिलतण्डुलन्यायेन संसृज्यमाना स्थिति श्चमत्कारान्तर मादधाति तत्रसंसृष्टि रलंकारः। तत्रशब्दालंकारयोर्यमकानुप्रासयोः संसृष्टिर्यथा—

'यो वैरिष्वनलो नलो वसुमतीदीपो दिली[illegible]
यो मानेन पृथुः पृथुर्जगति यो निर्लोत्रवो[illegible]
यः कीर्तौ भरतो रतो नृपगुणैर्यः शन्तनु[illegible]
संजातेत्वयि विक्रम क्षितिपते, सर्वेऽपिते[illegible]

शब्दार्थालंकाराणामनुप्रासरूपकोपमानांयथा[illegible]

'निर्वापितेनिजप्रकाशकदिव्यदीपे केनापिदुष्टयुवके[illegible]